THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 375

वैशेषिकदर्शने

महर्षिकल्पप्रशस्तदेवविरचितम्

प्रशस्तपादभाष्यम् ।

पण्डितप्रवर जगदीशतर्कालङ्कारविरचितया सूक्तिटीकया
महामहोपाध्यायपद्मनाभमिश्रकृतया सेतुव्याख्यया
विद्वच्चूडामणि व्योमशिवाचार्यनिर्मितया व्योमवत्या च समन्वितम्
वाराणसीस्थराजकीयसंस्कृतपाठशालाध्यक्षेण पं० गोपी·
नाथकविराजेन न्यायोपाध्याय पं० ढुण्ढिराजशास्त्रिणा च संस्कृतम् ।

THE

PRASHASTAPÂDABHÂSHYAM

BY Prhśhstadevâchârya

WITH COMMENTARIES:

Sûkti,-BY JAGADISA TARKÂLANKÂRA,
Setu,-BY PADMANÂBHA MISHRA, &
Vyomavati,-BY VYOMASHIVÂCHÂRYA.

Edited by

GOPINÂTH KAVIRÂJ, M. A.
PRINCIPAL, GOVERNMENT SANSKRIT COLLEGE.
SARASVATI BHAVAN BENÂRES,

and

DHUNDHIRÂJ SHÂSTRI Nyâyopâdhyâya.

FASCICULUS V-५.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE
Vidya Vilas Press, North of Gopal Mandir, Benares.

1928.

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—३७५

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

Agents:

1 Otto Harrassowitz, Leipzig:
GERMANY.

2 The Oriental Book-supplying Agency,
POONA.

रूपतेति चेत् । तथाहि—बोधरूपं कार्यं बोधादेव भवति । यथा शुक्लाच्छुक्लमित्यादि । नन्वेवं तर्हि धूमस्याग्निजन्यत्वं न स्यात । समानजातीयस्य धूमक्षणस्य भावात् । अथ विलक्षणादप्यग्निक्षणा- द्धूमस्योत्पत्तिरिष्येत । बोधस्यापि विलक्षणाच्छरीरादेरुत्पत्तिर्भवि- ष्यतीति न बोधान्तरसद्भावे प्रमाणमस्ति । अथ किञ्चित् साद- श्यतयाऽग्निर्धूमस्य कारणम । तदा ज्ञानोत्पत्तौ शरीरादावपि समा- नम् । तथा कृष्णादपि शुक्लस्योत्पत्तिर्भवेत् किञ्चित्सादृश्यसद्भावात् । अत्यन्तसमानजातीयं च समनन्तरकारणमित्यभ्युपगम्यमाने रूपज्ञा- नादेव रूपज्ञानं रसज्ञानादेव रसज्ञानं सुखादेव सुखं दुःखादेव दुःखमिति सन्तानानन्त्यं स्यात् । नचाऽस्ति संवेदनमिति । अथैतेषां युगपदसं- संवेदनमननुभूयमानक्षणानामुत्पत्तेः, तर्हि तेन विना तस्यानुत्पत्तेस्तत्- सन्तानोप्यभ्युपगन्तव्यः । तथाच सति तदेव तेषां संवेदनमसंवेदनं चेति प्राप्तम् । न चैतदस्ति । तस्मान्न सर्वं ज्ञानं ज्ञानान्तरजन्यमि- ति प्रतिबन्धोऽस्ति । न च विनाशस्याव्यतिरेकादनुभवस्यावस्थाने स्मरणं युक्तम् । अथ द्वितीयपक्षणे तस्यानुभवस्याभावादनवस्थान- मिति चेन्न । अव्यतिरेके हि तेनाविरोधादवस्थानमेव । व्यतिरेके तु सहानवस्थितिविरोधाभ्युपगमेऽस्मद्दर्शनानुप्रवेशः । तस्मात् स्मरण- मवस्थितमात्मानं प्रसाधयतीति । न च क्षणिकत्वे सति कार्यका- रणभावो घटते । तथाच यदैव कार्यस्योत्पादस्तदैव कारणस्य वि- नाशः, स चोत्पादान्न भिद्यत इत्यभ्युपगमे सहोत्पन्नयोर्न स्यात् कार्य- कारणभावः सव्येतरगोविषाणयोरिव । विनश्यदवस्थं च कारणमि- ष्टं वैशेषिकैर्विनाशस्य हेतुमत्वात् । निर्हेतुकविनाशवादिनां च भाव- विनाशाव्यतिरेकेण विनश्यदवस्थानं सम्भवत्येव । तस्य विनाशकार- णसाकल्यरूपत्वात् । नापि स्वसंविद्वादिनः कार्यकारणभावग्रहणम- स्ति । कारणसंविदः स्वात्मन्येव पर्यवसानात् । तथा कार्यसंविदोपी- ति न कारणज्ञानम् कार्यसत्तामनुभवति, तत्सत्ताकाले तस्यातीत- त्वात् । न च ज्ञानान्तरमेकम् कारणसत्ताकाले कार्यसत्तां तदभावे चा- सत्तां विजानातीति । अथ कार्यकारणज्ञानाभ्यां वासनाक्रमेणास्ति विकल्पज्ञानं कार्यकारणभावग्राहकमिति चेत् । तस्याप्येतद्रूपसमारो- पत्वाभ्युपगमेऽप्रमाणत्वेन कार्यकारणभावस्यासिद्धिरेव । तथाहि यद्यत्र समारोप्यते तत्तथावास्तवमेव । यथा शङ्खे पीतादिरिति । अथ पूर्वाप-

लब्धानुसन्धानं विकल्पज्ञानमिति चेत्। एवं तर्हि कार्यकारणभाव-ग्रहणं विना न वासना। तदभावात् तदध्यवसायविकल्पः कथं भविष्यतीति, अनुभवानुरूपत्वाद्वासनायाः। न च बोधादन्या वासना सम्भवतीत्युक्तम् पूर्वम्। तस्मादवस्थितं प्रतिसन्धातारमन्तरेण तु कार्यकारणभावस्याग्रहणमेवेति। अयं तु क्षणभङ्गोऽस्मद्गुरुभिर्विस्तरेण निरस्त इति नेह प्रतन्यते। तदेवमक्षणिकत्वे सत्याश्रयाश्रयिभावस्योपपत्तेः सत्यमेतत्-परिशेषाद्विज्ञानस्यात्माश्रितत्वमिति।

तथा प्रवृत्तिनिवृत्तिभ्यामात्मा ज्ञायते। किं विशिष्टाभ्याम्? शरीरसमवायिनीभ्यां हिताहितप्राप्तिपरिहारयोग्याभ्यामिति। हितं सुखमहितं दुःखं तयोः प्राप्तिपरिहारौ तद्योग्याभ्यां तत्समर्थाभ्यामिति। व्याप्तिप्रतिपादनार्थमाह-यथा रथकर्मणा सारथी रथस्याधिष्ठाता तद्वदात्मा विग्रहस्य शरीरस्याधिष्ठाताऽनुमीयते। तथाहि-जीवच्छरीरं प्रयत्नवदधिष्ठितं जीवच्छरीरसमवायिहिताहितप्राप्तिपरिहारसमर्थप्रवृत्तिनिवृत्त्याश्रयत्वात् रथवत्। प्रवृत्तिनिवृत्त्याश्रयत्वं वाय्वादौ व्यभिचरतीति हिताहितप्राप्तिपरिहारसमर्थपदम्। तथा शाखायन्त्रनिर्पीडितस्य प्राणिनः शाखाकर्माऽहितनिवर्तकमधस्तनस्थफलादिप्राप्तेर्हितप्रापकञ्चेति तदर्थं शरीरसमवायिपदम्। तथापि नदीस्रोतःपातितशवकर्मणा व्यभिचारः तदध्यधःस्तनस्य शुनस्तनूपयोगात्सुखं भक्ष्यत इति सुखप्रापकमुपरिष्टाच्च स्नानं कुर्वतस्तपस्विनो दुर्गन्धतया दुःखं जनयतीति तन्निवर्तकं चेति तदर्थं जीवच्छरीरपदम्। नन्वेवमपीदं विशेषणं विपक्षादिव सपक्षादेरपि रथादेर्निवृत्तिं दर्शयति इत्यसाधारणत्वमेव स्यात्। नहि रथे जीवच्छरीरसमवेते क्रियाश्रयत्वमस्ति। अथ जीवच्छरीरसमवायिहिताहितप्राप्तिपरिहारयोग्या क्रिया प्रयत्नवत्कार्या विशिष्टक्रियात्वात् रथक्रियावत्। इहापि न सविशेषणस्य हेतोः सपक्षसद्भावः। तथा सुप्तस्य नावारूढस्य यथोक्तविशेषणक्रिया अभिप्रेतेन प्राप्तिहेतुरहितेन निवृत्तिहेतुश्च, न च प्रयत्नवत्कार्येति व्यभिचारः। तस्मादिच्छानुविधायिक्रियाश्रयत्वं हेतुरिति। तथाहि-जीवच्छरीरं प्रयत्नवदधिष्ठितमिच्छानुविधायीक्रियाश्रयत्वाद्रथवत्। क्रिया वा प्रयत्नवत्कार्या इच्छानुविधायिक्रियात्वात् रथक्रियावत्।

तथा प्राणादिभिश्चेति। प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मलिङ्गानीतिसूत्रं दर्शयति अथात्मना साधर्म्यमनुपलब्धेः कथमेषाङ्गमकत्वमित्याह शरीरपरिगृहीते वायौ विकृतकर्मदर्शनाद्भस्त्राध्मापयितेवानुमीयत इति, व्याप्तिप्रतिपादनमेतत्। प्रयोगस्तु—जीवच्छरीरं प्रयत्नवदधिष्ठितं जीवच्छरीरपरिगृहीतवाय्वाश्रयत्वात् भस्त्रावत्। वाय्वाश्रयत्वमन्येषामप्यस्तीति विकृतग्रहणम्। विकारस्तु तिर्यग्गतिशीलस्य वायोर्यदेतदूर्ध्वमधोगमनम्। तथापि वायुर्वाय्वन्तरेण प्रतिहत ऊर्ध्वं गच्छतीति परिगृहीतपदम्। तथाह्यन्तःस्सुषिरवृक्षे छिद्रप्रदेशेन प्रविष्टस्य वायोरूर्ध्वमधश्च गमनं सम्भवतीति शरीरपदम्। तथापि शुष्कानुबद्धशरीरे प्रविष्टस्य विकारः सम्भवतीति जीवग्रहणम्। नन्वेवमपि जीवच्छरीरपरिगृहीतविकृतवाय्वाश्रयत्वं भस्त्रादेर्न सम्भवतीति साधनविकलताप्रसङ्गः। तन्न भस्त्रासाधर्म्यात्। भस्त्राशब्देन महिषीशरीरस्य विवक्षितत्वात् उपचारेण। यथाहि भस्त्राध्मायते प्रयत्नवता तथा महिषीशरीरमिति दृष्टमतः साध्यसाधनाधिकरणत्वम्। यदि वा जीवच्छरीरपरिगृहीतविकृतो वायुः प्रयत्नवदधिष्ठितः जीवच्छरीरपरिगृहीतविकृतवायुत्वात् भस्त्रापरिगृहीतविकृतवायुवत्। यथोक्तविकृतवायुकर्म प्रयत्नवत्कार्यम् यथोक्तस्य वायोर्विकृतकर्मत्वात् भस्त्रापरिगृहीतविकृतवायुकर्मवत्।

तथा निमेषोन्मेषकर्मणा नियतेनेति। न वातदोषादुत्पन्नेन। दारुयन्त्रप्रयोक्तेवात्माऽनुमीयत इति व्याप्तिप्रतिपादनमेतत्। यथा हि प्रयत्नवताऽधिष्ठितस्य दारुयन्त्रस्य निमेषोन्मेषकर्म तथा जीवच्छरीरस्यापीति। अक्षिवर्त्मनोः संयोगार्थम् कर्म निमेषः, उन्मेषस्तु विभागार्थमिति। तथाहि—जीवच्छरीरं प्रयत्नवदधिष्ठितम् निमेषोन्मेषकर्माधारस्यावयवित्वाद्दारुयन्त्रवत्। अक्षिवर्त्मनी तु प्रयत्नवदधिष्ठिते निमेषोन्मेषकर्माधारत्वात् दारुयन्त्राक्षिवर्त्मवत्। निमेषोन्मेषकर्मणी वा प्रयत्नवत्कार्ये निमेषोन्मेषकर्मत्वात् दारुयन्त्रनिमेषोन्मेषकर्मवत्।

तथा देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् गृहपतिरिवात्माऽनुमीयत इति व्याप्तिप्रतिपादनमेव। वृद्धिरवयवोपचयः। क्षतस्य शस्त्रादिसम्बन्धात्, भग्नस्य वास्यः (?)

संरोहणं लोकप्रसिद्धम् । व्यस्तं चैतान्नविवक्षितम् । सामस्त्ये हि व्यवच्छेद्याभावात् । तथा जीवच्छरीरं प्रयत्नवदधिष्ठितम् वृद्धि-निमित्तत्वात् भग्नसंरोहणादिनिमित्तत्वाच्च गृहवत् । आदिशब्देन केशादेरुद्भवनं पुरुषगुणपूर्वकं व्याख्येयं गृहेऽलङ्कारविशेषवत् । अन्यथा हि मृतावस्थायामप्येतत् स्यान्न चैतदस्ति । तथा वृद्धिक्षतभग्नसंरोहणानि प्रयत्नवत्कार्याणि तद्रूपत्वात् गृहगतवृक्षादिवत् । ननु सर्वमेतदनैकान्तिकमचेतनेषु वृक्षादिषूपलम्भात् । तथाच प्रवृत्तिनिवृत्त्योः प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानमिति सूत्रेणेच्छानुविधायिक्रिया परत्र चैतन्ये प्रतीयत इत्युच्यते । तथाहि स्वात्मनि विशिष्टप्रवृत्तिनिवृत्त्योश्चैतन्यकार्यत्वेनोपलम्भादन्यत्रोपलम्भेन तत्कार्यत्वं युक्तम् तदभावस्तु वृक्षादौ । यच्चेदं पादप्रसारणादि तदयसोऽयस्कान्ताभिसर्पवद्वस्तुस्वाभाव्याद् भविष्यतीति । आगमस्तु सुलभत्वादुपचारेणापि व्याख्यातुं शक्यत एवेत्यनैकान्तिकत्वमेव । अथ तदधिष्ठायकस्य सद्भावान्नानैकान्तिकत्वमिति चेत् । न । तस्य लोष्टादिष्वपि सद्भावेन वृद्धिक्षतभग्नसंरोहणप्रसङ्गात् । तदेतत् सर्वमसांप्रतम्, वृक्षादेरपि पक्षान्तर्भावात् । न च साध्येनैव साधनस्य व्यभिचारः, नापि सूत्रव्याघातः, तत्रापि प्रवृत्तिनिवृत्त्योः सद्भावात् । तथाच द्रव्यसंनिधाने पादप्रसारणं न वस्तुस्वाभाव्याच्छरीरेपि तदभावप्रसङ्गात् । नियतद्रव्याभिलाषश्च वृक्षायुर्वेदे परिपठितस्तेषां ज्ञायते तदुपभोगे पुष्पादिदर्शनात् । आगमस्य चौपचारिकत्वमयुक्तम्, मुख्ये बाधकानुपपत्तेरित्यलम् । अथ वालुकादिनिचयेषु प्रयत्नं विनापि वृद्धेरुपलम्भात् व्यभिचारः । न, ईश्वरप्रयत्नस्य तत्रापि सद्भावाभ्युपगमात् । तस्यापि पक्षेऽन्तर्भावाच्छरीरवत् पुरुषगुणपूर्वकत्वं साधनीयमिति ।

तथाभिमतविषयग्राहककरणसम्बन्धनिमित्तेन मनःकर्मणा गृहकोणेषु पेलकप्रेरक इव दारकः आत्माऽनुमीयत इति व्याप्तिप्रतिपादनमेव । यथाहि गृहे दारकः पेलकैः संक्रीडमानो हस्तस्थितपेलकेन मध्यस्थं पेलकमभिहत्य पेलकान्तरेण सम्बन्धयति तद्वदात्मापि शरीरे मनसा चक्षुरादिकमभिहत्य विषयैः संयोजयतीति । तथा चाभिमतश्चासौ विषयश्च रूपादिस्तद्गृह्णातीति तद्ग्राहकम् । तच्च ग्रहणं चक्षुरादि तेन सह सम्बन्धस्तन्निमित्तेन

मनःकर्मणा ज्ञायते । प्रयोगस्तु-जीवच्छरीरं प्रयत्नवदधिष्ठितम-भिमतविषयग्राहककरणाधारत्वात् गृहवत् । मनो वा प्रयत्नवत्प्रेर्यम् अभिमतविषयग्राहककरणसम्बन्धित्वात् हस्तस्थितपेलकवत् । मनःकर्म वा प्रयत्नवत्कार्यम् अभिमतविषयग्राहककरणसम्ब-न्धित्वात् हस्तस्थितपेलकवत् । मनसो वा चक्षुरादिसम्बन्धः प्रयत्नवत्कार्योऽभिमतविषयग्राहककरणसम्बन्धत्वात् पेलका-न्तरसम्बन्धिसम्बन्धवत् । चक्षुरादयो वा प्रयत्नवत्प्रेर्या अभिम-तविषयग्राहककरणत्वात् पेलकान्तरवत् । विषयसम्बन्धो वा प्रय-त्नवत्कार्योऽभिमतविषयग्राहककरणसम्बन्धिसम्बन्धत्वात् कोण-स्थितपेलकसम्बन्धवत् ।

तथा नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसविक्रि-यादर्शनात् अनेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी कश्चिद्विज्ञायत इति व्याप्तिप्रतिपादनमेव । तथाहि येन रूपादि विशिष्टरसाविनाभावित-योपलब्धं तस्य नयनविषयालोचनानन्तरमिति नयनस्य विषयो रूपम् तत्रालोचनात् विज्ञानं तदनन्तरमविनाभूते रसेऽनुस्मृतिर्भ-वति । तत्क्रमेण रसनविक्रियेति रसनानुस्मरणानन्तरं रसबुद्धिः । ततः प्रयत्ने सति मनसि क्रियाप्रबन्धाद्रसनेन्द्रियसम्बन्धस्तस्माद्र-दनान्तर्गतोदकसम्प्लवलक्षणो विकारः सम्पद्यत इत्युत्पत्तिक्रमः । ज्ञ-प्तिक्रमस्तु रसनेन्द्रियविकारान्मनःसम्बन्धस्तेनापि मनसि क्रि-याप्रबन्धोऽनुमीयते । तस्मात् प्रयत्नस्ततोपीच्छा तया च स्मरणं ततः संस्कारस्तस्माच्चानुभवः तेनानुभवेनानुभविता ज्ञायत इति । अत्र तु ममेति प्रतिसन्धानं सर्वत्रोपलब्धमित्येककर्तृकत्वं निश्चीयते । भिन्नकर्तृकेषु ममेति प्रतिसन्धानव्यावृत्तेः । नहि देवदत्तादिषूत्पन्ना स्मरणादयो यज्ञदत्तेन मम स्मरणं ममेच्छेति संवेद्यन्ते इन्द्रियाणां तु प्रतिनियतविषयत्वात् साहचर्यानुपलब्धाविन्द्रियान्तरोपलब्धेऽर्थे न स्यादिन्द्रियान्तरेण स्मरणं तदभावाद्रसनेन्द्रियस्य विकारासंभव एव स्यात् । स चोपलब्ध इत्युभयदर्शी ज्ञायते । अथ शरीरस्यैव चक्षू-रसनाधिष्ठायकत्वे रूपरसयोः साहचर्योपलब्धौ स्मरणमिति चेत् । न । तस्याप्यन्यत्वात् । तथाहि-कुवलयामलकबिल्वादीनामिव परि-माणभेदस्य शरीरे सद्भावादन्यत्वम् । न ह्यन्यपरिमाणेऽप्यवतिष्ठमाने परिमाणवति परिमाणप्रतिषेधादुत्तरपरिमाणेन शक्यं भवितु मिति

परिमाणान्यथानुपपत्त्या पूर्वपरिमाणनिवृत्तिः। सा चाश्रयविनाशादेवेत्यन्यत्वम्। न च शरीरस्य शरीरान्तरारम्भकत्वम्। एकस्यारम्भकत्वप्रतिषेधात्। कार्यकारणाविरोधेन सर्वेषामुपलम्भप्रसङ्गात्। अथावस्थाभेदमात्रं नावस्थायिनो भेद इति चेत्। तन्न। यद्यवस्था परिमाणं तच्छेदे तस्याऽप्यवश्यं भेदः। अथावयवविशेषः तद्विनाशेऽपि तदारब्धस्य विनाशात्। नापि रूपादयस्तेषामप्याश्रयविनाशेन विनाशात्। न च संयोगि समवायि वा धर्मान्तरमस्तीति। शरीरस्यान्यत्वेन स्मरणाद्यसम्भव एव। अथ बुद्धौ कारणवासनासंक्रान्तिक्रमेण स्मरणोत्पत्तौ रसनेन्द्रियविकारः सम्पद्यत इति चेत्। न क्षणिकत्वे सति स्मरणस्य पूर्वमेव प्रतिषेधात्। तस्मादेककर्तृका स्मरणेच्छादयो ममेति प्रतिसन्धीयमानत्वाद् विभिन्नकर्तृकेषु प्रतिसन्धानाभावः। एककर्तृकेषु तु नर्तकीभ्रूविक्षेपे कृतसमयानामस्ति ममेति प्रतिसन्धानम्। अथ नित्यस्यानुपकारित्वादात्मनः किमनुभवाद्यैः क्रियत इति चेत्। न किञ्चिदनुभवादेरेवोपकारित्वात्तेन हि सत्यनुभविता स्मर्तेति व्यपदेशात्। तत्कार्यं वा तस्योपकारः। तथा चानुभवेन तस्य संस्कारः क्रियते। तेन तु स्मरणमुपकारः तेनापि स्वकार्यमित्युत्तरोत्तरेऽभ्यूह्यम। न चानुभवादेराविर्भावतिरोभावाभ्यामनुभवितुस्तथाभावः, तद्व्यतिरेकात्। अथ व्यतिरेके कथमात्मनोऽनुभवादिर्नान्यस्येति चेत्। तेन सम्बन्धात्। सम्बन्धस्य तु सम्बन्धान्तरानपेक्षस्यापि सम्बन्धिनिष्ठस्योपलब्धेर्नाऽप्यनवस्थेति वक्ष्यामः। न चान्यस्यानुभवोत्पादेऽऽन्यस्याऽनुभवितेति व्यपदेशो दृष्टः। अथानुभवादेरात्मन्यतिशयाधायकत्वासंभवे व्यपदेशासम्भव इति चेत्। नास्यैवातिशयत्वात्तत्प्रागभावश्चानतिशयो निवर्तत इति। कारकसाकल्यं वातिशयस्तद्वैकल्यं चानतिशय इत्युक्तपूर्वम्। न चाव्यतिरेकेऽतिशयः संभाव्यत इत्यलमतिविस्तरेण।

तथा पूर्वोक्तैः सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते। तथाहि सुखादयः क्वचिदाश्रिताः गुणत्वाद्रूपादिवत्। अथ शरीरेन्द्रियगुणा भविष्यन्तीत्यत आह ते च सुखादयो न शरीरेन्द्रियगुणाः। कस्मादित्याह अहङ्कारेणैकवाक्यत्वाभावादिति। अहंप्रत्ययेनासमानाधिकरणत्वाद्विज्ञानवत्। ये तु शरीरेन्द्रियगुणाः तेऽहङ्कारेण समानाधिकरणा न भवन्ति रूपादय इति। अथ रूपवानहमिति प्रत्ययदर्शना-

वयुक्तमेव तत् । न मुख्ये बाधकसद्भावेनास्य गौणत्वात् । तथा चाह-मितिप्रत्ययालम्बनत्वं पूर्वमेवोक्तमिति शरीरगुणैरुपचरितमेव सामानाधिकरण्यम्, स्मरणज्ञानेन तु सामानाधिकरण्यमहं स्मरामीति दृष्टम् । न च शरीरे स्मरणं समवेतमित्युक्तम् । इतश्च न शरीरेन्द्रियगुणाः सुखादयः प्रदेशवृत्तित्वाद्विशेषगुणाश्चाश्रयव्यापकाः रूपादय इति । शरीरविशेषगुणप्रतिषेधे साध्ये न संयोगादिभिरनैकान्तस्तेषामपि च पक्षत्वात् । तथा न शरीरेन्द्रियविशेषगुणाः सुखदुःखादयो यावद्द्रव्याभावित्वाच्छब्दवत् ये तु तद्विशेषगुणास्ते यावद्द्रव्यभाविनो रूपादय इति । न च पार्थिवपरमाणुरूपादिभिर्व्यभिचारः, तेषामपि साध्याधिकरणतया सपक्षत्वात् । तथाहि शरीरेन्द्रियविशेषगुणप्रतिषेधे साध्ये तेऽपि संयोगादिवत्तद्विशेषगुणा भवन्तीति सपक्षा एव । इतोऽपि न शरीरेन्द्रियविशेषगुणाः सुखादयो बाह्येन्द्रियाप्रत्यक्षत्वात् विज्ञानवत् । ये तु तद्विशेषगुणास्ते बाह्येन्द्रियप्रत्यक्षाः रूपादय इति । गुरुत्वादीनां तु बाह्येन्द्रियप्रत्यक्षत्वेऽपि न शरीरेन्द्रियविशेषगुणत्वमिति व्यभिचाराभावः । बाह्येन्द्रियप्रतिषेधेन चान्तःकरणप्रत्यक्षत्वं विवक्षितमिति । तथ शरीरविशेषगुणाश्च प्रत्यक्षाः । न चैवं सुखादय इति । अथ त्रिगुणात्मकत्वात् सर्वं सुखदुःखादिसमन्वितमिति नात्मविशेषगुणत्वम् । न, त्रिगुणात्मकप्रतिषेधस्य वक्ष्यमाणत्वात् प्रधानप्रतिषेधावसरे । यथा च सुखदुःखादिभिर्गुणैस्तथाऽहंशब्देनात्मा ज्ञायत इति । अहंशब्दो बाह्याबाधितैकपदत्वादवश्यं वाच्यमपेक्षते । न च पृथिव्याद्येवाभिधेयं पृथिव्यादिशब्दव्यतिरेकाद्वैयधिकरण्यमिति । यदि पुनः पृथिव्यादिकमर्थमभिदध्यादहमितिशब्दस्तच्छब्देन सामानाधिकरण्यं स्यादहं पृथिव्यहमुदकमित्यादि । न चैतद्दृष्टम् । तस्मादात्मन्येवाहमितिशब्दस्य प्रवृत्तिर्युक्तेति । विषयान्तरे हि प्रवर्तमानः शब्दो नार्थान्तरमभिधत्ते इत्यबाधितैकपदम् । अथ शब्दानां वाच्यवाचकभावानुपपत्तेर्निर्विषयत्वमस्येति चेत् । न । वाच्यवाचकभावस्य वक्ष्यमाणत्वात् ।

तदेवमात्मन्यवस्थिते तस्य द्रव्यत्वसमवायिकारणत्वक्षणिकैकदेशवृत्तिविशेषगुणवत्त्वप्रतिपादनार्थं चतुर्दशगुणप्रतिज्ञा, तां दर्शयति–तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कार-

संख्यापरिमाणपृथक्त्वसंयोगविभागा इति । एते तु सूत्रकारेण प्रतिपादिता इत्याह आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धा इति । तथा धर्माधर्मावात्मान्तरगुणानामकारणवचनादित्यात्मगुणानामात्मान्तरगुणेष्वकारणत्वादिति सूत्रं दर्शयति । तथाहि— दानधर्मः प्रतिग्रहधर्मः संपद्यत इत्यनयोः पूर्वापरभावनियमात् कार्यकारणभाव इत्याशङ्कापरिहारार्थमेतत् सूत्रम् । आत्मान्तरगुणानामात्मान्तरगुणेष्वकारणत्वात् । धर्माधर्मौ चात्मगुणाविति नात्मान्तरगुणोत्पत्तौ कारणं स्यात् न ह्यात्मगुणात् सुखादात्मान्तरे सुखम् दुःखाच्च दुःखमुत्पद्यमानमुपलब्धम । अथ दुहितरि वर्तमानं सुखं जामातरि सुखसम्पादकं दृष्टमिति । अयुक्तमेतन्न तदनुभवेन तदुपपत्तेः । तथाहि दुहितरि मुखप्रसादादिकमुपलभ्य सुखमस्याः समुत्पन्नमित्यनुमानान्मन्यमानायाः स्वानुभवात् मानसं सुखमुत्पद्यते । न तत् सुखात्तद्विनाशे हि कालान्तरेणोत्पत्तेरिति । तदेवं दानधर्मस्य प्रतिग्रहधर्मोत्पत्तौ कारणत्वप्रतिषेधपरेणापि सूत्रेणात्मनि धर्माधर्मयोः सद्भावोऽभिहितः, तथा वक्ष्यामश्च तत्परीक्षायाम् । संस्कारस्मृत्युत्पत्ताविति स्मृतिर्वासनाख्यादिति सूत्रं दर्शयति । तथाहि--स्मृतिः कार्यत्वादवश्यं कारणमपेक्षते । न चानुभवः कारणम् , तद्विनाशेऽप्युत्पत्तेः । अथानुभवप्रध्वंसः कारणमन्वयव्यतिरेकवत्त्वात् । तदसत् । तस्य निरतिशयत्वात्तीव्रादिभेदभिन्नस्य स्मरणस्यानुपपत्तिप्रसङ्गात् । न हि कारणातिशयं विना कार्यस्यातिशयो युक्तः अभ्यासवैयर्थ्यं च प्रध्वंसातिशयस्य कर्तुमशक्यत्वादतः सातिशयमात्मसमवेतं किञ्चिदसाधारणं कारणमस्ति । यतस्तत्समवेता स्मृतिर्जायते । न च दृष्ट एव तस्य सकलकार्योत्पत्तौ साधारणत्वादसाधारणं त्वात्मसमवेतं सुखदुःखलक्षणं कार्यं दृष्टमिति स्मृतेरन्यदसाधारणं कारणं वाच्यम् । तथाहि स्मृतिरात्मसमवेता साधारणकारणे सत्युत्पद्यते आत्मसमवेतासाधारणकार्यत्वात्सुखवत् । तस्मादनुभवेनात्मनि संस्काराधाने सति स्मरणमुत्पद्यत इति स्थितम स्मृतिर्वासनाख्याद् भवतीति । तत्र व्यवस्थावचनात् सङ्ख्येति सुखदुःखादि व्यवस्थातो नानात्मान इति सूत्रं दर्शयति । का पुनरियं व्यवस्था ? सुखदुःखादीनां नियमः । तथा ह्येकस्य सुखमन्यस्य दुःखमन्यस्येच्छेति व्यवस्थोपलब्धा ।

ऐकात्म्ये त्वेकस्य सुखित्वे सर्वेषां सुखित्वं दुःखितायां सर्वेषु दुः- खित्वं चेत्यव्यवस्थाप्रसङ्गः नियमहेतोरभावात् । अथास्ति शरीरभेदो नियामक इति चेत । नानुसन्धानप्रसङ्गात् । यथाहि बालकौमार- यौवनावस्थाभेदेन शरीरस्य भेदेऽप्येकत्वादात्मनः प्रतिसन्धानं मम सुखमासीत् बालावस्थायामित्युपलब्धमेवं सर्वशरीरेष्वपि प्रसङ्गः । न चैतदस्ति । तस्मादेकत्वव्यापकं प्रतिसन्धानमात्मनोऽश्वमहिषा- दिशरीरेभ्यो व्यावर्तमानं स्वव्याप्तमेकत्वं गृहीत्वा व्यावर्तते इति नानात्म्यम् । तथा ह्यश्वमहिषादिशरीरेष्वात्मा धर्मी आत्मत्वे सति व्यक्तिभेदेन नानेति साध्यम् शरीरान्तरोपलब्धेऽर्थे शरीरान्तरेणा- प्रतिसन्धायकत्वाद्यत्र चैकस्तत्रास्ति प्रतिसन्धानम् । यथा बाल- कौमारयौवनशरीरेष्विति व्यतिरेकः । केवलव्यतिरेकाव्यभिचारेण हेतोर्गमकत्वम् वक्ष्यामो लैङ्गिकज्ञाने । तथैकस्मिन्नपि शरीरे मम पादे वेदना शिरसि वेदना इत्येकत्वादात्मनः प्रतिसन्धानं दृष्टम् । न च जन्मान्तरशरीरानुभूते गर्भशरीरानुभूते चास्मरणवदश्वादि- शरीरोपलब्धेप्यस्मरणं युक्तम् । गर्भशरीरानुभवस्यापटुत्वाज्जन्मा- न्तरसंस्कारस्य च मरणदुःखेनाभिभवात् । न चैवमश्वादिशरीरानु- भूतेषु स्मरणे कारणमस्ति । अथ भेदसद्भावे प्रमाणानुपपत्तेः सर्व- मेकमिति कल्प्यते । न प्रत्यक्षेणैव परस्परव्यावृत्तात्मनां पदार्थानां भेदप्रतिभासे सत्येतस्मादयं भिन्न इति सविकल्पकज्ञानोत्पत्त्यभ्यु- पगमात् नेतरेतराश्रयत्वमनवस्था वा । अनियमेन तु विशेषणवि- शेष्ययोर्विधिप्रतिषेधयोर्ग्रहणमिष्टम् । यदत्र विशेषणं तत्पूर्वं गृह्यते । विशेष्यं तु पश्चादनियमस्तु विशेषणविशेष्यभाव इति । ननु चात्र भेदो व्यावृत्तिरितरेतराभाव इत्यभ्युपगमे व्यावृत्तेर्भेदः कथं स्वयं व्या- वृत्तिरूपत्वात्तद्विपरीतास्तु व्यावृत्तिमपेक्षन्ते । अथायं भेदप्रतिभासोऽ- विद्यासमारोपित इति चेत् । नात्माव्यतिरेकेण तदसम्भवात् । व्यति- रेके त्वेकत्वनिवृत्तिः । यदि च विद्यानिवृत्तिरूपा स्यादविद्या सा कथं तुच्छस्वभावतया भेदेन व्यवहारं जनयेत् । न च बाधकानुपपत्ते- र्भेदप्रतिभासो भ्रान्तः । नापि कल्पितरूपाणां वास्तवार्थक्रियाजन- कत्वं न्याय्यम् । रज्ज्वा तु सर्पज्ञानाद्वास्तवादेव भक्षणं कार्यम(?) न कल्पितार्थादिति । न च सर्वस्यैकत्वे प्रमाणमस्तीति कथं विद्यानि- बन्धनमेकत्वज्ञानम्, यथा च प्रमाणं विना सर्वस्यैकत्वमेवं नानात्वमपि

स्यात्। प्रमाणाभावस्योभयत्राविशेषात् । अथास्येकत्वे प्रमाणमागम इति चेत्। एकत्वानिवृत्तिः प्रमाणादेर्वास्तवभेदत्वात्, अभेदे तु प्रमाणप्रमेयव्यवस्थानुपपत्तिरिति कथं स्वयं ज्योतिरेवायमात्मेति। अथामी पदार्था यदि परमात्मनो व्यतिरेकिणः कथं प्रकाशन्ते। अप्रकाशस्य प्रकाशायोगात्। अथ प्रकाशन्ते, न परमात्मव्यतिरेकिणः तस्यैव प्रकाशस्वरूपत्वादिति चेत्। नैतदेवम्। विभिन्नस्वरूपसम्बन्धिनां प्रत्यक्षादिप्रमाणैः सम्वेदनात् प्रकाशरूपता भावस्वरूपसम्बन्धित्वं बोधरूपता वा स्यात्। सा तु पदार्थेषु न सम्भवतीत्यसत्त्वेन परमात्मनोऽप्यसत्त्वप्रसङ्गः पदार्थान्तरस्वरूपस्य पदार्थान्तरे सत्त्वाविशेषात्। यदि चैक एव स्यादात्मा तस्यैकत्र विमोक्षे सर्वत्र तथा भाव इत्यप्रयाससाध्यो मोक्षः स्यात्। तथा कस्यचिदमुक्तावन्यस्याप्यमुक्तिरिति सर्वेषामनिर्मोक्षप्रसङ्गः। अथ परमात्मनो जीवात्मनां निस्सरणं संसारस्तस्मिन्नेव लयो मुक्तिरिति चेत्। तेषां तस्माद्भेदे कस्य मुक्तिः संसारो वाऽभेदे वा द्वैतहानिरिति। तथा विद्यापरिच्छिन्नात्मप्रदेशानां मुक्तिरविद्यापरिच्छिन्नात्मप्रदेशानां संसार इत्यत्राप्येतदेव दूषणमूह्यम्। परमाणवस्तु क्षित्यादेः कार्यस्योपादानकारणं कार्यपरिमाणाद्धीनपरिमाणस्य कारणस्योपलब्धेः। न च परमात्मा, तस्य व्यापकत्वात् न चामूर्तोपादानसमवेतमूर्तमुत्पाद्यमानं दृष्टमिति। यदि चानेकमणुपरिमाणं चोपादानं परमात्मेति स्यात्। सञ्ज्ञाभेदमात्रम्। परमाणवस्तु पूर्वमेव व्यवस्थापिताः। यच्चैकत्वप्रतिपादकं वाक्यम् तत्परमात्मापेक्षया व्याख्येयम्। तस्य हि कार्यानुमानेन पूर्वमेव व्यवस्थापनात्। यच्चेदम्—एक एवायमात्मा देहेदेहे व्यवस्थित इति, एकस्मिन् शरीरेऽनेकत्वप्रतिषेधार्थमेतत्। तथा ह्येकस्मिञ्छरीरेऽनेकं विज्ञानमात्मेति शाक्या मन्यन्ते। तत्प्रतिषेधार्थं प्रतिशरीरमेको नानेकः तथा नानात्वप्रतिपादमेव वाक्यमस्तीत्यलमतिजल्पितेन।

पृथक्त्वमप्यत एवेति। यत एव नानात्वमत एव नानापृथक्त्वम्। तथा चात्मवचनात्परममहत्परिमाणमिति विभवान्महानाकाशस्तथा चात्मेति सूत्रं दर्शयति। यथा विभवान्महानाकाशस्तथात्मापीति विभुत्वादेव परममहत्त्वं सिद्धम्। अथ शरीरपरमाणत्वादात्मनोऽसिद्धं परममहत्त्वं तथा चाल्पशरीरेऽल्पो महति महानात्मेति न शरीरव्यतिरेकेणात्मनोऽस्तित्वे प्रमाणमस्ति। नन्वेतस्मिन् पक्षे संकोचविका-

शधर्मकत्वात् बालशरीरेऽप्यात्मनो विनाशे वृद्धावस्थायां नानात्मा सम्पद्यत इत्यन्यत्वे स्मरणं न स्यात् । न च पूर्वपरिमाणस्या-निवृत्तावुत्तरपरिमाणेन शक्यं भवितुमिति पूर्वपरिमाणस्याश्रयवि-नाशादेव निवृत्तिः । स्वर्गादिस्थानेषु शरीरसम्बन्धानुपपत्तौ उप-भोगो न स्यात् अत इष्यत एव गमनम् । तर्हि मूर्तत्वे सति महापरिमाण-त्वात् यत उत्पत्तिस्तत्कारणं वाच्यमिति भूतचैतन्यवत्प्रतिषेधः । तथा धर्माधर्मयोरात्मगुणत्वात्तदाश्रयस्याव्यापकत्वे न स्यात् अग्नेरू-र्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोस्त्वाद्यं कर्मेति तयोः स्वाश्रय-संयोगापेक्षित्वात् । यथा प्रयत्नो हस्तकर्मण्यात्मसंयोगापेक्षस्तथा धर्माधर्मावात्मसंयोगं विना न कर्म कुर्यातामात्मगुणत्वात् । न च तत्रा-न्यत् कारणमस्तीति स्वाश्रयसंयोगापेक्षोऽदृष्ट एव कारणमतो व्या-पकत्वाच्च परममहत्त्वम् । तथा योगी खलृद्धौ प्रादुर्भूतायां सेन्द्रि-याणि शरीराणि निर्माय युगपद् भोगानुपभुङ्क्ते इति श्रूयते तच्च वि-भवात्मन्युपपद्यते नाव्यापक इति । तथा सुखादीनां सन्निकर्षजत्वा-त् संयोगः सिद्धः । सुखादयो हि कार्यत्वादसमवायिकारणमपेक्षन्ते न चान्यत्सम्भवतीत्यात्मान्तःकरणसंयोगः सिद्धः । स च कृतक-त्वादवश्यं विनाशीत्याश्रयविनाशाभावाद्विभागादेव विनश्यतीति विभागसिद्धिः ॥

इत्यात्मा ॥

(भा०)मनस्त्वाभिसम्बन्धान्मनः । सत्यप्यात्मेन्द्रि-यार्थसान्निध्ये ज्ञानसुखादीनामभूत्वो(१)त्पत्तिदर्शनात् करणान्तरमनुमीयते । श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिद-र्शनात् बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावा(२)-च्चान्तःकरणम् । तस्य गुणाः संख्यापरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वसंस्काराः । प्रयत्नज्ञानायौग-पद्यवचनात् प्रतिशरीरमेकत्वं सिद्धम् । पृथक्त्वमप्यत

(१) अत्र सूक्तिकारमतेन—अभूतत्वोत्पत्तीति पाठोऽनुसन्धेयः ।
(२) ग्राहकान्तराभावादित्यत्र जगदीशसंमतः पाठः ।

एव । तदभाववचनादणुपरिमाणम् । अपसर्पणोपसर्पण-वचनात् संयोगविभागौ । मूर्त्तत्वात् परत्वापरत्वे संस्कारश्च । अस्पर्शवत्त्वाद्द्रव्यानारम्भकत्वम् क्रियावत्वान्मूर्तत्वम् । साधारणविग्रहवत्त्वप्रसङ्गादज्ञत्वम् । करणभावात्पारार्थ्यम् । गुणवत्त्वाद्द्रव्यम् । प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति ॥ * ॥

इति प्रशस्तपादभाष्ये द्रव्यपदार्थः ॥

(मू०) मन आह मनस्त्वेति । ज्ञानजनकसंयोगहेतुक्रियाजनकतावच्छेदको मनस्त्वं नाम जातिविशेषः,स चाऽतीन्द्रियः ऐन्द्रियकावृत्तित्वात् तदभिमतसम्बन्धादित्यर्थः । मनोऽभावे मनस्त्वस्याप्यभावान्मनसि प्रमाणमाह सत्यपीति । आत्मन इन्द्रियैरिन्द्रियस्यार्थैर्विषयैः सान्निध्ये सन्निकर्षे सत्यपि ज्ञानसुखादीनामभूतत्वोत्पत्तिदर्शनात् कदाचिदभूतत्वकदाचिदुत्पन्नत्वदर्शनात् करणान्तरमनुमीयत इत्यर्थः। तच्च करणं मन इत्यर्थः । अयमर्थः। आत्मेन्द्रियार्थसान्निध्ये कारणे सत्यपि ज्ञानसुखादीनामभूतत्वं कारणान्तरविरहादेव, अनन्तरं तेषामुत्पत्तिश्च कारणान्तरप्राप्त्या इत्यतस्तत्कारणमन्यासम्भवात् मन एव कल्प्यत इत्यर्थः । अन्यासम्भवस्तु अन्यस्मिन् समस्ते सत्यपि तदनुत्पत्तिदर्शनात् बोध्यः ।

मनःसाधकं हेत्वन्तरमाह श्रोत्रादीति । ननु स्मृतिरिन्द्रियेणैव जन्यत इत्यत आह श्रोत्रादीति । श्रोत्रादीन्द्रियाणामव्यापारे सत्यपीत्यर्थः । न च स्मृतिः संस्कारेणैव जन्यतां किं मनसेति वाच्यम् । स्मृतेः कादाचित्कत्वानुपपत्तेः । संस्कारस्य तत्पूर्वमपि सत्त्वात् व्याम्रियमाणं मनःसहकारित्वं यदा समासाद-

यति तदा संस्कारः स्मृतिं जनयति नान्यदेत्यविरोधः ।

मनःसाधकं हेत्वन्तरमाह बाह्येति । ग्राहकान्तराभावादिति । अनेनेन्द्रियविशेषग्राह्यत्वमनुमेयमिति दर्शितम् । तथाच सुखादिकमिन्द्रियग्राह्यं बाह्येन्द्रियाग्राह्यत्वे सति ग्राह्यत्वादितीन्द्रियविशेषो मनः सिद्ध्यतीत्यर्थः ।

तस्य गुणनाह तस्य गुणा इति । परत्वापरत्वे दैशिके । संस्कारो वेगाख्यः । तत्र संख्यां साधयति प्रयत्नज्ञानेति । प्रयत्नानां ज्ञानानाञ्च युगपदुत्पत्त्यभावात्प्रतिशरीरमेकत्वमेकैकत्वमित्यर्थः । प्रतिशरीरमनेकत्वे अनेकैर्मनोभिर्युगपदनेकप्रयत्ना अनेकानि ज्ञानानि चोत्पद्येरन् इत्यर्थः । प्रयत्नोऽत्र ज्ञानजनकसंयोगहेतुमनक्रियाजनकः, ज्ञानायौगपद्यादेव तदयौगपद्यमुन्नेयम् ।

पृथक्त्वमत एवेति । अनेकत्वादेवेत्यर्थः । तस्याणुपरिमाणे सूत्रकारसम्मतिमाह तदभावेति । तदभावादणु मन इति सूत्रे तत्पदेन वैभवं परामृष्टं, वैभवाभावादणु इत्यर्थः । वैभवाभाव एव मनसः कुत इति चेद्, युगपज्ज्ञानाभावात् । वैभवे सति एकदा सकलेन्द्रियसंनिकर्षे युगपदनेकानि ज्ञानादीनि स्युः। न चैवं वैभवाभावादपरमहत्त्वमेवास्तु, अणुत्वं कुतः? अपरमहत्त्वेऽपि वैभवाभावोपपत्तेरिति वाच्यम् । अपरमहत्त्वेऽपि ज्ञानयौगपद्यापत्तेर्दुर्वारत्वात् ।

संयोगविभागसिद्धौ सूत्रकारसम्मतिमाह अपसर्पणेति । अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चादृष्टकारितानीति सूत्रवचने चापसर्पणं पूर्वशरीरसंयोगनाशकविभागहेतुमनःकर्म, उपसर्पणमुत्तरशरीरसंयोगहेतुमनःक्रिया ततः संयोगविभागौ सिद्धावित्यर्थः ।

मूर्तत्वादिति । मनः परत्वापरत्ववत् वेगाख्यसंस्कारवच्च मूर्तत्वाद्धटवत् इत्यनुमानेन मनसि परत्वापरत्वसंस्काराः सिद्धा इत्यर्थः ।

तस्य मूर्तत्वं साधयति अस्पर्शत्वादिति । द्रव्यारम्भिका क्रिया स्पर्शवतामेव मनसस्त्वस्पर्शत्वाद्द्रव्यानारम्भिकैव क्रिया तद्वत्त्वान्मूर्तत्वमित्यर्थः । यद्यपि क्रियावत्त्वादेव मूर्तत्वं सिध्यति, तथापि द्रव्यारम्भिका क्रिया मनसि नास्तीत्येतत्प्रदर्शनार्थमेव द्रव्यानारम्भिकेति क्रिया विशेषणम् । अस्पर्शत्वाद्द्रव्यानारम्भिका क्रियाऽतो मूर्तत्वमित्यर्थः ।

ननु मनसो ज्ञानकरणत्ववत् ज्ञातृत्वमपि स्यादविरोधादित्यत आह साधारणेति । मनोऽज्ञम्—अज्ञातृ । तत्र हेतुमाह साधारणेति । विग्रहः शरीरं तद्वत्त्वं तदधिष्ठितत्वं शरीरस्य आत्मसाधारण्येन मनोऽधिष्ठितत्वप्रसङ्गादित्यर्थः । शरीरमात्मना मनसा च ज्ञात्रा अधिष्ठितं स्यादिति क्रियावत् । न च तथात्वे किमनिष्टमिति वाच्यम् । चैत्रात्मनः पराधिष्ठिते शरीरे स्वेच्छया प्रवृत्तिनिवृत्त्यधीनक्रियाजननियमो न स्यात् । न हि मैत्रात्माधिष्ठिते शरीरे चैत्रात्मना प्रवृत्तिनिवृत्तिजन्याक्रिया जन्यते । यदि च पराधिष्ठितत्वेऽपि स्वाधिष्ठिते प्रवृत्तिनिवृत्त्यधीनक्रिया जन्यत इत्युच्यते, तदा तयोरेकेन प्रवृत्तौ अन्येन निवृत्तौ इच्छया निरोधेन द्वयमपि न स्यात् । इत्थं मनसो न ज्ञातृत्वम् , किन्तु ज्ञानकरणत्वमेव । तथा च परनिष्ठज्ञानजनकत्वेन परार्थमेवेत्याह करणभावादिति । करणत्वमात्रादित्यर्थः ।

संख्याद्यष्टगुणास्तत्र साधिता अत एव तस्य द्रव्यत्वमित्याह गुणवत्त्वादिति । तस्याशुसञ्चारित्वे हेतुमाह प्रयत्नेति । क्वचिदात्मनः प्रयत्नेन क्वचिददृष्टेन परिगृहीतत्वाच्च आलिङ्गितत्वाच्च आशुसञ्चारितेत्यर्थः ।

इति महामहोपाध्याय श्रीजगदीशभट्टाचार्यतर्कालङ्कारकृता द्रव्यभाष्यसूक्तिः समाप्ता ।

(से०) आत्मनिरूपणानन्तरं क्रमागतं मनो निरूपयति मन-स्त्वेति । मनस्त्वञ्च जातिः संख्यादीनामतिप्रसक्तत्वात् । न चान्तरि-न्द्रियत्वं तदिन्द्रियत्वे मनोनिवेशात् । न चात्मभिन्नत्वे सति ज्ञानास-मवायिकारणसंयोगाश्रयत्वम, मनःसंयोगत्वेनासमवायिकारणतायां मनस्त्वेऽसमवायिकारणत्वस्य प्रवेशेनाऽऽत्माश्रयापत्तेः । निस्पर्शा-णुत्वं विशेषगुणशून्याणुत्वं वा मनस्त्वमिति च जातौ बाधकाभा-वादात्ममनःसंयोगत्वेन कारणतायां गौरवात् । मनस्त्वेन मानससा-क्षात्कारग्राहतायामपि तथा तत् । शद्वेतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमित्यत्र स्मृत्यजनककारणताया मनःसंयोगाश्रयत्वमित्यत्र च मनस्त्वस्यैतावत्वे वैयर्थ्याञ्च मनस्प-दपदे उत्पदाभिषेकेनैव(?) साम्राज्यात । न हि गुरूपदिष्टवर्त्मना निखि-लयोः कणभक्षाक्षचरणपक्षग्रामयोः मनश्चारयन्तोऽपि क्वचिदेवाऽ-तिव्याप्तिमालोचयाम इति संक्षेपः । ननु मनस्येव न प्रमाणमत आह सत्यपीति । ज्ञानादयः कादाचित्काः कादाचित्कत्वञ्चाभूत्वा भावित्वम् । अभवनं च कारणविलंबप्रयुक्तम् । नचाऽऽत्मादीनां बिलंबो, नापि आत्मेन्द्रिययोरिन्द्रियविषययोः सान्निध्यस्य आत्मे-न्द्रियसन्निधेर्ज्ञानाद्यहेतुत्वात् इन्द्रियविषयसन्निधेः सुखाद्यहे-तुत्वात् अनयोः सत्त्वेऽपि ज्ञानादिविलम्बाच्च । नाप्यदृष्टवि-लम्बो दृष्टसाकल्ये कार्यविलंबावलम्बनमुत्पन्नेऽपि अन्त्यतन्तुसं-योगे पटानुदयप्रसङ्गात् । तस्मान्मनोविलम्बादेव ज्ञानादिविलम्ब इति मनः प्रामाणिकमित्यर्थः। ननु परमाणुक्रियायामपि द्रव्यारम्भकः संयोगः प्रलये न जायते, तत्र सृष्ट्यनुकूलादृष्टविलम्बादेव विलम्ब इति चेत् । संहारानुकूलादृष्टप्रतिबन्धेनैव तत्र तदनुत्पत्तेः । प्रमा-णान्तरमाह श्रोत्राद्यव्यापारे चेति । स्मृतिरिन्द्रियजन्या जन्यज्ञान-त्वाच्चाक्षुषज्ञानवत् । न च चक्षुरादिना सिद्धसाधनं, चक्षु-राद्यव्यापारे जायमानत्वात् । न च तद्व्यापारोपरमः संभावितो, रूपादिविषयासान्निध्ये तदुपरमस्यानुपरमात् । न हि रूपा-द्यग्राहि चाक्षुषादिज्ञानं सम्भवति । न चानुमित्यादौ व्यभि-चारः, पक्षसमत्वात् । न चानुमित्याद्येकमिति न पक्षीकृतमिति वाच्यम् । लिङ्गज्ञानादित एव तत्संभवेनाप्रयोजकत्वशङ्काप्रसरात् । ननु स्मृतिरपि संस्कारग्राहकात् पूर्वानुभवादेव भविष्यतीत्यत

आह बाह्येति। सुखादिज्ञानं नानुमित्यादि लिङ्गादिज्ञानं विना जायमानत्वात्, न स्मृतिः संस्कारानिरपेक्षत्वादिति साक्षात्त्वसिद्धौ चक्षुरादीनां तद्ग्राहकत्वेऽन्धादिभिः अग्रहापत्त्या बाह्येन्द्रियग्राह्यत्व आत्मगुणत्वानापत्त्या चेन्द्रियान्तरं मनः सिध्यतीत्यर्थः। ज्ञानाद्यस-मवायिकारणसंयोगाधारतया च मनःसिद्धिः। न च शरीरात्मसं-योगः त्वगात्मसंयोगो वा तथा, सर्वशरीरव्यापकसुखाद्यनुपपत्तेः। नं च यावद्दूरं चन्दनादिसम्बन्धः तावद्दूरं सुखादि जायते इति वाच्यम्। विभुविशेषगुणस्यासमवायिकारणव्यापकत्वनियमादिति भावः।

गुणानाह तस्येति। परत्वापरत्वे दिक्कृते संस्कारस्तु वेगाख्य इ-त्यर्थः। अजन्यतया कालकृतस्याभावात्। भावनास्थितिस्थापक-योश्च तत्राभावाद् भावनाया ज्ञानसमानाधिकरणत्वात्। धनुरादि-वत् संकोचविकाशयोरभावेन स्थितिस्थापकाभावादिति भावः। तत्र मनसः पृथिव्यादिवत् नानात्वमित्याह प्रयत्नेति। प्रतिशरीरं मनसो भिन्नभिन्नतया नानात्वं सिद्ध्यति। तच्च प्रयत्नज्ञानयोरयौ-गपद्यात् नानाशरीरेषु युगपज्ज्ञानादीनि जायन्ते। तच्चाणु मनः सकल-शरीरेष्वेकत्वे न संभवति क्रमाधिष्ठानादित्यर्थः। आङा च यौगपद्य-स्य प्रामाणिकत्वं द्योत्यते प्रकृते तस्यैवार्थस्योपयोगात्। अर्थान्तरा-स्या(?)द्युपसर्गद्योत्यत्वादिति भावः। यद्वा प्रयत्नज्ञानयोरयौगप-द्यात् प्रतिशरीरमेकत्वं न त्वनेकत्वमेवेति भाष्याशयः। सूत्रे प्रयत्न-ज्ञानयोरयौगपद्यमुक्तं तेन प्रतिशरीरं परमेकत्वं सिद्ध्यति न त्वनेक-त्वमेवेत्यभिप्रायः। किरणावल्यां तु प्रतिशरीरं नाना मनांसि न स-न्तीति परतया भाष्यं व्याख्यातम्, तदेकदेशिदर्शनेन प्रतिशरीरमेक-मनेकं वेति विचारस्य सांप्रतमप्रस्तुतत्वात् आत्मादिन्यायेन प्रस्तु-तत्वादिति दिक्।

संख्याव्यापकत्वात्तदनुरूपपृथक्त्वमपि सिद्ध्यतीत्याह पृथक्त्व-मिति। तदिति सूत्रे मनसो वैभवाभावो भावितः तेनाणुत्वं सिद्ध्य-तीत्यर्थः। यद्यपि वैभवाभावेऽणुता स्तंभकुम्भप्रभृतौ व्यभिचरति, त-थापि मध्यमपरिमाणवत्तायां शून्यतायामापतन्त्यां निस्पर्शत्वव्यापको-पेण्णुतद्भावा(?) वैभवाभावयोरणुपरिमाण एव विश्राम इति भावः।

ननु भवतु मनसो नाभसो न्यायः तथा चैकत्वं विभुत्वं च नभसः कर्णशष्कुल्यवच्छिन्नस्य शरीरावच्छिन्नस्येन्द्रियत्वम्। किञ्च

मनो विभु स्पर्शशून्यद्रव्यत्वादात्मवत्, नित्येन्द्रियत्वात् श्रोत्रवत्, सति चैकत्वे लाघवमपि, अन्यथा मनसोऽपि नानात्वं दुर्निवारम्। एकेनैव तेनोपपत्तौ न नानात्वमिति। न च मनसः शरीरव्यापकस्येन्द्रियत्वे युगपत्सर्वेन्द्रियसन्निकर्षे दीर्घशष्कुलीं भक्षयतो युगपत्पञ्च ज्ञानानि स्युरिति वाच्यम्। एकं करणमेकदैकमेव ज्ञानं जनयतीति कारणस्वभावात्। न च पञ्चज्ञानानि मा भवन्तु पञ्चानां ज्ञानं तु समूहालम्बनवत् किं न स्यात् इति वाच्यम्। जातिसाङ्कर्यभयेन तादृशो ज्ञानस्याभावादसतश्च शिल्पिसहस्रेणापि निष्पादयितुमशक्यत्वात्। न च पञ्चज्ञानसामग्रीप्रथमोत्पत्तौ तेषां कलहं कस्समादध्यादिति वाच्यम्। रसनाग्रवर्तिनि रसालरसे रसनत्वचोर्मनःसम्बन्धस्य रसस्पर्शसम्बन्धस्य च सत्वेन द्वयोः कलहे मध्यस्थस्य पञ्चानां कलहेऽपि तत्वात्। न च व्यासङ्गान्यथानुपपत्त्या कल्प्यमानामन्तःकरणे व्यापकतां परिहृत्याणुतायामेव स्थेमानमासादयति यौगपद्यप्रत्ययस्तु भ्रमः तथा च धर्मिग्राहकमानबाध इति वाच्यम्। सुखसाक्षात्कारणत्वेन मनःसिद्धौ विभुताणुतौदासीन्यात्। अपि च यथा विरुद्धतरसामग्रीसत्वे न चित्रो रसो नापि रसद्वयमुत्पद्यते गुणविरोधात् तथा प्रकृतेऽपि न पञ्च ज्ञानानि न वा पञ्चानां ज्ञानमुत्पद्यते इति वाच्यम्। न च शरीरावच्छेदेन मनःसंयोगस्य सुखाद्यसमवायिकारणत्वे सर्वेषां सुखादीनां शरीरव्यापकता स्यादिति वाच्यम्। निमित्तचन्दनादिसंयोगेन तस्य नियमनात् अत एव नियामकाभावे मनोरथिकादिसुखे ज्ञानेच्छाद्वेषेषु च प्रादेशिकत्वमिति निमित्तसंयोगस्यानियामकत्वे भवतोऽणुमात्रदेशतापत्तेः। ननु विभुविशेषगुणेषु निमित्तसंयोगो विकाशको भवतु न संकोचकः, विभुविशेषगुणानामसमवायिकारणत्वनियमादिति चेन्न। तथानियमेऽनुकूलतर्काभावात्। न च नानावच्छेदेन निमित्तसम्बन्धे युगपत्सुखादि जायेतेति वाच्यम्। इष्टापत्तेः। अत एव शिरश्चरणावच्छिन्नयोरातपजलसम्बन्धयोः सतां युगपत्सुखदुःखे उत्पद्येते यौगपद्यानुभवस्य बाधकं विना प्रमात्वात्। न च विभुकार्यासमवायिकरणानि स्वावच्छिन्ने तज्जनकानीति कथं न शरीरावच्छिन्ने सुखाद्युत्पत्तिरिति वाच्यम्। स्वावच्छिन्न एव जनयन्तीऽति नियमे स्वानवच्छिन्ने न जनयन्तीत्यायाति स्वावच्छिन्ने सर्वत्र जनयन्तीत्यत्र तु न किञ्चित् प्रसञ्जकं पश्यामः। मनोऽणुत्वपक्षेऽणुमा-

प्रदेशतापत्तिश्च। स्वावच्छिन्ने जनयन्त्येवेति पक्षे मनोऽणुत्वपक्षे स्वानवच्छिन्ने जनकत्वे किं बाधकम्? स्वावच्छिन्ने जनयन्त्येतावन्मात्रविवक्षायामप्येतदेव दूषणम्। ननु विभुमनःसंयोगस्यासमवायिकारणत्वे व्यापकसुखाविलम्बो न तावत् समवायिकारणविलम्बात् समवायिकारणस्यात्मनो व्यापकत्वादसमवायिकारणस्यापि व्यापकत्वे किं विलम्बात् विलम्बः स्यादिति चेन्न। निमित्तचन्दनादिसंयोगविलम्बात् कारणत्वाविशेषेण निमित्तकारणविलम्बेनापि विलम्बात्। ननु विभुविशेषगुणं प्रति यद्यपि मूर्तसंयोग एव समवायिकारणमिति न नियमः शब्दजविभागजयोः शब्दयोर्व्यभिचारात्तथापि संयोगासमवायिकारणके द्रव्यादिसाधारणे तथा नियमः संयोगजशब्दनोदनाजन्यकर्मादिषु तथा दर्शनादिति मनो मूर्तमेवेति चेत्। सहचारदर्शनमात्रेण व्याप्तौ अतिव्याप्तिः। अपि च मनसोऽणुत्वेऽणुमनःसंयोगविलम्बात् तदनवच्छेदेन विलम्बापत्तिः चन्दनसम्बन्धविलम्बेन तदनवच्छेदेन सुखानुत्पत्तिदर्शनादुभयोः कारणत्वाविशेषात्। विभुतायां तु सर्वत्रानुत्पत्तौ निमित्तसंयोगविलम्ब एव प्रयोजकः। किञ्च मनसोऽणुत्वे द्व्यणुकसमवायिकारणतावच्छेदके स्पर्शवत्परमाणुत्वं स्यात्, अन्यथा तु परमाणुत्वमात्रमिति लाघवमिति चेत्।

अत्राहुः। मनसो विभुत्वे ज्ञानसुखाद्यसमवायिकारणमात्ममनःसंयोगो न स्यात् अन्यतरकर्मोभयकर्मकारणाकारणसंयोगानां कारणानामभावात्। न च नित्य एव संयोगः प्रमाणाभावात् विभागस्यापि तथात्वापत्तेश्च। न च शरीरात्मसंयोग एवासमवायिकारणं मनस्तु यदि सुखादिकारणं तदा कालवदात्मसंयुक्तमेव तथेति वाच्यम्। मनसः सुखादिग्राहकेन्द्रियत्वेन सन्निकर्षघटकतया संयोगकल्पनात्। सिद्धे च मूर्तत्वे निरुक्तनयेनाणुतायामेव पर्यवसानात्। एवं च द्व्यणुककारणतावच्छेदके स्पर्शवत्पदप्रक्षेपे गौरवमपि प्रामाणिकमेव पञ्चज्ञानानुत्पादकतायाम्। एवं सति मनोविलम्बस्यैव प्रयोजकत्वे कारणस्वभावकल्पनावैयर्थ्यं च। मनसोऽणुत्वे प्रामाणिके मनःसंयोगः स्वावच्छेदेनैव जनयेदिति तु वक्तुमशक्यमेव निमित्तावच्छेदेन सुखाद्युपलम्भात्। एवं च बुभुत्सावशादेव व्यासङ्गो विभुतैव चास्त्वित्यप्यपास्तम्। अबुभुत्सितेऽपि व्यासङ्गदर्शनात् क्वचित् बुभुत्सायाः एकेन्द्रियादाकृष्येन्द्रियान्तरे मनो-

निवेशकत्वं तदपि मूर्तत्वे एव भवति । न च बुभुत्सा ज्ञानकारणमेव भवत्विति वाच्यम् । मनःसन्निकर्षघटकत्वेनैवोपपत्तौ कारणान्तरकल्पने मानाभावात् । मनस एकत्वे जात्यभावे मनस्त्वनिर्वचनानुपपत्तिः । न च संख्यादिषु तद्गुणेष्वेकं तत्रैषां साधारणत्वात् । नाप्यणुद्रव्यातिरिक्तत्वस्यैवं धर्मिनिर्णयापेक्षत्वात् । नापि दिक्कालभिन्नत्वे सति विशेषगुणशून्यत्वमिह सिद्धं पूर्वोक्तदोषात् । न च परत्वापरत्वान्यतरेण दिक्कालभेदेऽवधारिते विशेषगुणशून्यत्वे च प्रमाणान्तरादाकालिके ते निराबाध्य प्रकृतक्षणावगतिरिति वाच्यम् । वैभवानुमन्तुर्मनसि तदभावात् । नापि तत्कार्ये संस्कारः क्षमते तस्यापि वेगाख्यस्य विभुनि निराकरणात् । नाप्यात्मभिन्नत्वे सति ज्ञानासमवायिकारणसंयोगाधारत्वमात्मनः संयोगत्वेनासमवायिकारणतायामात्माश्रयात् । अत एव सुखाद्यनाश्रयत्वगर्भमपि तद्भर्कभावितमिव । नापि सुखसाक्षात्कारासाधारणकारणत्वं सन्निकर्षवारणाय व्यापारत्वे सति वा तत्त्वं मनस्त्वमिति निर्वाच्यम् । मनइन्द्रियत्वेन सुखसाक्षात्कारकारणत्वे आत्माश्रयतादुर्वारतापत्तेः । तस्मान्मनस्त्वं जातिरिति तदनुरोधेनानेकमनःसिद्धौ निरुक्तलाघवावलम्बनभङ्गे मनसोऽणुतायामेव निष्ठेत्याहुः । तदसुन्दरम् । मनसो विभुत्वपक्षे परत्वासमवायिकारणसंयोगानाधारत्वे सति विशेषगुणशून्यत्वादेर्मनस्त्वस्य वक्तुं शक्यत्वात् ।

परे तु मनसोऽणुत्वपक्षे मनस्त्वेनैवेन्द्रियत्वमायाति विभुतायां तु नभस इव सोपाधेरिति गौरवमिति निवेदयन्ति । तदप्यचारु । मनस्त्वेनैवेन्द्रियत्वात् तस्य च शरीरावच्छेदेन वृत्तिलाभात्, अत एव व्यापकस्य मनसः यत्र यत्र शरीरावच्छेद उत्पद्यते तत्र तत्र ज्ञानादिजनकत्वं नभस इव कर्णशष्कुल्यवच्छेदोत्पत्तौ यदवच्छेदेनाधिवांधवन्नभःकर्णशकुल्यावच्छिद्यते तदवच्छेदेन कस्यचित्पुण्यपरिपाकेन प्रवातस्याधिकारीति सम्भाव्यते (?)।

इतरे तु मनसोऽणुत्वे यददृष्टाकृष्टं यन्मनः तस्य स्वरूपादि गृह्णातीति घटते एकतायां तु तदसम्भवात् सर्वस्य ग्राहकं मनः स्यात् एकस्यैव सर्वमनस्त्वादिति परिशीलयन्ति ।

तदपि चतुराचतुरस्रम् । तददृष्टसहकृतं तत्स्वरूपादि गृह्णातीति क्षणसम्भवात्(?) तस्मादत्राहुरित्याद्युक्त्यैव मनसो मूर्तत्वसिद्धिरि·

ति। ननु मनसो मूर्तत्वे द्रव्यारम्भकत्वापत्तिः मूर्तत्वेनैव सामान्यतो द्रव्यारम्भकत्वात् स्पर्शवत्त्वस्य विशेषत्वादिति चेत्। न। मूर्तत्वस्यावच्छिन्नपरिमाणवत्त्वरूपतया तदपेक्षया स्पर्शवत्त्वस्य लघुत्वात्। अत एव परमाणुत्वमपि नारम्भकतावच्छेदकं गौरवात्। ननु स्पर्शवत्त्वेन नारम्भकताऽन्त्यावयविनि तदापत्तेः, किन्तु स्पर्शवत्परमाणुत्वेन तथा च परमाणुत्वमेव लघिवति चेन्न। मनसः पूर्वोक्तेन नयेन परमाणुत्वसिद्ध्या तदारम्भकार्यानुपलब्ध्या गुरोरपि स्पर्शवत्परमाणुत्वस्यावच्छेदकत्वात् द्रव्यारम्भो हि शरीरेन्द्रियविषयभावेन तन्न मनसारब्धशरीरं लोकवेदयोर्मानसशरीराप्रसिद्धेः। अत एव नेन्द्रियविषयावपि तस्मात् प्रतिशरीरमेकमखण्डं च मन इति सिद्धमिति मनीषिणः।

परे तु प्रतिशरीरमणुमनसः पञ्चकं सर्वेषामेकेन्द्रियसम्बन्धे व्यासङ्गः सर्वेन्द्रियसम्बन्धे तु युगपज्ज्ञानानीति वदन्ति। तन्न। दीर्घशष्कुलीभक्षणादौ यौगपद्यप्रत्ययस्य मनस आशुसञ्चरितत्वेन क्रमस्यालक्ष्यतया भ्रान्तत्वेनैवोपपत्तौ मनःपञ्चककल्पनायां गौरवात्। ईदृशि स्थले युक्त्यैव बाधात् यौक्तिकबाधस्यापि बाधात्। अन्यथा नीलं तमः इति बाधस्य भ्रान्तत्वापत्तेः।

शरीरसमानपरिमाणं मन इत्येके। सङ्कोचविकाशशालि अवयविमनःसङ्कोचदशायां व्यासङ्गो विकाशदशायां यौगपद्यम्। तौ चादृष्टवशात् उद्भूतसाधनावित्यपरे। तदपि न गौरवग्रासादेवेति। बुभुत्सायां च सङ्कोचकत्वे जागराद्यज्ञानमेकविषयकं न स्यात् तदानीं बुभुत्सायाः सङ्कोचिकाया अभावात्। पूर्वमेकबुभुत्सायां सङ्कुचितात्मनस एकविषयकाज्जागराद्यज्ञानमिति चेत्। सुषुप्तिपूर्वकालमेकबुभुत्साया आवश्यकत्वाभावात्।

अन्ये तु मनसो वैभवे जागरस्वप्नसुषुप्तयो न स्युः जागरस्वप्नयोर्नाडीविशेषसम्बन्धस्य प्रयोजकत्वात् सुषुप्तौ सकलशरीरासम्बन्धस्य प्रयोजकत्वात्, अत एव यदा मनस्त्वचमपि परिहृत्य पुरीतति वर्तते तदा सुषुप्तिरिति प्रामाणिकानां प्रवादः। तन्न मनसो वैभवे सुषुप्तिर्न स्यादेव त्रैलोक्यसम्बन्धस्य शरीरासम्बन्धस्यासम्भावितत्वात् जागरस्वप्नौ तु सर्वदोभयनाडीसम्बन्धे सर्वदा स्याताम्। ननु अदृष्टविशेषादेव जागरस्वप्नसुषुप्तयः सृष्टिसंहा-

राविव तस्य जगत्कारणस्य तेष्वावश्यकत्वात् कार्यवैचित्र्येण तद्वैचित्र्यस्यापि प्रामाणिकत्वादिति चेन्न । अदृष्टयौगपद्येन तृतीययौगपद्यप्रसङ्गात् । यदा यत्सहकारि समवहितं भवति तदा तदा तत्सूते इति चेत् । सहकारिणो मनःसम्बन्धासम्बन्धरूपस्यैव विवक्षितविवेकबललभ्यत्वात् । तस्मात् जागरादिनिर्वाहकतया मनोऽणुत्वमित्याहुः ।

ननु मनसोऽणुत्वे बहुभिः युगपदुच्चार्यमाणेषु नानावर्णेषु कथं बुभुत्सितस्यैव ग्रहणम् ? बुभुत्सैवेतरग्रहप्रतिबन्धिकेति चेत् । घटबुभुत्सायां लोचनोन्मीलने घटाग्रहप्रसङ्गात् । श्रोत्रमनःसंयोगे कश्चिद् विशेषो बुभुत्साप्रयोज्यो बुभुत्सितग्रहप्रतिबन्धकास्तिष्ठतीति चेत् । न । संयोगेऽपि तथात्वापत्तेः । भिन्नभिन्नावच्छेदेन श्रवसि नानावर्णा उत्पद्यन्ते तथाच बुभुत्साया बुभुत्सितशब्दावच्छेदेन मनो योज्यते इति स एव गृह्यते इति चेत् । भिन्नावच्छेदेन शब्दोत्पत्तौ मानाभावात्, तथानियम एकावच्छेदेन नानाशब्दानुत्पत्तौ कोलाहलप्रत्ययो न स्यात् नानावच्छेदनाऽणुमनसो युगपत् सम्बन्धाभावात् । यत्तु बुभुत्सितस्यानुपेक्षाज्ञानमन्येषामुपेक्षाज्ञानमिति । तन्न । इतो न शब्दान्तरमश्रौषमिति प्रत्ययादिति चेत् । ईदृशि स्थले यदि शब्दान्तरग्रहो न भवति तदा बुभुत्सैव इतरग्रहप्रतिबन्धिका तद्ग्रहहेतुश्च । यदि च कोलाहलत्वेनेतरे परिच्छिद्यन्ते तदा तद्गतकत्वादिग्रहे सापि प्रतिबन्धकेति । नानाशब्दग्रहे श्रोत्रस्य कोलाहलत्वेनैव सामर्थ्यं तत्स्थले एकस्य विशिष्य ग्रहे तु बुभुत्सा शरणमिति तुच्छम् । एकगीयमानापेक्षया नानागीयमाने विष्णुयशसि सुखोत्कर्षोदयात् तत्र दृष्टहेतोर्नानागीयमानग्रहस्यैव तन्त्रत्वात्, तस्मात् सामर्थ्येऽपि विशिष्य वा स्वरूपेण वा बुभुत्साप्रतिबन्धादेव न ग्रहः । एकदा नानाबुभुत्सा तु न विशेषपरिचायिका तथानुपलब्धेः । नन्वेवं दीर्घशष्कुलीभक्षणादौ कथं रूपरसगन्धस्पर्शशब्दान् प्रत्येमीति अनुव्यवसायः ज्ञानानां युगपदनवस्थितत्या मनःसन्निकर्षासम्भवेन समूहालम्बनासम्भवादिति चेन्न । क्रमिकानुव्यवसायेष्वेव एकत्वारोपात् क्रमिकानुव्यवसायाहितसंस्कारप्रभवसमूहालम्बनस्मृतावनुभवत्वारोपाद्वा तथा प्रत्ययोपपत्तेः । ननु सुखादौ म(

त्वसमवायिकारणानुरोधो निमित्तचन्दनाद्यनुरोधनिरीक्षणात् प्रयत्ने तु अनुरोध्यान्तरवन्ध्ये स स्यादेव, तथा चाऽणुमनःप्रदेशात् प्रयत्नात् कथं कदाचिच्छरीरावच्छेदेन क्रिया कदाचिदेकावयवावच्छेदेन कदाचिन्नृत्यादिस्थले नानावयवावच्छेदेन क्रिया, अन्यथा यावत् क्रिया तावदेकत्र नृत्यविशेषदर्शनाभावे सुखविशेषानुदयप्रसङ्गो युगपत् क्रमिकक्रियाणामनवस्थितत्या सन्निकर्षाभावेन प्रत्यक्षासम्भवादिति चेन्न। तत्र चन्दनादिसम्बन्धस्येवात्र चिकीर्षाया नियामकत्वात् तथा च यत्क्रियायामिच्छाऽणुमात्रदेशादपि प्रयत्नात् तत्र क्रियोत्पत्तिः प्रयत्नोत्पत्तावेव वा चिकीर्षा, तथा च यत्क्रियायाश्चिकीर्षा तदवच्छेदेनैव प्रयत्नो जायते नैकावयवावच्छेदेन क्रियेच्छा(?) त्वनेके प्रयत्ना युगपदुत्पाद्यन्ते अनन्यगत्या तथैव कल्पनादिति। ननु मनसोऽणुत्वेऽपि युगपद्रसनत्वचोः सम्बन्धविषययोः सम्बन्धे केन प्राथमिकं ज्ञानमिति चेन्न। यस्मिन् विषयसम्बन्धावच्छेदेन मनःसम्बन्धः तेन ज्ञानजननात् उभयोस्तथा सम्बन्धे तु नैकमपि ज्ञानं परस्परप्रतिबन्धात् अनन्यगत्याऽस्यार्थस्य कल्पनात्। समूहालम्बनस्थले तु एकेन्द्रियजन्यतया न परस्परप्रतिबन्धः। न च पञ्चावधानानां ज्ञाने का गतिः तत्रापि कल्पनात् बुभुत्सावशात् युगपद्विषयसम्बन्धेन्द्रिययोर्मनःसम्बन्धे शब्दस्थल एव व्यवस्थेति केचित्। अदृष्टवशादित्यपरे। तस्मान्मनोऽण्वेव, बुभुत्सा तु तीव्रविषयसम्बन्ध इव मनःसंयोगजनिका न तु साक्षाद्व्यासङ्गोपपादिका तस्या एकज्ञानजनकत्वापरप्रतिबन्धत्वकल्पने गौरवादिति। ननु मनसोऽणुत्वे द्वित्रिच्छिन्नासु गृहगोधासु कथं प्रतिशकलश्चेष्टा मनस एकत्र क्वापि स स्यादिति चेत्। खड्गाभिघातजकर्मवेगादेव तदुपपत्तेरित्येके। तन्न चेष्टात्वस्याकोपात् प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियाया एव चेष्टात्वादवच्छेदकदशायाम् सर्वावच्छेदेनोत्पन्नात्प्रयत्नादेव चेष्टा मनोऽन्तराद्वा तदुत्पत्तिरित्याचार्याः इति सङ्क्षेपः।

अपसर्पणेति। अपसर्पणमुपसर्पणं पूर्वशरीरविभागोत्तरशरीरप्राप्तिहेतुर्मनःकर्म तत्प्रतिपादकात् सूत्रात शब्दत एव संयोगविभागौ सिद्धौ कर्मबलात् अपि च सिध्यतः कर्मणस्तदजनकत्वे स्वरूपव्याघातादित्यर्थः। परत्वापरत्वसंस्कारेषु प्रमाणमाह मूर्तत्वादिति। संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वयोरवच्छिन्नपरिमाणतया सम्भवेन अगव·

स्प्रभृतेरशेषविशेषशेमुषीशालिनस्तज्ज्ञानशालिनोऽपि तज्ज्ञानसद्भावेन मूर्ततया तद्वैभवो यथा दशदिक्संयोगसत्त्वेनासमवायिकारणविल- म्बाभावेन मूर्तत्वेनैव तद्योग्यतावच्छेदेन समवायिकारणस्याविप्लु- तत्वेन परत्वापरत्वमूर्तत्वाकृष्टकर्मवत्त्वेन च कारणसत्त्वात् संस्कारव- त्त्वेत्यर्थः । ननु मनसारब्धं द्रव्यं शरीरादिषु किमित्यत आह अस्पर्श- वत्त्वादिति । स्पर्शवत एव द्रव्यारम्भकतया तदारब्धद्रव्यमेव नास्ती- त्यर्थः । व्यासङ्गोपपादकतया क्रियावत्त्वं ततश्च मूर्तत्वमित्याह क्रिया त्वादिति । मनसो ज्ञानवत्त्व आत्मत्वापत्त्या एकत्र शरीर आत्मद्वया- धिष्ठितत्वापत्तिरित्याह साधारणेति । नन्वचेतनत्वे परार्थत्वं तत्कथं मनस इत्यत आह कारणेति । पूर्वन्यायेन गुणवत्त्वसिद्धेः प्रयोजन- माह गुणवत्त्वादिति । ननु मनसोऽणुत्वे रूपादिप्रत्ययायौगपद्याद्यभि- मानो न स्यात् संभ्रम इति चेत् । गतिक्रमेण मनसेन्द्रियान्तराधि- ष्ठान एकप्रत्ययानन्तरं विलम्बेन प्रत्ययोत्पत्तौ विशेषदर्शनेन भ्रमा- सम्भवात् । न चाशुगतेः क्रमो न लक्ष्यते इति वाच्यम् । गुरुद्रव्या- दीनां तत्कारणानामभावात् अत आह प्रयत्नेति । इच्छानुविधायिनि मनःकर्मणि प्रयत्नवदात्मसंयोगः कारणं क्वचिददृष्टवदात्मसंयोगो य- था सुषुप्त्यनन्तरभाविज्ञानप्रयोजक इत्यर्थः । इतिशब्दः शास्त्रार्थ- पूर्णतायामियतैव गुणादिनिरूपणस्याप्यर्थतः प्राप्तेः । अग्रे प्रपञ्चमा- त्रार्थत्वादिति दिक् ।

भाष्याम्भोनिधिसेतौ वीरवरीये यशो हेतौ ।
चरमो लक्षणभागो रचितः श्रीपद्मनाभेन ॥ १ ॥
अमुना तृणीकृता वयमन्यवदान्याद्विशिष्टेन ।
प्रत्युपकारधियाऽयं रचितो ग्रन्थस्ततोऽस्माभिः ॥ २ ॥
यथा निष्ठाप्रीतं मुनिमतमिदं तातचरणै-
स्तथा भ्रातुर्नात्र प्रभवति विशेषं गुरुरपि ।
अनुच्छिष्टं यच्चेदिह हि परविद्वद्भिरधिया
तदास्वाद्यास्वाद्य भवत कृतिनस्तर्ककृतिनः ॥

इति श्रीमदखिलभूचक्रशक्रार्कबलसुत्राणप्रतापतपनवर्धमानशो- भातिशययशोराजिजीवमहाराजाधिराजश्रीवीरवरीये मि- श्रश्रीजगद्गुरुबलभद्रात्मजविजयश्रीगर्भसम्भवविश्वना- थानुजसकलशास्त्रारविन्दप्रद्योतनभट्टाचार्यमिश्रश्रीप- द्मनाभकृतौ वैशेषिकसेतौ तृतीयः परीवादः सम्पूर्णः॥

(व्यो०) इदानीं मनसो लक्षणपरीक्षार्थं मनस्त्वयोगान्मन इत्यादि प्रकरणम्।

मनस्त्वेन योगो मनस्त्वोपलक्षितः समवायो लक्षणमिति । तथाहि–मन इतरस्माद्भिद्यते मनस्त्वयोगाद्यस्त्वितरस्माद् मनसो न भिद्यते, न चासौ मनस्त्वेन युक्तो यथा क्षित्यादिरिति । व्यवहारो वा साध्यः । शेषं लक्षणस्य दूषणप्रतिसमाधानं पूर्ववत् ज्ञेयम्। तथा शब्दार्थनिरूपणपरं चेति । अथ प्रत्यक्षेणानुपलब्धेर्मनसः सद्भावे किं प्रमाणमनुमानमित्याह सत्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखदुःखानामभूत्वोत्पत्तिदर्शनादिति । तथा ह्यात्मा सर्वगतत्वादेव सर्वैरिन्द्रियैः सम्बद्धः। इन्द्रियाणि तु स्वविषयैरिति । तथापि न युगपद्रूपादिज्ञानान्युत्पद्यन्त इति कारणान्तरमनुमीयते। अथेन्द्रियाणां स्वविषये संबन्धः कथं ज्ञायते ? अनुमानात्, तथाहि–घ्राणं स्वव्याप्तसंयोगितासंयुक्तं तत्संयुक्तव्यापकत्वाद्यो यः संयुक्तव्यापकः स स्वव्याप्तसंयोगिसंयुज्यमानो दृष्टः। यथा वीरणसंयुक्ततन्तुव्यापकः पटो वीरणेन संयुक्त इति । स्थानसंयुक्तं वा कर्पूरादिद्रव्यं स्वसंयुक्तव्यापिना संयुज्यते तद्व्याप्तसंयोगित्वात्, यो यद्व्याप्तसंयोगी स स्वसंयुक्तव्यापिना संयुज्यमानो दृष्टो यथा पटव्याप्ततन्तुसंयोगि वीरणं पटेन संयुज्यमानमिति । एवं रसनेन्द्रियं स्वव्याप्तसंयोगिना संयुक्तं तत्संयुक्तव्यापकत्वात् वीरणसंयुक्ततन्तुव्यापकपटवत्। स्थानसंयुक्तं वा द्रव्यं स्वसंयुक्तव्यापिना संयुज्यते तन्तुव्याप्तसंयोगित्वाद्वीरणादिवत् इति। एवं शेषेष्वपीति । गीतध्वनिस्तु संनिहितस्य तच्छ्रवणसाकल्येन श्रोत्रसम्बन्ध एव यद्येतावत् कारणं ज्ञानसुखदुःखानां तत्सद्भावेऽनुत्पत्तिर्न स्यात् । नहि साकल्येपि कार्यस्यानुत्पत्तिर्दृष्टेति। तस्मादेषां सद्भावेपि कार्यस्य पूर्वमभूत्वा पश्चादुत्पत्तिदर्शनात् कारणान्तरमनुमीयते यस्य सद्भावाभावाभ्यां कार्यस्योत्पत्त्यनुत्पत्ती । अथादृष्टोऽस्यामेव कारणं भविष्यतीति न, श्रोत्रादीनामप्यभावप्रसङ्गात् । तस्यापि चेदानीं तत्साधनस्यानुष्ठानाच्चिरोत्पादे स एव दोषः । तदेवमात्मेन्द्रियार्थाः कारणान्तरापेक्षाः सद्भावेऽप्यनुत्पाद्योत्पादकत्वात् । ये हि सद्भावेपि कार्यमनुत्पाद्य पश्चादुत्पादयन्ति ते सापेक्षाः यथा तन्त्वादयः अन्त्यतन्तुसंयोगापेक्षा इति ।

अन्ये त्वात्मा क्रमवत्कारणापेक्ष इतरसाकल्येपि क्रमेण कार्य-

जनकत्वात्। यो हीतरकारणसाकल्येपि क्रमेण कार्यं करोति स क्रमवत्कारणापेक्षो यथाऽनेकशिल्पाभिज्ञः पुरुष इति। चक्षुरादयो वा क्रमवत्कारणापेक्षाः सद्भावेपि क्रमेण कार्यजनकत्वात्। यो हि विद्यमानः क्रमेण कार्यङ्करोति सोऽवश्यं क्रमवत्कारणमपेक्षते। यथा वासीकर्त्तर्यादि हस्तमित्यनुमानं ब्रुवते। तथात्मेन्द्रियार्थसांनिध्येपि क्रमेणैव कार्यङ्करोतीति दृष्टम्। एवं चक्षुरादयोऽप्यात्मनाधिष्ठिता विषयसम्बन्धक्रमेणैव कार्यं कुर्वन्तीति क्रमवत्कारणमपेक्षन्ते। तथा श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनात् अस्ति कारणान्तरम्। तथाहि—स्मृतिः करणजन्या क्रियात्वात् छिदिक्रियावत्। न च श्रोत्राद्येव करणम्, तदव्यापारेऽपि स्मृत्युत्पत्तिदर्शनात्,यद्यदव्यापारेप्युत्पद्यते तत्तस्य कार्यं न भवत्येव, यथा विनष्टेषु तन्तुषु उत्पद्यमानो घट इति। स्मृतिस्तु बधिरादीनां श्रोत्राद्यव्यापारे ऽप्युत्पद्यत इति न तत्कार्या। अतः करणान्तरेण भवितव्यम्। तथा बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरसद्भावाच्च करणान्तरमस्ति। तथा सुखादयः करणपरिच्छेद्याः ग्राह्यत्वाद्रूपादिवत्। न च चक्षुराद्येव करणम्। बाह्येन्द्रियैरगृहीतस्य सुखादिग्राह्यान्तरस्य सद्भावादित्यभिधानात्। यथा चक्षुषा गन्धो न गृह्यत इति करणान्तरं घ्राणमनुमीयते। ताभ्यां च रसस्यापरिच्छेदाद्रसनानुमानम्। तैश्च स्पर्शस्य तथा शब्दस्य चेति करणान्तरानुमानमिति। तद्वत् बाह्येन्द्रियैः सुखादयो न गृह्यन्त इति तत्परिच्छेदकं मनोऽनुमीयते।

सिद्धे च मनःसद्भावे द्रव्यत्वसमवायिकारणत्वप्रतिपादनार्थं तस्य गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा इति वाक्यम्। द्रव्यत्वादेव संख्यासद्भावसिद्धौ किमेकमनेकञ्चेति संशये तन्निरासार्थमाह प्रयत्नज्ञानायौगपद्यवचनात्प्रतिशरीरमेकत्वं सिद्धम् इति। प्रयत्नायौगपद्यात् ज्ञानायौगपद्यवचनाच्च प्रतिशरीरमेकं मन इति सूत्रं दर्शयति। असमासकरणं चात्र सुखदुःखाद्ययौगपद्यावरोधार्थम्। सूत्रार्थस्तु नैकमनेकस्मिञ्छरीरे नाप्येकस्मिन्ननेकं वा मनः। किन्तर्हि? प्रतिशरीरमेकम्। कुतः? प्रयत्नायौगपद्यात् ज्ञानायौगपद्याच्च। यदि पुनरेकं स्यात् व्यापकं मनः सर्वेन्द्रियाणां तदधिष्ठितत्वाद्युगपद्रूपादिज्ञानान्युत्पद्येरन् प्रयत्नाश्चेति। न चैवं दृष्टम्। अथ दीर्घशष्कुलीं भक्षयतः कपिलब्रह्मणो युगपत् पञ्च ज्ञानान्युत्पद्यन्ते,

तथाऽव्यापकस्य युगपद्वाक्योच्चारणगमनमार्गान्वेषणकमण्डलुधा-रणेषु प्रयत्ना उत्पद्यन्ते इत्यपि सिद्धम् । तन्न । यौगपद्ये प्रसिद्धो-दाहरणाभावात् । उत्पलपत्रशतव्यतिभेदाभिमानवदाशुभावित्वेन यौगपद्याभिमानो द्रष्टव्यः । क्रमे त्वनेकं प्रसिद्धमुदाहरणमस्ति । त-स्मादणुपरिमाणस्य मनसः क्रमेणेन्द्रियसम्बन्धात् क्रमेणैव ज्ञानानि भवन्तीति युक्तम् । अणुपरिमाणस्याप्येकस्मिन् छरीरे ऽनेकत्वाभ्युप-गमे किञ्चिदिन्द्रियं केनचिन्मनसाधिष्ठितमिति ज्ञानयौगपद्यमेव स्यात् । क्रमेण तु ज्ञानान्युत्पद्यमानानि संवेद्यन्त इति प्रतिशरीरम-णुपरिमाणमेकं मनः । न चैवमपि मनसा चक्षुरधिष्ठितमनेकार्थसम्ब-द्धं युगपद्ज्ञानान्युत्पादयेत् । नैतदेवम् । एकस्य करणस्यैकक्रिया-निर्वृत्तौ सामर्थ्योपलब्धेः । न ह्येकं करणमेकस्मिन् काले ऽनेकां क्रियां कुर्वद्दृष्टम् इति । अथ कुठाराभिघातादनेकतृणेषु युगपदनेक-क्रियोपलब्धेरयुक्तमेतत् । न, बोधात्मकत्वेन विशेषितत्वात् । यदि वा कुठारावयवानां करणत्वं यथा तीक्ष्णोऽवयवी तृणैः सम्बद्धः तथा तदवयवास्तैः सम्बद्धा एवेति । करणबहुत्वाद्युक्तं क्रियायौगपद्यमभिघातास्तु करणानीत्यन्ये । तथाहि कुठारस्य तृणैः सम्बन्धा वेगापेक्षाः परस्परं विभिन्ना एव । नैतद्युक्तम् । कर्मणा सम्बद्ध-स्यैव कुठारस्य करणत्वात् । अन्यथा हि चक्षुषोपि सम्बन्धिभेदात्सम्ब-न्धभेदोपपत्तेस्तेषामपि करणत्वेन चक्षुर्द्वारेण मनसाधिष्ठितत्वात् युगपत् घटादिज्ञानोत्पत्तिप्रसङ्गः । न चैतदस्त्यसंवेदनादिति । तस्मात् युगपत्प्रकाशनमेव घटादीनां न ग्रहणानीति । चक्षुरनेकपदार्थ-संबद्धं करणमिति न्याय्यम् । अतः करणस्यैकक्रियानिर्वृत्तौ साम-र्थ्यम् । सिद्धे च नानात्वे तदनुविधानात् साहचर्याज्ज्ञानापृथक्त्वं सिध्यत्येव ।

तथा तदभाववचनादणुपरिमाणमिति विभवान्महानाकाशस्तथा चात्मा तदभावादणु मन इति (अ०७आ०१सू०२२-२३) सूत्रे दर्शयति। तस्य विभुत्वस्याभावादणु मन इति । नन्वेवं घटादावपि विभुत्वस्या-भावादणुत्वं स्यात् । न नित्यद्रव्यस्येति विशेषणात्। तथाहि मनोऽणु-परिमाणसम्बन्धि नित्यद्रव्यत्वे सति विभुत्वरहितत्वात् ,यद्यन्नित्यद्र-व्यत्वे सति विभुत्वरहितं तत्तथा दृष्टम् यथा परमाण्वादिः, तथा चेदं विभुत्वरहितम् तस्मादणुपरिमाणमिति । घटादौ विभुत्वरहित-

त्वेपि नाणुपरिमाणमिति नित्यत्वग्रहणम् । नित्यत्वञ्च गुणादावप्य-स्तीति द्रव्यपदम् ।

तथापसर्पणोपसर्पणवचनात् संयोगविभागाविति । अपसर्पणमशि-तपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानीति ५अ०२आ०१७ सूत्रम् दर्शयति। अपसर्पणं तु मृतशरीराद्विभागार्थं कर्म । प्रत्यग्रेण श-रीरेण संयोगार्थं चोपसर्पणमिति। अशितपीतम्भुक्तमुदकादि तयोर्ना-ड्यन्तरेण संचरणं कार्यान्तरं शरीरान्तरं तेन संयोगो मनसस्तदर्थं मनःकर्म योगिनामित्येतत् सर्वमदृष्टकारितमित्यपरेणापि सूत्रेण संयो-गविभागावुक्तौ। तथा मूर्तत्वात् परत्वापरत्वे तयोर्मूर्त्यनुविधानात् । यत्र हि मूर्तत्वं तत्र तद्दर्शिनः परापरव्यवहारः सम्भवतीति। दिक्कृते तु परत्वापरत्वे मनसि कालकृतयोर्नित्यत्वेनासम्भवात् । कार्यद्रव्यापे-क्षया तु तद्दर्शिनः कालकृतं परत्वं मनसि सम्भाव्यत एव। परं मनोऽ-परं च कार्यद्रव्यमिति । न चायं नियमः, समानजातीययोरेव परापर-व्यवहारस्य दृष्टत्वात् । तथा न परं परत्वापरत्वे संस्कारश्च मू-र्तत्वादेव वेगाख्यः। अथ मनः परस्परेण सम्बद्धं किमिति द्रव्यं नारभते समानजातीयमूर्तद्रव्यसम्बन्धस्यान्त्यावयविव्यतिरेकेण द्रव्यारम्भकत्वदर्शनादित्याह अस्पर्शवत्त्वाद्द्रव्यानारम्भकत्वमिति । स्पर्शवतो हि द्रव्यस्य द्रव्यारम्भकत्वदर्शनात् । यथा परमाणूनाम् । न च मनसः स्पर्शवत्त्वे प्रमाणमस्ति, मनस्त्वजातीयस्य स्पर्शवत्कार्य-स्यानुपलब्धेः । यथाहि पृथिवीत्वजातीयं स्पर्शवत्कार्यमुपलभ्य-मानं तदारम्भकाणामणूनां स्पर्शवत्त्वं ज्ञापयति । नैवं मनस्त्वजा-तीयं कार्यमस्तीति कथं मनसः स्पर्शवत्त्वम् । तथा स्पर्शवत्त्वे सति शरीरे सञ्चरतो वायोरिव प्रतिस्खलनात् क्वचिदिन्द्रियान्तरेणा-सम्बन्धादनेककालं रूपादेर्विषयस्याग्रहणमपि स्यात् । न चैतत् सुषुप्त्यवस्थामन्तरेण दृष्टमिति । तस्मादस्पर्शवत्त्वेन द्रव्यानारम्भ-कत्वमिति अणुपरिमाणव्यवस्थापनात् । सिद्धेऽपि मूर्तत्वे पुनः साधन-माह क्रियावत्त्वान्मूर्तत्वम् , तदनुविधानात् क्रियायाः । सा चेन्द्रिय-सम्बन्धाद्विज्ञायते । अन्यथा ह्यणुपरिमाणं मनः कथमिन्द्रियान्तरेण सम्बध्यते । पूर्वं मनश्चैतन्यप्रतिषेधेपि पुनर्बाधकमाह साधारणविग्रहव-त्त्वप्रसङ्गादज्ञत्वमिति। यदि हि चेतनं मनः स्यादुभयोः साधारणं शरी-रमुपभोग्यमिति विरुद्धाभिप्रायत्वात् भोगानुपपत्तिः स्यात् । अथ किं

स्वार्थं परार्थं वेत्याह करणभावात्परार्थमिति । करणं हि वास्यादि परपुरुषार्थसम्पादकं दृष्टम् । तथाच करणं मनः तस्मात् कर्तुरात्मनः पुरुषार्थसंपादकमिति । अथ किं द्रव्यं गुणः कर्म वा मन इत्याह गुणवत्त्वाद्द्रव्यम्, क्षित्यादिवत् गुणास्तूक्ता एव । अथाणुपरिमाणत्वा-न्मनसः कथं रूपादिज्ञानान्याशूपद्यन्त इत्याह आशुसंचारि । तच्च प्रयत्नादृष्टपरिग्रहवशात् प्रयत्नेन जीवनपूर्वकेणादृष्टविशेषेण च परि-ग्रहवशादाशुसंचारित्वमिति ॥

इति मनः ॥

इति श्रीव्योमशिवाचार्यविरचितायां पदार्थसंग्रहटीकायां द्रव्यपदार्थः॥

अथ गुणपदार्थनिरूपणम् ।

(१) साधर्म्यप्रकरणम् ।

(व्यो०) (१)इदानीमुद्देशक्रमेणावसरप्राप्तानां गुणानामितरपदार्थ-वैधर्म्येण व्यापकं साधर्म्यं पुनः प्रतिनियतानां च स्वभेदान्तराद् व्यावृत्तिमपि दर्शयन्नाह—

(भा०) रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निष्क्रियत्वमगुणवत्त्वं च ।

रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगा मूर्तगुणाः ।

बुद्धिसुखदुःखेच्छाप्रयत्नधर्माधर्मभावनाशब्दा अमूर्तगुणाः ।

संख्यापरिमाणपृथक्त्वसंयोगविभागा उभयगुणाः ।

रूपादीनां सर्वेषां गुणानां गुणत्वाभिसम्बन्ध इत्यादिप्रकरणम् । गुणत्वेनाभिसम्बन्धस्तदुपलक्षितः समवायः । स च केषाम् ? रूपादीनाम्। तथाप्यादिशब्दस्यानियतार्थग्राहकत्वान्न ज्ञायते कियतामतः सर्वेषाम् । उत्क्षेपणाद्यवरोधपरिहारार्थं च गुणानामिति। नन्वेवं सर्वेषां गुणानामित्युक्ते व्यभिचाराभावादनर्थं रूपादीनामिति पदम् । न, आश्रितत्वाविशेषणात् सर्वो गुण इति दर्शनस्य व्यवच्छेदार्थत्वात् । तथाहि-रूपादीनामेव गुणत्वाभिसम्बन्धः साधर्म्यम् नान्येषामिति । न च साङ्ख्याभ्युपगतस्य गुणत्रयस्य व्यवच्छेदार्थं रूपादिग्रहणमिति न्याय्यम् । तस्य प्रमाणानुपलब्धेः । प्रसिद्धं च विशेषणेन व्यवच्छिद्यमानं दृष्टम्, यथा नीलेनानीलमिति । तदेवं रूपादयो इतरस्माद् भिद्यन्ते गुणा इति व्यवहर्तव्या वा गुणत्वाभिसम्बन्धात्, ये तु न भिद्य-

---

(१) अतः परं सूक्तिसेत्वोरवासितत्वाद् व्योमवतीव्याख्यानमात्रं मुद्र्यते भाष्यसमाप्तिपर्यन्तम् । सं० ।

न्ते न च गुणा इति व्यवह्रियन्ते न ते गुणत्वाभिसम्बद्धा यथा क्षित्यादय इति। शेषं पूर्ववत्। तथा द्रव्याश्रितत्वं च साधर्म्यं रूपादीनाम्। तच्च सावधारणं विवक्षितम् अन्यथा हि द्रव्यादीनामपि द्रव्याश्रितत्वादतिव्यापि साधर्म्यं स्यात् न व्यावृत्तमिति। अवधारणं तु द्रव्येष्वेवाश्रितत्वमेवेति। द्रव्यकर्मविशेषा द्रव्येष्वेवाश्रिताः न चाश्रिता एवेति, सामान्यसमवायौ तु द्रव्येष्वाश्रितौ न तु द्रव्येष्वेव गुणादावपि सद्भावात्, गुणास्तु द्रव्येष्वेवाश्रिताः न गुणादौ, तथाऽऽश्रिता एव द्रव्येषु नानाश्रिताः, निर्गुणस्य द्रव्यस्यानुपलब्धेः। तदेवमयोगान्ययोगव्यवच्छेदेन द्रव्याश्रितत्वादितरेभ्यो भिद्यन्त इति साध्यम्। तथा निर्गता चलनलक्षणाक्रिया येभ्यस्ते निष्क्रियास्तेषां भावो निष्क्रियत्वम्। गुणा विद्यन्ते येषां ते गुणवन्तः तेषां भावो गुणवत्त्वं तत्प्रतिषेधेन चागुणवत्त्वमिति।

ननु निष्क्रियत्वमगुणवत्त्वं च गुणादीनां पंचानामपीत्युक्तमतो नेदं पदार्थान्तराद्व्यावृत्तं साधर्म्यम्। न च साधर्म्यमात्रेणेह प्रयोजनमस्ति, पूर्वमेव विधानात्। अथ गुणत्वसहचरितं व्यावृत्तं साधर्म्यमेतदिति चेत्। न। असमर्थविशेषणताप्रसङ्गात्। तस्मात्साधर्म्यमात्रमेतदिति। यदि वा द्रव्यपदार्थादेव भेदप्रतिपादनार्थमेतत्। तथाहि-क्रियावत् गुणवच्च द्रव्यं तद्रहिताश्च गुणा इति धर्मभेदात् भिद्यन्ते एव। अथ निष्क्रियत्वमगुणवत्त्वञ्च कथं रूपादीनां द्रव्यस्यैव समवायिकारणत्वेन तदाधाराणामुत्पत्त्यभावात्। अथ रूपादिसमवेतानां रूपादीनामुत्पत्तेर्युक्तं समवायिकारणत्वम्। तन्न। अनुपलब्धेः, यथा हि रूपवद्द्रव्यमिति ज्ञानं नैवं रूपवद्रूपमिति प्रतिभासोऽस्ति। अभ्युपगम्याप्युच्यते। यदि च रूपं रूपोत्पत्तौ समवायिकारणमन्येनासमवायिकारणेन भवितव्यम्। न च कारणरूपमेवासमवायिकारणम्, तस्यापि स्वगतरूपोत्पत्तौ समवायिकारणत्वात्, न च तदेव समवायिकारणमसमवायिकारणं चेति दृष्टम्। नापि संयोगः तस्य द्रव्योत्पत्तावसमवायित्वात्। यदि च तन्तुसंयोगस्तद्रूपोत्पत्तावसमवायिकारणम्, तदुत्पत्तेः पूर्वं न भावस्यादेव न स्यादिति रूपरूपोत्पत्ति(?) संयोगस्य कारणत्वे तदुत्पत्तेः पूर्वमभावो वाच्यः। न चैकस्मादेव रूपाद्रूपान्तरमिति वाच्यम्। एकस्य क्रमयौगपद्याभ्यामारम्भप्रतिषेधात्। अत एव निष्क्रियत्वं मूर्त्यनु-

विधानात् क्रियायाः । सा च गुणेषु न सम्भवति निर्गुणत्वात् । असर्वगतद्रव्यपरिमाणं च मूर्तिरिति । अथाश्रयगतगुणेषु गमनप्रतिभासस्तर्हि कथं मुख्ये बाधकोपपत्तेरुपचारेण, द्रव्ये हि वर्तमानं गमनमेकार्थसमवायितया गुणेष्वारोप्य प्रतिपद्यते गुणा गच्छन्तीति । तदेव निष्क्रियत्वादगुणवत्त्वाच्च द्रव्यादर्थान्तरं रूपमिति। अथार्थान्तरत्वे कथं नियतेन धर्मिणा व्यपदेशः सम्बन्धनियमात् । न च सम्बन्धस्य सम्बन्धान्तरपरिकल्पना सम्बन्धरूपत्वादेवेति वक्ष्यामः समवायपदार्थे ।

अथेदानीं प्रतिनियतानां स्वभेदान्तरादव्यावृत्तं साधर्म्यं दर्शयति रूपादयो वेगान्ता मूर्तगुणा इति । मूर्तानामेव न त्वेत एव मूर्तानामन्येषामपि तद्गुणत्वात् तथाहि–पृथिव्यादिषु त्रिषु रूपद्रवत्वादयः गुरुत्वरसौ तु द्वयोः स्पर्शश्चतुर्णां गन्धः क्षितावेव रसोम्भस्येव परत्वापरत्ववेगास्तु पंचस्वपि मूर्तेष्विति ।

बुद्ध्यादयः शब्दान्तास्त्वमूर्तगुणा इति । अमूर्तानामेव गुणा न त्वेत एव संख्यादीनामपि तद्गुणत्वात् । बुद्ध्यादयो भावनान्ताः पुरुषे शब्दश्चाकाश इति ।

संख्यादयो विभागान्ताः उभयगुणाः उभयेषां मूर्तामूर्तानामेव गुणाः तथैत एवोभयगुणाः ॥

(व्यो०) अथेदानीमेकानेकाश्रितत्वं दर्शयन्नाह—

(भा०) संयोगविभागद्वित्वद्विपृथक्त्वादयोऽनेकाश्रिताः ।

शेषास्त्वेकैकद्रव्यवृत्तयः ।

रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा वैशेषिकगुणाः ।

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगा सामान्यगुणाः ।

• संयोगविभागद्विपृथक्त्वादयोऽनेकाश्रिता इत्यादिपदेन त्रित्वादिका परार्धान्ता संख्या तद्विशिष्टं च पृथक्त्वं गृह्यते । अनेकाश्रितत्वं चात्र व्यक्त्यपेक्षया विवक्षितं न जात्यपेक्षया रूपादेरपि तद्-

भावप्रसङ्गात्। यद्यपि रूपत्वादिजातीयमनेकस्मिन्न वर्तते। तथाप्येकतद्व्यक्तिरेकस्मिन्नेव। न चैवं संयोगादि तद्व्यक्तेरनेकाश्रितत्वोपलब्धेः।

शेषास्त्वेकैकद्रव्यवृत्तय इति। उक्तेभ्योऽन्ये शेषास्ते ह्येकैकस्मिन्नेव द्रव्ये वर्तन्ते एका व्यक्तिरेकस्मिन्नेव समवेता तथा रसादिव्यक्तयोपि। अवधारणं त्वेषामेकैकद्रव्यवृत्तित्वमेव। नत्वेषामेव उभयवृत्तिनामपि तदभावात्।

इदानीं के विशेषगुणाः के च सामान्यगुणा इत्युपदर्शनार्थमाह—रूपादयः शब्दान्ता वैशेषिकगुणाः। कीदृशमेषां विशेषगुणत्वम्? यद्येकाश्रितत्वं गुरुत्वादावपि स्यात्। अथैकैकेन्द्रियग्राह्यत्वं स्नेहद्रवत्वधर्माधर्मादौ न स्यात्। अथासाधारणत्वं तन्नास्ति। रूपत्वादिजातीयस्यानेकत्रोपलब्धेः। व्यक्तिविवक्षया गुरुत्वादावप्यस्त्येव नान्यथा तदुपपत्तेः। तथाहि स्वसमवेतविशेषविशिष्टत्वे सति स्वाश्रयैकजातीयव्यवच्छेदकत्वाद्विशेषगुणाः। आश्रयमात्रव्यवच्छेदकत्वं न सम्भवतीति स्वाश्रयपदम्। तथापि निर्विशेषणस्य रूपादेर्नाश्रयव्यवच्छेदकत्वमिति विशेषविशिष्टपदम्। संख्यादयोपि गन्धैकार्थसमवेताः क्षितेर्व्यवच्छेदकाः स्नेहैकार्थसमवेताश्चोदकस्य, तन्निरासाय स्वसमवेतपदम्। यथाहि रूपे शुक्लत्वादिविशेषणं समवेतं रसे च मधुरत्वादि नैवं स्नेहः गन्धो वा संख्यादौ समवेत इति व्यवच्छेदः। तथाण्वणुपरिमाणं परमाणूनां व्यवच्छेदकमिति स्वाश्रयैकजातीयपदम्। तथाहि—परमाणुपरिमाणं स्वसमवेतविशेषणोपेतम स्वाश्रयस्य परमाणुव्रातस्य चतुर्विधस्य व्यवच्छेदकं नैकजातीयस्येति। एवं परममहत्त्वमपीति! रूपञ्च स्वसमवेतशुक्लत्वाद्यनेकविशेषणोपेतमेकजातीयायाः क्षितेर्व्यवच्छेदकं नियमेन शुक्लत्वविशिष्टमुदकस्य शुक्लभास्वरं च तेजस इत्यादिविशेषः पूर्वोक्त एव द्रष्टव्यः। तदेवं स्वसमवेतविशेषविशिष्टत्वे सति स्वाश्रयैकजातीयव्यवच्छेदकत्वाद्विशेषगुणा एव विशेषगुणलक्षणरहितत्वादेत एव सामान्यगुणाः॥

(व्यो०) इदानीमेकानेकेन्द्रियग्राह्यत्वं दर्शयन्नाह—

(भा०) शब्दस्पर्शरूपरसगन्धा बाह्यैकैकेन्द्रियग्राह्याः।

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व द्रवत्वस्नेहवेगा द्वीन्द्रियग्राह्याः ।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वन्तःकरणग्राह्याः ।

अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्व-गुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः ॥

शब्दस्पर्शरूपरसगन्धा बाह्येनैकेनेन्द्रियेण गृह्यन्त इति तद्ग्राह्याः। बाह्यग्रहणमन्तःकरणव्यवच्छेदार्थम् । तद्विवक्षया हि द्वीन्द्रियग्राह्यत्वात् । अवधारणं चैत एव नियमेन बाह्यैकैकेन्द्रियग्राह्याः, तथाऽनेकेन्द्रियग्राह्या न भवन्तीति ।

संख्यादयो वेगान्ता द्वीन्द्रियग्राह्या एव । नियमेनैत एव द्वीन्द्रियग्राह्याः । बाह्यग्रहणमन्तःकरणव्यवच्छेदार्थमनुवर्तनीयम् । अथ स्नेहस्य कथं द्वीन्द्रियग्राह्यत्वं त्वक्व्यापारे सति स्निग्धप्रत्ययदर्शनात् । यथाहि चक्षुर्व्यापारेण स्निग्धाः केशाः इति प्रतिभासः तथा स्नानोत्तरकालमपि त्वग्व्यापारेण स्निग्धप्रत्ययो दृष्ट इत्यन्वयव्यतिरेकाभ्यामिन्द्रियग्राह्यत्वं निश्चीयते । अथ किमयमाप्यः पार्थिवो वेति विचारयिष्यामः स्नेहपरीक्षायाम् ।

बुद्ध्यादयः प्रयत्नान्तास्त्वन्तःकरणेनैव गृह्यन्त इति तद्ग्राह्याः। गुरुत्वधर्माधर्मभावना ह्यतीन्द्रिया एव इन्द्रियाण्यतीत्य वर्तन्ते तद्ग्राह्या न भवन्तीति । यथा च गुरुत्वमप्रत्यक्षं तथा वक्ष्यामस्तत्परीक्षायाम् ।

अपाकजरूपादिवेगान्ताः कारणगुणपूर्वका इति । अपाकजग्रहणं पार्थिवपरमाणुरूपादिव्यवच्छेदार्थम् । ननु तेऽपि कारणगुणपूर्वा भवन्त्येव, तथाहि--कारणं परमाणुस्तद्गुणः पार्थिवपरमाण्वग्निसंयोगः तत्पूर्वा रूपादय इति कथं न कारणगुणपूर्वकाः । तन्न, अभिप्रायापरिज्ञानात् । तथाचायमभिप्रायः। समवायिकारणेष्वेव गुणाः कारणगुणास्ते पूर्वं कारणं येषां कार्यगुणानां तेऽत्र कारणगुण पूर्वकाः विवक्षिताः । न चैवं पाकजा इति व्यवच्छिद्यन्ते । अथ सलिलादिपरमाणुरूपादयः पाकजत्वाभावेपि न कारणगुणपूर्वका इति। तन्न । पर्युदासप्रतिषेधस्य विवक्षितत्वात् । तथाहि-पाकाज्जाताः

पाकजास्तत्प्रतिषेधेनान्यगुणपूर्वकत्वं लभ्यत इति नित्यानां व्यवच्छेदः । नन्वेवमपि व्यर्थमपाकजग्रहणम्, एते कारणगुणपूर्वा एवेत्यवधारणासम्भवात् । तथाहि-द्रवत्ववेगावकारणगुणपूर्वकावपीति । न, स्पष्टार्थत्वादेत एव कारणगुणपूर्वा न त्वेते कारणगुणपूर्वा एवेत्यवधारणमबुध्यमानस्य पाकजदोषाशङ्का स्यादिति स्पष्टार्थमपाकजग्रहणम् । अत्र चैकत्वैकपृथक्त्वग्रहणं द्वित्वद्विपृथक्त्वादिव्यवच्छेदार्थम् । ते ह्यकारणगुणपूर्वका इति ॥

(भा०) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अकारणगुणपूर्वकाः ॥

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दतूलपरिमाणोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्वपाकजाः संयोगजाः ॥

संयोगविभागवेगाः कर्मजाः ॥

शब्दोत्तरविभागौ विभागजौ ॥

(व्यो०) बुद्ध्यादयः शब्दान्तास्त्वकारणगुणपूर्वका एव समवायिगुणपूर्वकाः कार्यगुणा न भवन्तीति । न त्वेत एव संयोगविभागपरत्वापरत्वद्वित्वद्विपृथक्त्वादीनामप्यकारणगुणपूर्वकत्वात् । अथाकारणगुणपूर्वकत्वाविशेषेऽप्यस्मिन् वाक्ये संयोगादीनामवचने किं प्रयोजनमिति चिन्त्यम् । अथापाकजरूपादिवेगान्तानामेव कारणगुणपूर्वकत्वाभिधानाच्छेषाणामकारणपूर्वकत्वं विज्ञायते । एवं तर्हि बुद्ध्यादयोऽपि नाभिधेयाः । शेषाणामकारणगुणपूर्वकत्वमिति वाऽभिधेयम । सकलभेदसङ्ग्राहकं वाक्यमलं बुद्ध्यादिविशेषाभिधानेनेति । नैतदेवम् । विशेषवचनं स्पष्टार्थमनेकधा शास्त्राभिहितमित्यन्तेवासिनामृज्वर्थपरिज्ञानमेव स्यादित्यूहशक्तेः सम्वर्धनार्थम्—संयोगादीनां स्वशब्देनावचनम् । अन्ये त्वेकवृत्तीनामेव विशेषगुणानामत्राभिधानं विवक्षितमिति मन्यन्ते । तत्तु न बुध्यामहे । दूषणस्याप्रतिसमाधानात् ।

तथा बुद्ध्यादयः पाकजान्ताः संयोगजाः इत्यत्र बुद्ध्यादयो भावनान्ताः पुरुषान्तःकरणसंयोगादुत्पद्यन्ते । शब्दश्च

भेर्याकाशसंयोगात्तूलपरिमाणं च प्रचयादुत्तरसंयोगः सूत्रपाठापेक्षया संयोगजसंयोगो नैमित्तिकद्रवत्वमग्निसंयोगात् परत्वापरत्वे तु दिक्कालपिण्डसंयोगात् पाकजा इति । पार्थिवपरमाणुरूपादयः तेऽप्यग्निसंयोगजा इत्येते एव संयोगजा न त्वेते संयोगजा एव । तथाहि—शब्दो विभागजः शब्दजोऽप्यस्तीति ।

संयोगविभागवेगाः कर्मभ्यो जाताः कर्मजा इत्येते एव । न त्वेते कर्मजा एव । तथाहि—संयोगः संयोगादुत्पद्यते विभागश्च विभागात् वेगो वेगादपीति ।

शब्दोत्तरविभागौ विभागाज्जातौ विभागजाविति । एतावेव विभागजौ न त्वेतौ विभागजावेव । तथात्र शब्दः संयोगजः शब्दजोऽप्यस्तीति उत्तरविभागश्च सूत्रपाठापेक्षया विभागज एव परिगृह्यते ॥

(व्यो०) इदानीं के बुद्ध्यपेक्षाः के च समानजात्यारम्भका इत्युपदर्शयति—

(भा०) परत्वापरत्वद्वित्वद्विपृथक्त्वादयो बुद्ध्यपेक्षाः ।

रूपरसगन्धानुष्णस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाः समानजात्यारम्भकाः ।

सुखदुःखेच्छाद्वेषप्रयत्नाश्चासमानजात्यारम्भकाः ॥

संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराः समानासमानजात्यारम्भकाः ॥

परत्वापरत्वद्वित्वपृथक्त्वादयो बुद्धिमपेक्षन्ते स्वोत्पत्ताविति बुध्यपेक्षा इति । आदिपदेन त्रित्वादिका परार्द्धान्ता संख्या तदवच्छिन्नं च पृथक्त्वं गृह्यते अवधारणन्त्वेत एव बुध्यपेक्षास्तथैते बुध्यपेक्षा एव बुद्धिं विना भवन्तीति ।

रूपादयः स्नेहान्ताः समानजात्यारम्भका इति । समाना तुल्या जातिर्येषां ते समानजातयः तानारभन्त इति तदारम्भका एव न त्वेत एव समानजात्यारम्भका उभयारम्भकाणामपि तद्भावात् । अत्र चानुष्णग्रहणमुष्णस्पर्शव्यवच्छेदार्थम्, तस्याप्युभयारम्भकत्वात् । एकत्वैकपृथक्त्वग्रहणं द्वित्वद्विपृथक्त्वादिव्यवच्छेदार्थम् । द्वित्वादेरसमानजात्यारम्भकत्वात्, द्विपृथक्त्वादेश्चाकारणत्वादिति ।

तथा ह्युदकावयवेषु वर्तमानरूपादयः स्नेहपर्यन्ताः कार्ये नारभन्ते। गन्धस्तु क्षित्यवयवेषु वर्तमानस्तदवयविनि गन्धमारभते। शब्दश्चाकाशे वर्तमानस्तत्रैव शब्दमिति।

सुखादयः प्रयत्नान्तास्त्वसमानजात्यारम्भका इत्यसमानजातीयमेवारभन्त इति तदारम्भका न त्वेत एवान्येषामपि तदभावात्। तथाच सुखादिच्छा दुःखाद्द्वेषस्ताभ्यां प्रयत्नः तस्मात् क्रियेति।

संयोगादयः संस्कारान्ताः समानासमानजात्यारम्भका इति। समाना जातिर्येषां ते समानजातयः तत्प्रतिषेधेन चासमानजातयः तानारभन्त इति तदारम्भकाः एते एव समानासमानजात्यारम्भकाः, नान्ये। तथैते समानासमानजात्यारम्भका एव नियमेन। तथाहि–संयोगात् संयोगो विजातीयश्च बुद्ध्यादिः, विभागाद्विभागो विजातीयश्च शब्दः, संख्यातः संख्या विजातीयं च परिमाणं, गुरुत्वात् गुरुत्वं विजातीयं च पतनं, द्रवत्वाद्द्रवत्वं विजातीयश्च स्यन्दनम्, उष्णस्पर्शादुष्णस्पर्शो विजातीयाश्च पाकजाः, ज्ञानाच्च ज्ञानं विजातीयाश्च संस्काराः, धर्माधर्माभ्यां धर्माधर्मौ विजातीये च सुखदुःखे, संस्कारात् संस्कारो विजातीयश्च स्मरणम्॥

(व्यो०) इदानीं स्वपराश्रयसमवेतारम्भकान् दर्शयति—

(भा०) बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेतारम्भकाः॥

रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भकाः॥

संयोगविभागसंख्यैकपृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तूभयत्रारम्भकाः।

बुद्ध्यादयः शब्दान्ताः स्वाश्रयसमवेतमेवारभन्त इति स्वाश्रयसमवेतारम्भकाः न त्वेत एवोभयारम्भकाणामपि तदभावात्। तथाहि–बुद्धिरात्मनि वर्तते तत्रैव ज्ञानं संस्कारहेतुर्भवति। सुखादिच्छा आत्मन्येव दुःखाद्द्वेषस्तत्रैव इच्छा तत्स्मरणप्रयत्नावात्मन्येव। तथा द्वेषादपि। भावनातो भावना स्मरणञ्च आत्मन्येव शब्दश्चाकाशे वर्तमानस्तत्रैव शब्दमारभत इति।

रूपादयः प्रयत्नान्ताः परत्रेति परस्मिन्नेवारभन्त इति परत्रारम्भका न त्वेत एव, तथाहि—रूपरसगन्धस्पर्शपरिणामस्नेहाः कार·

णेषु वर्तमानाः परत्र कार्यं तानारभन्ते। तथा प्रयत्नः पुरुषेषु वर्तमानः परत्र हस्तादौ क्रियामारभते।

संयोगादयो धर्मान्तास्तूभयत्रारम्भका एत एवोभयत्रारम्भकाः। तथैते उभयत्रारम्भका एव नियमेन। भेर्याकाशसंयोगो ह्याकाशे वर्तमानस्तत्रैव शब्दमारभते। भेरीदण्डसंयोगस्तु परत्र। तथा वंशदलाकाशविभागः स्वाश्रये वंशदलविभागस्तु परत्राकाशे शब्दारम्भकः। संख्या कारणे वर्तमाना द्वित्वत्रित्वादिका कार्ये परिणाममेकत्वसंख्या चैकत्वं स्वाश्रये तु द्वित्वादिकमारभत इति। पृथक्त्वाग्रहणं द्विपृथक्त्वादिव्यवच्छेदार्थम्, तेषामकारणत्वात्। कारणेषु वर्तमानमेकपृथक्त्वम् कार्येऽप्येकपृथक्त्वमारभते स्वाश्रयेषु द्विपृथक्त्वादिकमिति। गुरुत्वद्रवत्ववेगास्तु कारणगताः कार्येऽपि गुरुत्वादीनारभन्ते स्वाश्रयेषु पतनस्पन्दनगमनक्रिया इति। धर्माधर्मौ च स्वाश्रयसमवेते सुखदुःखे पराश्रये तु क्रियामारभेते।

(व्यो०) इदानीं क्रियाहेतूनाह—

(भा०) **गुरुत्वद्रवत्ववेगधर्माधर्मसंयोगविशेषाः क्रियाहेतवः।**

रूपरसगन्धानुष्णस्पर्शसंख्यापरिमाणैकपृथक्त्वस्नेहशब्दानामसमवायित्वम्।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्तकारणत्वम्। संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथा कारणत्वम्। परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वम्।

गुरुत्वादिसंयोगविशेषाः क्रियाहेतव इति। तथाहि—गुरुत्वात् पतनं द्रवत्वात् स्पन्दनं वेगात् गमनं प्रयत्नाद् हस्तादौ क्रिया धर्माधर्माभ्यामग्न्यादौ क्रिया। संयोगविशेषास्तु नोदनाभिघातसंयुक्तसंयोगास्तेऽपि क्रियाहेतव इति वक्ष्यामः कर्मपरीक्षायाम्। एत एव क्रियाहेतवः न त्वेते क्रियाहेतव एव गुरुत्वादीनां गुरुत्वजनकत्वस्याप्युपलब्धेः।

इदानीमसमवायिनिमित्तोभयथाकारणान्याह--रूपादिशब्दा-न्तानामसमवायिकारणत्वमिति ।

अथ किमिदमसमवायिकारणत्वं नाम ? प्रत्यासन्नस्य कार्यजनकत्वम् । यद्यस्य प्रत्यासन्नं सज्जनकत्वेनोपलब्धसामर्थ्यं व्याप्त्या तत्तस्योत्पत्तावसमवायिकारणम् । का पुनरियं प्रत्यासत्तिः ? एकार्थसमवायः । सा तु भिद्यते कार्यैकार्थसमवायलक्षणा कार्यकारणैकार्थसमवायलक्षणा चेति । कार्येण सहैकस्मिन्नर्थे समवायो लक्षणं चिन्हमस्या इति तल्लक्षणा । यथा शब्दस्य शब्दोत्पत्ताविति कार्यशब्दो ह्याकाशे वर्तते तत्रैव कारणशब्दोपीति कार्यैकार्थसमवायोऽस्य प्रत्यासत्तिरिति । तथा बुद्ध्याद्युत्पत्तावात्मान्तःकरणसंयोगस्य । स ह्यात्मनि वर्तते बुद्ध्यादयोपि तत्रैवेति । नन्वेवं बुद्ध्यादीनामपि स्वकार्योत्पत्तावेकार्थसमवायित्वादसमवायिकारणत्वमेव, न निमित्तत्वम् । नैष दोषः । संयोगस्याशेषकार्योत्पत्तौ व्याप्त्या सामर्थ्योपलब्धेः । न चैवं बुद्ध्यादेरन्यतरस्येति तस्य प्रतिनियतकार्योत्पत्तावेव सामर्थ्यावधारणात् आत्मान्तःकरणसंयोगस्त्वशेषबुध्याद्युत्पत्तावुपलब्धसामर्थ्य इति स एवासमवायिकारणम् । न जातुचिन्मनःसंयोगादृते बुध्यादयो भवन्तीति । तथाच सुषुप्तावस्थावसाने विज्ञानादिकमुत्पद्यते इति मनःसंयोगस्तत्र कारणम् । नन्वेवमपि धर्माधर्मयोरशेषबुध्याद्युत्पत्तौ व्याप्त्या कारणत्वादसमवायित्वं स्यात् । न । विभुविशेषगुणानां विशिष्टप्रत्यासत्तेरुपलम्भात् । यथाहि शब्दः शब्दान्तरमारभमाणः स्वावरुद्धनभोदेशसमनन्तरमेवारभते नैकार्थसमवायित्वाद्देशान्तरे ब्रह्मभाषितस्याप्युपलम्भप्रसङ्गात् । तद्वद्धर्माधर्मावपि स्वावरुद्धात्मप्रदेशानन्तरं सुखदुःखादिकमारभेयाताम् इति स्वर्गादिस्थानेषु तदभावः स्यात् । आरभेते तु स्थानान्तरेष्वपि सुखदुःखादिकमिति निमित्तकारणत्वमेव । तस्मादात्मान्तःकरणसंयोग एव बुध्याद्युत्पत्तावेकार्थसमवायितयाऽसमवायिकारणमिति स्थितम् । तथा कार्ये रूपादि पटे वर्तते पटश्च तन्तुषु तद्गताश्च रूपादयस्तत्रैवेति कार्यकारणैकार्थसमवायस्तेषां प्रत्यासत्तिरिति । नन्वेवमपि तन्तुरूपं रसाद्युत्पत्तौ प्रत्यासन्नम् रसश्च रूपोत्पत्तावित्यसमवायित्वं स्यात् । न जनकत्वमिति विशेषणात् । यद्यस्योत्पत्तौ प्रत्यासन्नं सज्जनकं तदसमवायिकारणम् ,न चैवं रूपं र-

स्याद्युत्पत्तौ कारणं तदनुविधानस्यादर्शनात् । यथाहि शुक्लाद्रूपाच्छुक्लं पीताच्च पीतमिति कारणरूपानुविधानमस्ति । नैवं रसादिनेति, न हि मधुरादम्लाद्वा तच्छुक्लं पीतं वा रूपमित्यन्वयो गृह्यते।तस्मात्प्रत्यासत्तावपि नासमवायित्वं कारणस्य सतस्तद्विशेषनिरूपणात् । न चैवं समवायिकारणे प्रसङ्गस्तस्योक्तप्रत्यासत्त्यभावात् । न हि कार्येण तत्कारणेन च सहैकार्थसमवायस्तस्यास्ति, तत्रैव तत्कार्यस्य समवायात् । तथाहि—रूपरसगन्धानुष्णस्पर्शपरिमाणस्नेहा कार्यकारणैकार्थसमवायादेवासमवायिकारणम् । संख्या तु द्वित्वादिका परिमाणोत्पत्तौ कार्यकारणैकार्थसमवायेनासमवायिकारणम् । तथा कारणैकत्वमेकपृथक्त्वं च कार्यैकत्वैकपृथक्त्वोत्पत्ताविति द्वित्वद्विपृथक्त्वाद्युत्पत्तावेकत्वैकपृथक्त्वादीनां कार्यैकार्थसमवायेनैवासमवायिकारणत्वमेव । एवं शब्दस्यापीत्युक्तम् । एतेषामसमवायिकारणत्वमेव न त्वेतेषामेवान्येषामपि तदभावात् । अत्र चानुष्णग्रहणमुष्णस्पर्शव्यवच्छेदार्थम् , तस्योभयथा कारणत्वात् ।

बुद्ध्यादिभावनान्तानां निमित्तकारणत्वमिति । समवाय्यसमवायिलक्षणरहितस्य जनकत्वम् । न चासिद्धं विशेषणम् प्रत्यासन्नस्य बुद्ध्यादेर्जनकत्वादिति वाच्यम् । पूर्वोक्तन्यायात् । अवधारणं त्वेतेषां निमित्तकारणत्वमेव नन्वेतेष मेव । तथाहि-बुद्धिर्ज्ञानसंस्कारोत्पत्तौ कारणं सुखमिच्छायां दुःखं द्वेषस्येच्छाद्वेषौ प्रयत्नस्य स च क्रियायाः धर्माधर्मौ सुखदुःखयोर्भावानुस्मरणस्येति ।

संयोगादिवेगान्तानामुभयथा कारणत्वमित्यसमवायिनिमित्तकारणत्वमिति । एतेषामेवोभयथा कारणत्वम् , तथैतेषामुभयथा कारणत्वमेवेति नियमेन,तथाहि-भेर्याकाशसंयोगस्यासमवायिकारणत्वम् भेरीदण्डसंयोगस्य निमित्तत्वम्,एवं वंशदलाकाशविभागस्यासमवायिकारणत्वम् वंशदलविभागस्य निमित्तत्वम्,उष्णस्पर्शस्योत्पत्तावसमवायिकारणत्वं भेरीदण्डसंयोगस्य निमित्तत्वम्, एवं वंशदलाकाशविभागस्यासमवायिकरणत्वं वंशदलविभागस्य निमित्तत्वम् , उष्णस्पर्शस्योत्पत्तावसमकारणत्वं पाकजेषु निमित्तत्वम । एवं गुरुत्वद्रवत्ववेगानां स्वाश्रयक्रियोत्पत्तावसमवायिकारणत्वमाश्रयान्तरे निमित्तत्वमिति ।

परत्वापरत्वद्विपृथक्त्वादीनामकारणत्वमित्यादिपदेन त्रिपृथक्-

त्वादीनां ग्रहणम् । नन्वेतेषां ज्ञानाद्युत्पत्तावस्त्येव कारणत्वम् । सत्यम् । तद्व्यतिरेकेणान्यत्राकारणत्वं विवक्षितमिति । समानजातीयारम्भकादिवाक्येऽपीदं विशेषणमूह्यम् । एतेषामकारणत्वमेव, न त्वेतेषामेव पारिमाण्डल्यादेरप्यकरणत्वात् ।

(व्यो०) इदानीं तेषां वृत्तित्वमाश्रयव्यापित्वं चेत्याह—

(भा०) संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वम् ।

शेषाणामाश्रयव्यापित्वम् ।

अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वसांसिद्धिकद्रवत्वगुरुत्वस्नेहानां यावद्द्रव्यभावित्वम् । शेषाणामयावद्द्रव्यभावित्वञ्चेति ।

संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वमाश्रयाव्यापकत्वं विवक्षितम् । न तु प्रदेशोऽवयवे वृत्तिर्निष्प्रदेशानां तदभावप्रसङ्गात् एतेषामेवाश्रयाव्यापित्वमेतेषां प्रदेशवृत्तित्वमेव ।

शेषाणामाश्रयव्यापित्वमित्युक्तेभ्योऽन्ये शेषास्तेषामाश्रयव्यापित्वम् । कथमेतदाश्रयोपलम्भे सति तज्जिघृक्षायामवश्यं ग्रहणम् । यथा पटोपलम्भे रूपजिघृक्षायामवश्यं तद्ग्रहणमिति । येषां त्वाश्रयाव्यापित्वं न तेषामाश्रयोपलम्भे सत्यामपि जिघृक्षायामिन्द्रियार्थसन्निकर्षे चावश्यं ग्रहणमस्ति । यथा पर्वतस्य परभागवर्तिनां संयोगो नावश्यं तदुपलम्भेऽप्युपलभ्यत इति ।

अपाकजादिस्नेहान्तानां यावद्द्रव्यभावित्वमिति । यावद्द्रव्यं भवन्ति तच्छीलाश्चेति तद्भाविनस्तेषां भावो यावद्द्रव्यभावित्वं आश्रये सत्यविनाशित्वमिति यावत् ।

शेषाणामयावद्द्रव्यभावित्वमिति । उक्तेभ्यो अन्ये शेषास्तेषां सत्यप्याश्रये विनाश इति ।

(व्यो०) अथेदानीं वैधर्म्यं प्रतिनियतमाह—

(भा०) रूपादीनां सर्वेषां गुणानां प्रत्येकमपरसामान्यसम्बन्धाद्रूपादिसंज्ञा भवन्ति ।

रूपादीनां सर्वगुणानां प्रत्येकमपरसामान्यसम्बन्धाद्रूपादिसंज्ञा·

भवन्तीत्यादि । रूपमादिर्येषां ते रूपादयः तेषाम् । न ज्ञायते कियतामतः सर्वगुणानामिति । सर्वे च ते गुणाश्चेति सर्वगुणास्ते च रूपादय एवाभिप्रेता नान्य इति । तेषामेकमेकं प्रति प्रत्येकमपरसामान्यसम्बन्धादिति । गुणत्वापेक्षया परसामान्यं रूपत्वादि तत्सम्बन्धाद्रूपादिसंज्ञा भवन्ति रूपत्वसम्बन्धाद्रूपमिति संज्ञा रसत्वसम्बन्धाच्च रस इति । एवमन्येष्वपीति । न चैवं पृथिव्यादावप्येकस्मिन्नेवाधिकारे तत्संज्ञानिरूपणं कार्यमिति वाच्यम् । अपरसामान्यसम्बन्धस्य सर्वत्रासम्भवात् । अत्र च सर्वेष्वपरं सामान्यमस्तीति युक्तमेकत्र संज्ञानिरूपणम् ॥

(व्यो०) तत्रादावुद्दिष्टत्वाद्रूपस्य सद्भावे प्रमाणं लक्षणमाश्रयमर्थक्रियाभेदं नित्यत्वमुत्पत्तिविनाशकारणञ्च दर्शयन्नाह--

(भा०) तत्र रूपं चक्षुर्ग्राह्यम् । पृथिव्युदकज्वलनवृत्ति द्रव्याद्युपलम्भकं नयनसहकारि शुक्लाद्यनेकप्रकारं सलिलादिपरमाणुषु नित्यं पार्थिवपरमाणुष्वग्निसंयोगविरोधि सर्वकार्यद्रव्येषु कारणगुणपूर्वकमाश्रयविनाशादेव विनश्यतीति ॥

रूपं चक्षुर्ग्राह्यमित्यादिना । तत्र रूपमेव चक्षुर्ग्राह्यम् न रसादि रूपं चक्षुषैव गृह्यतेऽन्येन्द्रियपरिच्छेद्यं न भवतीत्यवधारणस्य प्रक्रमापेक्षितया न द्रव्यादौ चक्षुर्ग्राह्यत्वप्रतिषेधः । तथाहि-द्रव्यादेश्चक्षुर्ग्राह्यत्वसिद्धावनेकद्रव्येण (द्रव्येण) समवायात् स्वगतविशेषाच्च रूपं प्रत्यक्षम् । एतेन रसादिषु ज्ञानं व्याख्यातमित्यतिदेशे चक्षुर्ग्राह्यत्वाशङ्कायां तद्व्यवच्छेदार्थमेवावधारणम् । न द्रव्यादौ तद्वृत्तिप्रतिषेधपरम् । अभिप्रेतञ्च समुद्गीयमानावधारणं शाक्यैरिति वक्ष्यामो लैङ्गिकज्ञाने । सूत्रार्थस्त्वनेकं द्रव्यं जनकमस्येतीत्यनेकद्रव्यं तेन सह समवायात् स्वगतविशेषनियतसद्भावे क्वचिद्रूपोपलब्धिर्यदभावाच्चानुपलब्धिः । स एव सहकारिविशेषोऽपदिश्यते । तस्माच्च रूपं प्रत्यक्षम् । एतच्च रसनादिप्रत्यक्षत्वे समानमिति । पृथिव्युदकज्वलनवृत्तीत्याश्रयनिरूपणम् । पूर्वपदापेक्षं वा लक्षणमिति । तथाहि—चक्षुर्ग्राह्यत्वं द्रवत्वस्याप्यस्तीति चक्षुषैव गृह्यत इति विशेषणम् । त-

थापि चक्षुषैव गृह्यते रूपत्वसामान्यमिति पृथिव्युदकज्वलनवृत्ति-पदम्। पृथिव्यादिवृत्तित्वं चान्येषामप्यस्तीति नियमग्रहणम्। अतो रूपमितरस्माद् भिद्यते नियमेन पृथिव्युदकज्वलनवृत्तित्वे सति चक्षुषैव गृह्यमाणत्वात्, यस्तु न भिद्यते न चासावेवम्, यथा रसादिरिति। द्रव्याद्युपलम्भकमित्यर्थक्रियाकथनम्। द्रव्यादीनुपलम्भयतीति द्रव्याद्युपलम्भकम् द्रव्योपलब्धेः कारणमिति। तथाहि—महत्त्वादनेकद्रव्यवत्त्वाद्रूपविशेषाच्च द्रव्यप्रत्यक्षं तत्समवायाच्च गुणादयोऽपि प्रत्यक्षा इत्युपलब्धौ रूपविशेषस्य कारणत्वमुक्तम्। पूर्वपदापेक्षमेतल्लक्षणमभ्यूह्यम्। नयनसहकारीति स्वगतरूपोत्कर्षात् बाह्यरूपप्रकाशकमित्युपदर्शयति। न च पूर्वेणाविशेषः। करणस्थस्य रूपोत्कर्षस्याभिधानात्। प्राक्तनेन तु कर्मगतस्येति। शुक्लाद्यनेकप्रकारमिति भेदनिरूपणम्। तदप्यसाधारणमेव सलिलादिपरमाणुषु नित्यमुत्पत्तिविनाशकारणाभावात्। पार्थिवपरमाणुष्वग्निसंयोगविरोधीत्यग्निसंयोगेन विरोधो विनाशोऽस्येति। न चानुत्पत्तिमतो विनाशः सम्भवतीत्यन्यस्योत्पत्तिविनाशकारणस्याभावादग्निसंयोगादेवोत्पद्यते सर्वकार्येषु कारणगुणपूर्वकप्रक्रमेणोत्पत्तिराश्रयविनाशादेव विनाश इति वक्ष्यामो रूपपरीक्षायाम्॥

(भा०) रसो रसनग्राह्यः पृथिव्युदकवृत्तिः जीवनपुष्टिबलारोग्यनिमित्तम्। रसनसहकारी मधुराम्ललवणकटुकषायतिक्तभेदभिन्नः। अस्यापि नित्यानित्यत्वनिष्पत्तयो रूपवत्॥

(व्यो०) रसो रसनग्राह्य इति सद्भावे प्रमाणम्। पृथिव्युदकवृत्तीत्याश्रयनिरूपणम्। पूर्वपदापेक्षं वा लक्षणमिति। तथाहि—पृथिव्युदकवृत्तित्वमन्येषामप्यस्तीति रसनग्राह्यपदम्। रसनग्राह्यञ्च रसत्वादिसामान्यं भविष्यतीति पृथिव्युदकवृत्तिपदम्। अतो रस इतरस्माद्भिद्यते पृथिव्युदकवृत्तित्वे सति रसनग्राह्यत्वात्। यस्त्वितरस्माद्रसादेर्न भिद्यते न चासावेवम्, यथा गन्धादिरिति। जीवनपुष्टिबलारोग्यनिमित्तमित्यर्थक्रियानिरूपणम्। जीवनं तूपभोगदायककर्मसचिवस्यात्मनः स्वशरीरावच्छेदेन मनसा संयोगः। तस्य तु निमित्तम् शरीराप्यायननिमित्तत्वात्पुष्टिरवयवोपचयः। सा

च विशिष्टरसोपयोगात् भवतीति । तथाहि–रसोपयोगादान्तरेण तेजसा पूर्वद्रव्यनिवृत्तौ स्वतन्त्रेषु परमाणुषु श्यामादिनिवृत्तिद्वारेणोत्पन्नपाकजैर्द्व्यणुकादिप्रक्रमेण शरीरारम्भः प्रतिक्षणमाहारोपयोगे सति द्रष्टव्यः । न चाऽस्यारम्भकवादः सम्भवतीत्युक्तम् पृथिव्यधिकारे । बलमुत्साहस्तस्य प्राणसम्वर्धनद्वारेण निमित्तमारोग्यं रोगाभावस्तस्यापि निमित्तं विशिष्टरसोपयोगे सति तच्छ्रवणात् । रसनसहकारीति । स्वगतरसोत्कर्षात् बाह्यरसस्याभिव्यञ्जक इत्युक्तं पूर्वम् । मधुराम्ललवणतिक्तकटुकषायभेदभिन्न इति विभागः । सोऽप्यसाधारणत्वात् लक्षणम् । तस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववदिति । सलिलपरमाणुषु नित्यं पार्थिवेष्वग्निसंयोगादुत्पद्यते विनश्यति च । कार्येषु कारणगुणपूर्वः आधारविनाशादेव विनश्यतीत्यतिदेशार्थः ।

(भा०) गन्धो घ्राणग्राह्यः । पृथिवीवृत्तिः घ्राणसहकारी सुरभिरसुरभिश्च । अस्यापि पूर्ववदुत्पत्त्यादयो व्याख्याताः ॥

(व्यो०) गन्धो घ्राणग्राह्य इति सद्भावे प्रमाणम् । पृथिवीवृत्तिरित्याश्रयनिरूपणम् । पूर्वपदापेक्षं वा लक्षणम् । तथाहि–घ्राणग्राह्यत्वं गन्धत्वादेरप्यस्तीति पृथिवीवृत्तिरिति विशेषणम् । पृथिवीवृत्तित्वमन्यस्याप्यस्तीति घ्राणग्राह्यपदम् । घ्राणग्राह्यत्वे सति पृथिवीवृत्तित्वं लक्षणमिति । घ्राणसहकारीति स्वगतगन्धोत्कर्षात् बाह्यगन्धप्रकाशकमित्यर्थक्रियानिरूपणम् । पुनरपि सुरभिरसुरभिश्चेति विभागः । अस्याप्युत्पत्त्यादयः पूर्ववदिति । परमाणुष्वग्निसंयोगादुत्पद्यते विनश्यति च । कार्ये तु कारणगुणपूर्वकः आधारविनाशादेव विनश्यतीत्यतिदेशार्थः ॥

(भा०) स्पर्शस्त्वगिन्द्रियग्राह्यः । क्षित्युदकज्वलनपवनवृत्तिः त्वक्सहकारी रूपानुविधायी । शीतोष्णानुष्णाशीतभेदात् त्रिविधः । अस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववत् ॥

(व्यो०) स्पर्शस्त्वगिन्द्रियग्राह्य इति प्रत्यक्षपरिच्छेद्यत्वं

दर्शयति । पृथिव्युदकज्वलनपवनवृत्तिरित्याश्रयनिरूपणञ्च चतुर्णां स्पर्शवत्त्वमित्यनेन न पुनरुक्तम् । तत्र द्रव्यधर्मस्याभिधानात् इह तु स्पर्शधर्मस्येति । पूर्वपदापेक्षं वा लक्षणम् । तथा च पृथिव्यादिवृत्तित्वमन्येषामप्यस्तीति त्वगिन्द्रियग्राह्यपदम् । तद्ग्राह्यञ्च स्पर्शत्वादिसामान्यमिति पृथिव्यादिवृत्तिपदम् । यदि संख्यादीनामपि त्वगिन्द्रियग्राह्यत्वे सति नियमेन पृथिव्यादिवृत्तित्वं सम्भाव्येत अवधारणं कार्यम् । स्पर्श इतरस्मात् भिद्यते त्वगिन्द्रियग्राह्यत्वे सति नियमेन पृथिव्यादिचतुर्द्रव्यवृत्तित्वात्, यस्त्वितरस्मान्न भिद्यते न चासावेवम्, यथा रूपादिरिति । त्वक्सहकारीति । स्वगतस्पर्शोत्कर्षात् त्वगिन्द्रियग्राह्यस्पर्शप्रकाशकमित्यर्थक्रियानिरूपणम् । अथ त्वगिन्द्रियं स्पर्शस्य प्रकाशकम् कस्मात्? संयुक्तसमवायात् । त्वगिन्द्रियेण संयुक्तं द्रव्यं तत्समवायात् स्पर्शो गृह्यत इति । नन्वेवं संयुक्तसमवायस्याविशेषाद्रूपादिप्रकाशकमपि स्यात्, विशेषो वा वाच्यः । तन्न स्पर्शोत्कर्षवत् रूपाद्युत्कर्षस्याभावात् । तथाहि–रूपादिषु मध्ये स्पर्शस्यैवोपलम्भादन्यथानुपपत्त्या ज्ञायते नियामकं कारणम्, नियमहेतुं विना नियतस्य कार्यस्यानुपपत्तेः । तत्र स्पर्शोत्कर्षो नियामकः स्पर्शत्वं वा विषयगतम् । न चैतद्रूपादिषु सम्भवतीति स्पर्शत्वस्य तत्रासम्भवात् । रूपाद्युत्कर्षस्यापि त्वगिन्द्रियेण कार्याभावेनैवाभावप्रसिद्धेः । तथाच सूत्रकारेणाप्युक्तम् । रूपादिषु स्पार्शनं ज्ञानमिति कस्मान्न भवतीति, तदभावात् स्पर्शत्वसामान्यस्याभावात्, यत्रैव स्पर्शत्वसामान्यं तत्रैव स्पार्शनं ज्ञानमिति । व्यतिरेको लभ्यत एव स्पर्शत्वाभावस्तु त्वग्ग्राह्यत्वाभावस्य ज्ञापको न कारक इति । न च विशिष्टसन्निकर्षव्यतिरेकेणान्या योग्यता सम्भाव्यते । अन्वयव्यतिरेकाभ्यां तस्यैव व्यापारोपलब्धेरित्यलम् ।

रूपानुविधायीति साहचर्यं दर्शयति । रूपमनुविदधाति तच्छीलश्चेति तदनुविधायी यत्र रूपं तत्रावश्यं स्पर्श इति । एवं रसगन्धानुविधायित्वमपीति । शीतोष्णानुष्णाशीतभेदात्त्रिविध इति विभागकथनम् । असाधारणस्यापि नित्यानित्यत्वनिष्पत्तयो रूपवदिति । सलिलादिषु परमाणुषु नित्यः पार्थिवेष्वग्निसंयोगाविरोधी कार्येषु कारणगुणपूर्वस्तद्विनाशात् विनश्यतीत्यतिदेशार्थः ॥

(भा०) पार्थिवपरमाणुरूपादीनां पाकजोत्पत्तिविधानम् । घटादेरामद्रव्यस्याग्निना सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भकेष्वणुषु कर्माण्युत्पद्यन्ते तेभ्यो विभागाः विभागेभ्यः संयोगविनाशाः संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति । तस्मिन् विनष्टे स्वतन्त्रेषु परमाणुष्वग्निसंयोगादौष्ण्यापेक्षाच्छ्यामादीनां विनाशः पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते ।

तदनन्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद्द्व्यणुकादिक्रमेण कार्यद्रव्यमुत्पद्यते । तत्र च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः । न च कार्यद्रव्य एव रूपाद्युत्पत्तिर्विनाशो वा सम्भवति सर्वावयवेष्वन्तर्बहिश्च वर्तमानस्याग्निना व्याप्त्यभावात्, अणुप्रवेशादपि च व्याप्तिर्न सम्भवति कार्यद्रव्यविनाशादिति ॥

(व्यो०) अथेदानीं 'पार्थिवपरमाणुरूपादीनाम्' इति परीक्षाशेषनिवर्तनाप्रकरणम् । तथाहि-रूपादीनां पूर्वमुद्देशलक्षणपरीक्षाभिधानेऽपि स्पर्शो न परीक्षितः प्रतिज्ञातं च तदंशपरीक्षार्थमिदमारभ्यते । पृथिव्या इमे पार्थिवाः । ननु चात्र भेदानुपपत्तेः कथं षष्ठी, तद्धितप्रत्ययश्चेति । तयोर्भेदे सत्युपलम्भात् । न, कार्यरूपायाः पृथिव्याः विवक्षितत्वात् तज्जनकाश्च परमाणवः ततो भिन्ना एवेति पार्थिवा इत्युच्यन्ते । जातिर्वा पृथिवीशब्देन विवक्षिता । तस्या इमे तत्सम्बन्धिनः पार्थिवाः । ते च ते परमाणवश्च तेषां रूपादय इति । आदिपदेन रसगन्धस्पर्शा एव गृह्यन्ते, न संख्यादयस्तत्परीक्षाशेषपरत्वेनैव सम्बन्धात् । अतस्तेषां पाकजोत्पत्तिविधानं प्रकार इति । अथ पाकाज्जाताः पाकजा इत्युत्पत्त्यर्थस्य जनिना प्रतिपादितत्वाद्व्यर्थमुत्पत्तिग्रहणम् । नोत्तरपदेन सम्बन्धात् । तथाहि-पाकजानामुत्पत्तिरेव विधी-

यते अनेनेति विधानं प्रमाणमुपेयम् । पूर्वगुणाविलक्षणानां रूपादीनामुत्पत्तिः कार्ये सैव प्रमाणमिति वक्ष्यामः । यदि वा पच्यतेऽनेनेति पाकः तेजोद्रव्यं पच्यत इति वा पाकः पार्थिवपरमाणवश्चेति पाकौ ताभ्यां जातः पाकजः पार्थिवपरमाण्वग्निसंयोगः तस्मादुत्पत्तिः पार्थिवपरमाणुरूपादीनां श्यामादिविनाशश्चेत्युत्तरवाक्यसामर्थ्यात् ।

अन्ये तु श्यामादिविनाशोऽध्याहारेण लभ्यत इति मन्यमानाः पच्यतेऽनेनेति पाकोऽग्निसंयोगः तस्माज्जातः पाकजः श्यामादिविनाशः तत एव पाकादुत्पत्तिर्विशिष्टरूपादीनामिति कष्टव्याख्यानं कुर्वते। तच्चासद् । अध्याहारादेर्दूषणस्यापरिहारात् । न चाभिव्यक्तिनिवृत्त्यर्थं उत्पत्तिग्रहणमिति वाच्यम् । परमतस्याप्रसिद्धत्वात् । अथ केन प्रकारेण पाकजाः जायन्त इत्युपदर्शयति—घटादेरामद्रव्यस्येत्यादिना । घटादेरित्यादिपदेन शरीरादेरवरोधः । तत्र हि पाकजोत्पत्तिपरिज्ञानात्तदासक्तिनिवृत्तौ विरक्तस्य श्रेयः संपद्यत इति । आमद्रव्यस्येति पक्वव्यवच्छेदार्थम् । यद्यपि पार्थिवपरमाणुस्वहेतुकस्य रूपादेरसम्भवात्तेपि पाकादुत्पन्नाः, तथापि विशिष्टरूपापेक्षया श्यामादय उच्यन्ते । तदाश्रयश्यामद्रव्यस्य य आरम्भकाः पारम्पर्येण परमाणवस्तेषु कर्माण्युत्पद्यन्ते । कुतः ? अग्न्यभिघातान्नोदनाद्वा । अभिघातस्तु वेगापेक्षः परस्परविभागहेतोरेकस्य कर्मणः कारणम् । नोदनं त्वविभागहेतोरनेकस्येति वक्ष्यामः कर्माधिकारे ।

अन्ये तु घटस्यादिर्द्व्यणुकं तदारम्भकाः परमाणवः साक्षादिति मन्यन्ते । तत्र कर्मोत्पत्तावणवः समवायिकारणं तत्संयोगोऽसमवायिकारणं वेगादि निमित्तकारणमिति । तेभ्यो विभागास्ते तु द्रव्यारम्भकसंयोगप्रतिबन्दिनः । तत्राप्यसमवायिकारणं कर्म परमाणवोः समवायित्वं शेषं निमित्तकारणमिति । विभागेभ्यः संयोगविनाशाः । तत्र समवाय्यादिकारणमुपलब्धेर्निमित्तादेवोत्पत्तिः । न ह्यभावः समवेतः क्वचिदुत्पद्यमानो दृष्टः । अत एवात्रासमवायिकारणं नास्त्ययं कार्यसमवायाभावात् । निमित्तकारणं त्वन्वयव्यतिरेकाभ्यां व्याप्रियमाणं तदुत्पत्तावुपलब्धम् । संयोगविनाशेभ्यः कार्यद्रव्यं द्व्यणुकलक्षणं विनश्यतीति जात्यपेक्षयैकवचनम् । तस्मिन् विनष्टे परमाणुष्वन्यस्मा-

दग्निसंयोगाच्छ्यामादीनां निवृत्तिः । पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते । तत्र परमाणुः समवायिकारणमग्निसंयोगोऽसमवायिकारणमुष्णस्पर्शो निमित्तकारणमिति । तदनन्तरं-रक्ताद्युत्पत्तिक्षणानन्तरम्, उत्पन्नपाकजेष्वणुषु समवेतानि कार्याण्युत्पद्यन्ते। असमवायिकारणमाह आत्माणुसंयोगाददृष्टापेक्षात् । अदृष्टञ्च केषामित्याह-भोगिनामिति । कर्मोत्पत्तौ सत्यामनन्तरं विभागाः तेभ्यः संयोगविनाशाः ततः परमाणूनां परस्परेण संयोगाद्द्व्यणुकान्युत्पद्यन्ते । तत्र परमाण्वोः समवायित्वं तत्संयोगस्यासमवायिकारणत्वं शेषं निमित्तमिति तदादिक्रमेण कार्यमुत्पद्यत इति । त्रिभिर्द्व्यणुकैस्त्र्यणुकमारभ्यते त्र्यणुकैश्चानियमेन स्वकार्यं । तावत् यावद्घटः । सर्वत्र कारणगुणपूर्वप्रक्रमेण रूपाद्युत्पत्तिरिति ।

ननु सर्वमेतदसम्बद्धम् । एतस्मिन् क्रमे प्रमाणाभावात् । तथाहि-परमाणौ क्रियायाः सद्भावे प्रमाणाभावात् । तत्कार्यस्यासिद्धौ तद्द्व्यणुकस्य विनाशे प्रमाणमस्ति । अग्निसंयोगस्य नानात्वं द्रव्यविनाशे श्यामादिनिवृत्तौ रक्ताद्युत्पत्तावुत्पन्नपाकजेषु क्रियाक्रमेण तद्द्व्यणुकस्यैवोत्पत्तिरिति सर्वं प्रमाणशून्यमेव । बाधकोपपत्तेश्च । तथा ह्यापाकनिक्षिप्तेषु घटादिषु कुलालस्य छिद्रप्रदेशेन निरीक्षमाणस्याक्षजं विज्ञानम्—घटः पश्यत इति । न चेदं संशयविपर्ययस्वरूपम्, तल्लक्षणालक्षितत्वात्, बाधकानुपपत्तेश्च । तथा पाकोत्तरकालं स एवायं घट इत्यबाध्यमानस्य प्रत्यभिज्ञानस्योपलब्धेरवस्थानम्, उपरिस्थापितानां च तृणकर्परादीनामपातात्वावस्थायित्वम् । यदि हि परमाणवः पच्येरन्नूर्ध्वावस्थापितानां कर्परादीनां पातः स्यात् । परमाणूनां च धारणसामर्थ्याभावात्, तद्देशत्वतत्परिमाणत्वतत्संख्यात्वोपलब्धेश्च । यदि चोत्पन्नपाकजाः परमाणवो द्व्यणुकादिप्रक्रमेण घटादिकमारभेरन् तद्देशं तावत्परिमाणं तत्संख्या च न स्यान्नियमहेतोरभावात् । दृष्टश्चायं नियमः—तस्मिन्नेव देशे तावत्परिमाणं तत्संख्या च । एवं घटादीनामवस्थायित्वम् । न च घटादेर्विनाशे कर्मादिभिर्विना पुनरुत्पत्तिर्युक्ता । अथेश्वरादेः सद्भावाद्युक्तमिति चेत् तथाहीश्वरः कर्ता कारणमदृष्टादिपरिमाणुकर्मेति । नैतद्युक्तम् । क्षित्यादिकार्येष्विवास्मदादिसम्बन्धादितः कार्यानपेक्षस्य घटादिसम्पादनेऽपि सामर्थ्यानिवृत्तेः कुलालव्यापार-

वैयर्थ्यमेव स्यात् । आवरणाभावश्च । तथाहि—वेगाद्द्रव्यस म्बन्धादवयवक्रियाक्रमेण घटादेर्विनाशस्तथा वेगवच्चक्षुःसम्बद्धात् काचाभ्रस्फटिकादेः क्रियाक्रमेण विनाशे तद्व्यवहितेन सम्बद्धस्य चक्षुषः प्रकाशकत्वमित्यावरणाभावः स्यात्। अथ स्वच्छतया स्फ टिकादिद्रव्यमिन्द्रियव्यवधायकं न भवतीत्युपपन्नमेवावृतस्यापि ग्रहणम्। तर्हि घटादिद्रव्यमपि तथा स्वभावतया तेजोद्रव्यव्यव धायकं न भवतीत्यणुप्रवेशादन्तर्देशेऽप्युपपद्यत एव पाकः। अन्य था ह्यावृतानावृतयोस्तुल्योपलब्धिः स्यात्। आवरणाभावस्योभ यत्राविशेषात्। यदि चाणुप्रवेशाद्द्रव्यस्य विनाशः, तर्हि बहिर्देशे शी तस्पर्शोपलम्भाऽन्यथानुपपत्त्योदकस्य निःसरणादाधारस्य विनाशे तत्पातः स्यात्। अथ सिद्धं द्रव्यमित्युदकस्य निःसरणम्, तर्हि त न्मार्गेणैव तेजोऽणुप्रवेशादन्तर्देशे पाकः सम्पद्यत इति किं तद्विनाशे नेत्यलम्।

सर्वमेतदबोधकमनैकान्तिकत्वात्। तथा ह्युदकपरिपूर्णे घटे वेगवत्सूचीद्रव्यसम्बन्धादवश्यं कण्ठप्रदेशे क्रिया। सा चोत्पन्ना द्रव्यारम्भकसंयोगप्रतिद्वन्द्विनं विभागमारभत इति प्रत्यक्षसिद्धम्। तस्मात् संयोगविनाशे तदारब्धस्य द्रव्यस्य निवृत्तिस्तस्यापि द्र व्यान्तरारम्भकत्वात्तन्निवृत्तौ तदारब्धनिवृत्तिरिति विनाशकारणसा न्निध्यात् घटस्य विनाशः। अन्यथा हि विनाशकारणसान्निध्येऽप्यवि नाशे कार्यस्य नित्यत्वमेव स्यात्। उपलभ्यते तु घट इत्यवस्थितसं योगैर्द्रव्यान्तरारम्भो निश्चीयते। तत्र च प्रत्यक्षं स एवायमिति प्रत्यभिज्ञानम् न व्यावृत्तमुपरिस्थापितस्य द्रव्यस्य पातः तद्देशत्वं तत्संख्यात्वं तत्परिमाणत्वं प्रत्यक्षेण च कर्त्रादेरनुपलब्धिस्तत्रास्ती त्यनेकान्तादसाधनम्। न च घटस्य विनाशेऽप्युदकस्यानाशितत्वं पातो वा दृश्यत इति। अथ परमाणुषु पाकजा जायन्त इति किम त्रास्मदादीनां प्रमाणम्। घटादिषु पूर्वगुणविलक्षणस्य गुणान्त रस्योत्पाद इति। स च घटादिषु वर्तमानः कथं परमाणुषु पाकजा जायन्त इति गमयेत्। तत्राग्निसंयोगेन तस्यानुपपत्तेः। तदेवाह—न च कार्यद्रव्ये रूपादिविनाशो उत्पत्तिर्वाऽन्यथा सम्भवति, कस्मात्? सर्वावयवेष्वन्तर्बहिश्च वर्तमानस्याग्निना व्याप्त्यभावात्। तथा ह्य वयवी सर्वावयवेष्वन्तर्बहिश्च वर्तते। न चान्तर्देशेऽग्नेरनुप्रवेशोऽस्ती

ति व्याप्त्या सम्बन्धाभावादपाकप्रसङ्गः । अथ सूक्ष्मस्य तेजसोनुप्रवेशादन्तर्देशे पाकः सम्पद्यत इत्याह—अणुप्रवेशादपि व्याप्तिर्न सम्भवति । कस्मात् ? कार्यद्रव्यविनाशादिति । तथाहि—वेगवद्द्रव्यसम्बन्धस्यान्यत्र क्रियाहेतुत्वेनोपलम्भादिहाप्यवयवे क्रिया, सा चावयवान्तरेण विभागं द्रव्यारम्भकसंयोगप्रतिद्वन्द्विनमारभते । तस्मात् संयोगनिवृत्तौ तदारब्धस्य कार्यद्रव्यस्य विनाशे तदारब्धस्यापि निवृत्तिरिति क्रमेण घटस्याप्यवश्यं विनाशः । अथ घटावयवाः पच्यन्ते । तत्राप्यन्तर्देशे पाको न स्यादिति तेजोणुप्रवेशेन विनाशः । तदेवमुत्तरोत्तरावयवेष्वग्न्यणुप्रवेशात्तद्विनाशे स्वतन्त्राः परमाणवः पच्यन्ते । न च कार्यद्रव्ये पूर्वरूपादीनामवस्थाने रक्ताद्युत्पत्तिः स्यात् गुणवति गुणान्तरप्रतिषेधादतो रक्ताद्युत्पत्त्यन्यथानुपपत्त्या ज्ञायते पूर्वरूपादिनिवृत्तिः । सा चाश्रयविनाशादेव कार्यद्रव्ये । तथाच सूत्रम्—"रूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्या" इत्याश्रयविनाशेन विनाशोऽभिहितः। कार्यद्रव्ये अग्निसंयोगाच्च । एतेन नित्येष्वनित्यत्वं व्याख्यातमित्यग्निसंयोगस्य नित्येष्वेव रूपादिनिवर्तकत्वमुक्तम् । अतः कार्यद्रव्ये गुणान्तरप्रादुर्भावात् पूर्वरूपादिनिवृत्तिर्ज्ञायते । सा चाश्रयविनाशादेवाग्निसंयोगस्य नित्यविषयत्वेन नियमात्। एवं कपालानामप्यवस्थाने पूर्वरूपाद्यनिवृत्तौ रक्ताद्युत्पत्तिर्न स्यात् । अतः कार्येऽपि कारणरूपानुविधायितया श्यामादिकमुत्पद्यते। तदेवं तत्कारणकारणेष्वपि पूर्वगुणविलक्षणस्य गुणान्तरस्योत्पत्तिर्वाच्या । अन्यथा हि तत्कार्यकार्येष्वपि न स्यात् । सा चोत्पत्तिः पूर्वरूपादीनामवस्थाने न घटते । गुणवति रूपारम्भप्रतिषेधादिति पूर्वरूपादिनिवृत्तिर्वाच्या । सा चाश्रयविनाशादेवेति सकलस्यापि कार्यद्रव्यस्यापि विनाशः ।न च परमाणुष्वपि पूर्वरूपादीनामवस्थाने रक्ताद्युत्पत्तिः स्यात्। तदभावाद्द्व्यणुकस्यापि कारणगुणपूर्वक्रमेण श्यामादिकमेवोत्पद्यत इति विलक्षणरूपाद्यसम्भव एव । दृष्टश्च कार्ये गुणान्तरप्रादुर्भावः तेन परमाणुषु रूपादिवृत्तौ रक्ताद्युत्पत्तिरिति । न च तत्राश्रयस्य विनाशः सम्भवति इत्यग्निसंयोगस्यैव निवर्तकत्वम्, कारणान्तरस्यासम्भवात् तस्यैवोत्पादकत्वमिति । यदपि 'इदं सच्छिद्रद्रव्य'मित्युक्तम् । तत्र यदि कपालरन्ध्रोपक्षयान्तर्देशे पाको न स्यात् । अथ तदवयवरन्ध्रापेक्षया तस्यान्तर्देशे पाका-

भावस्तदेवमुत्तरोत्तरावयवेष्वपि वाच्यम् तावद्यावद्व्यणुकम्। अथ तस्यान्तर्देशाभावात्पाको भविष्यतीति। न, तस्यापि वेगवदग्निसम्बन्धेनावश्यं विनाशोपपत्तेः। श्यामादिविनाशं च विना रक्ताद्युत्पत्तिर्न स्यात्। तद्विनाशश्चाश्रयविनाशादेवेत्युक्तं पूर्वम्। स च संयोगविनाशात्सोपि विभागाद्विभागश्च क्रियात इति, गुणान्तरप्रादुर्भाव एव क्रियादिक्रमाश्रितत्वे प्रमाणमिति। अत्र तु प्रयोगः—पार्थिवपरमाणुरूपादयः संयोगजाः विभागजशब्दजशब्दान्यत्वानित्यत्वे सति नित्यविशेषगुणत्वात्, सुखादिवत्। विभागजशब्दशब्देन व्यभिचारपरिहारार्थं तदन्यत्वे सतीति। सत्वादिपरमाणुरूपादिव्यवच्छेदार्थं चानित्यपदम्। सामान्यगुणव्यवच्छेदार्थं विशेषगुणग्रहणम्। अनित्यव्यवच्छेदश्च नित्यपदेनेति।

अन्ये तु घटादिगता रूपादयः पारम्पर्येणाग्निसंयोगजाः साक्षाद्घटमानत्वे सति अग्निसंयोगतद्भावभावित्वेनोत्पद्यमानत्वात् श्रूयमाणअग्निशब्दवदित्यनुमानं ब्रुवते। न चासिद्धं विशेषणमुक्तन्यायात्। यच्चेदं–'अग्निसंयोगस्य नानात्वे प्रमाणाभाव' इति–एतदसत्। तस्यैव कार्यभेदेन नानात्वोपचारात्। यदि श्यामादिनिवर्तिका वह्नौ क्रियोत्पन्ना यदा प्राक्तनाऽऽकाशादिदेशेन विभागमारभते तदैव तदवयवे रक्ताद्युत्पादके च वह्नौ कर्मेत्येकः कालः। ततो विभागात्संयोगविनाशोऽवयवकर्मणा चावयवान्तराद्विभागः क्रियते रक्ताद्युत्पादकाग्निकर्मणा चाकाशादिदेशेनेत्येकः कालः। ततः श्यामादिनिवर्तकस्याग्नेः परमाणुना संयोगः श्यामादीनां विनश्यत्ता अवयवविभागाच्च द्रव्यारम्भकसंयोगविनाशः श्यामाद्युच्छेदकस्याग्नेः विनश्यत्ता रक्ताद्युत्पादस्याग्नेः प्राक्तनसंयोगविनाशः परमाणुना च संयोगस्योत्पद्यमानतेत्येकः कालः। ततः श्यामादीनां विनाशः तदुच्छेदकस्याग्नेर्विनाशः कर्मसंयोगस्य विनश्यत्ता रक्तादिजनकस्याग्निसंयोगस्योत्पादो रक्तादीनामुत्पद्यमानतेत्येकः कालः। ततो रक्तादीनामुत्पादः। श्यामादिनिवर्त्तकाग्निसंयोगस्य विनाश इत्यग्निसंयोगस्य नानात्वम्। न च श्यामाद्युच्छेदकाग्निसंयोगस्य विनश्यदवस्थत्वाद्रूपाद्युत्पत्तावसमवायिकारणत्वमिति।

अन्ये तु श्यामादिनिवर्तकस्याग्नेः कर्मसमकालं तदवयवेपि कर्मसञ्चिन्तनाच्छ्यामादिनिवृत्तिसमकालमेव तत्संयोगस्य विनाश

इति ब्रुवते ।

अथोत्पन्नपाकजेषु क्रियाक्रमस्य सद्भावे किं प्रमाणम् । कार्यद्रव्यस्योत्पत्तिरेव । अन्यथा हि क्रियामन्तरेण परस्परमप्राप्तानां द्रव्यारम्भकत्वं न स्यात् । अथ परमाणूनां द्व्यणुकारम्भकत्वमेवेति प्रमाणाभावस्तन्नैकत्वमितरवत् बहुत्वपक्षे बाधकसद्भावाद्द्वित्वसंख्योपेतानामेवारम्भकत्वप्रसिद्धेः । तथाहि बहूनामारम्भकत्वे शतादिसंख्योपेतानामप्यारम्भकत्वमेव स्यात् । एवं च सति घटादिकार्यं परमाणुभिरारब्धमिति चेत् । भङ्गेऽवान्तरकार्यस्यानुत्पन्नत्वात् उपलंभो न स्यात्, उपलभ्यते तु घटस्य विनाशे तदवयवा इति । तदवयवेऽपि तदवयवा इति द्व्यणुकादिक्रमणारम्भो निश्चीयते । अथ द्रव्याणि द्रव्यान्तरमारभन्ते, संयोगानां द्रव्यमिति च सूत्रव्याघातः । न, द्विवचनबहुवचनाभ्यां विग्रहाश्रयत्वात् । तथाहि-द्रव्ये च द्रव्याणीत्येकशेषः । कार्यद्रव्यापेक्षया तु बहुवचनम् । बहूनि कार्यद्रव्याण्येव द्रव्यमारभन्ते । द्वित्वसंख्योपेतान्येव च नित्यानि न तु नित्यान्येव कार्यद्रव्येऽपि सद्भावात् । न चैकस्य क्रमयौगपद्याभ्यामारम्भकत्वमेकस्वभावात् । तथा ह्येकः परमाणुर्न क्रमेण कार्यं करोति, समर्थस्याक्षेपायोगात् । युगपत् कृत्वा पुनरकरणे हेत्वभावः । न च समानपरिमाणतायां कार्यकारणभावो दृष्टः, क्षणभङ्गप्रतिषेधात् कारणविभागाभावाद्विनाशित्वं कार्यद्रव्यस्य च प्रसज्यते । तथा संयोगश्च संयोगौ च संयोगाश्चेति संयोगास्तेषां द्रव्यं कार्यमिति । नित्यापेक्षया संयोगस्यैव कार्यद्रव्ये चानियम इत्यविरोधः । तदेवं द्वित्वसंख्योपेताः परमाणवः कार्यद्रव्यमारभन्ते । एकत्वबहुत्वपक्षे बाधकप्रमाणसद्भावे सत्यारम्भकत्वात् । द्वित्वं तु द्व्यणुकारम्भकतन्तुद्वितयवत् । न हि बहुभिस्तन्तुभिर्द्वितन्तुकमारभ्यते नाप्येकेनेति विशेषणस्य हेतोरसद्भावः । अथ द्व्यणुकानि द्वित्वादिसंख्योपेतान्यनियमेन किमिति कार्यं नारभन्ते बाधकोपपत्तेः, तथाहि द्वयोर्द्व्यणुकयोरारम्भकत्वेऽणुपरिमाणोत्पत्तावेव कारणत्वमस्तीति व्यर्थारंभप्रसङ्गः। न च द्व्यणुकद्वयस्य कारणपरमाण्वपेक्षया बहुत्वं संभवतीति वाच्यम् । कारणं न कारणावृत्ति बहुत्वस्य परिमाणोत्पत्तावकारणत्वात्कारणावृत्ति च बहुत्वम् महत्त्वोत्पत्तौ कारणमिति दृष्टम् । अन्यथा हि द्व्यणुकेऽपि महत्त्वं स्यात् । तथा द्व्यणुकद्व्यणुकस्यापि बहुत्वसंख्योपेत-

स्यैव महदारंभकत्वमिति । परं द्व्यणुकस्यैतत् कल्पनीयमिति । एकस्य चारम्भकत्वं प्रतिषिद्धम् । अथ चतुरादिसंख्योपेतानामनियमेनारम्भकत्वम् इति नेष्यते । साक्षात् घटाद्यारंभकत्वप्रसंगात् । तद्भंगे चावान्तरकार्यस्यानुपलब्धिरेवानुत्पन्नत्वात् । न च बहुत्वं विना महत्त्वं संभाव्यत इति त्रित्वसंख्योपेतानामेवारम्भकत्वम् । तथाहि—द्व्यणुकानि त्रित्वसंख्योपेतान्येव द्रव्यमारभन्ते । द्वित्वचतुष्ट्वादिपक्षे बाधकप्रमाणसद्भावे सत्यारंभकत्वात्, त्रितन्तुकारंभे तन्तुत्रितयवत् । अत्र तु कियता कालेन द्व्यणुके रूपाद्युत्पत्तिरिति क्रिया निरूप्यते । तत्र स्वकारणाद् द्व्यणुकस्य विनाशस्तत्कार्यस्य विनश्यत्ता श्यामाद्युच्छेदकाग्निसंयोगस्योत्पादः श्यामादीनां विनश्यत्ता । रक्ताद्युत्पादकाग्निसंयोगस्योत्पद्यमानता विभागजविभागस्योत्पादः परमाण्वोराकाशादिदेशेन संयोगस्य विनश्यत्तेत्येषामेकः कालः । ततो द्व्यणुकस्य विनाशः तत्कार्यस्य विनश्यत्ता श्यामादीनां विनाशः । श्यामाद्युच्छेदकाग्निसंयोगस्य विनश्यत्ता रक्ताद्युत्पादकाग्निसंयोगस्योत्पादो रक्तादीनामुत्पद्यमानता । आकाशाद् द्व्यणुकसंयोगस्य विनाशः उत्तरसंयोगस्योत्पद्यमानतेत्येषामेकः कालः । ततस्तत्कार्यस्य विनाशात् तत्कार्यस्य विनश्यत्ता श्यामाद्युच्छेदकाग्निसंयोगस्य विनाशे रक्तादीनामुत्पादो रक्ताद्युत्पादकाग्निसंयोगस्य विनश्यत्ता तथोत्तरसंयोगस्योत्पादो विभागाविभागजविभागजकर्मणां विनश्यत्ता क्रियाया उत्पद्यमानतेत्येषामेकः कालः । ततस्तत्कार्यविनाशो तत्कार्यस्य विनश्यत्ता विभागविभागजविभागकर्मणां विनाशः रक्ताद्युत्पादकाग्निसंयोगस्य विनाशः क्रियाया उत्पादो विभागस्योत्पद्यमानतेत्येषामेकः कालः । ततस्तत्कार्यविनाशात् तत्कार्यस्य विनश्यत्ता विभागस्योत्पादः संयोगस्य विनश्यत्तेत्येषामेकः कालः । ततस्तत्कार्यविनाशात् तत्कार्यस्य विनश्यत्ता । संयोगस्य विनाशः उत्तरसंयोगस्योत्पद्यमानतेत्यषः कालः । ततस्तत्कार्यविनाशात्तत्कार्यस्य विनश्यत्ता उत्तरसंयोगस्योत्पादः द्व्यणुकस्योत्पद्यमानता विभागकर्मणोर्विनश्यत्येतेषामेकः कालः । ततस्तत्कार्यविनाशात्कार्यस्य विनश्यत्ता द्व्यणुकस्योत्पादो रूपादीनामुत्पद्यमानता विभागकर्मणोर्विनाश इत्येषामेकः कालः । तत उत्पन्ने द्व्यणुके कारणगुणपूर्वप्रक्रमेण नवमे क्षणे रूपाद्युत्पत्तिरिति । यदा तु

कार्यविनाशविशिष्टमपेक्ष्येत्यस्य द्रव्यनाशविशिष्टमपेक्ष्य कारणयोर्वर्तमानो विभागःकार्यसंयुक्ताकाशदेशेन विभागमारभत इति व्याख्यातम् । तदा श्यामादिनिवृत्तिसमकालं विभागजविभागसंचिन्तनाद्दशमे क्षणे रूपाद्युत्पत्तिरिति चिन्तनीयम् । तथाच द्व्यणुकविनाशे श्यामादिनिवृत्तिस्ततो रक्ताद्युत्पत्तिरुत्तरसंयोगः क्रियाविभागसंयोगविनाशः परमाणूनां च संयोगाद् द्व्यणुकोत्पत्तौ कारणगुणपूर्वकक्रमेण रूपाद्युत्पत्तिरिति। शेषं पूर्ववदिति । इदमेकस्मिन् परमाणौ द्रव्योत्पादनं क्रियाद्वयमधिकृत्योक्तम् । यदा त्वेकस्मिन्परमाणौ द्रव्यविनाशिकाऽन्यस्मिंश्च द्रव्योत्पादिकेष्यते तदा कथम् ? तत्र द्रव्यारंभकसंयोगविनाशसमकालं द्वितीयपरमाणौ द्रव्यारंभकं कर्म ततो द्रव्यारंभकसंयोगविनाशाद्द्व्यणुकस्य विनाशः तत्कार्यस्य विनश्यत्ता, श्यामाद्युच्छेदकाग्निसंयोगस्योत्पादः श्यामादीनामुच्छिद्यमानता रक्ताद्युत्पादकाग्निसंयोगस्योत्पद्यमानता विभागजविभागस्योत्पादः परमाणोराकाशादिदेशेन संयोगस्य विनश्यत्ता द्वितीयपरमाणौ विभागस्योत्पादः संयोगस्य विनश्यत्तेत्येषामेकः कालः । ततस्त्र्यणुकस्य विनाशः तत्कार्यस्य विनश्यत्ता श्यामादीनां विनाशः तदुच्छेदकाग्निसंयोगस्य विनश्यत्ता रक्ताद्युत्पादकाग्निसंयोगस्योत्पादः रक्तादीनामुत्पद्यमानता, आकाशाद्द्व्यणुकसंयोगस्य विनाशः तस्य परमाणोराकाशादिदेशेन संयोगस्योत्पद्यमानता । द्वितीयपरमाणौ प्राक्तनसंयोगविनाशः परमाणुना च संयोगस्योत्पद्यमानतेत्येषामेकः कालः। ततस्तत्कार्यविनाशात्तत्कार्यस्य विनश्यत्ता श्यामाद्युच्छेदकाग्निसंयोगस्य विनाशः रक्तादीनामुत्पादः परमाणोराकाशादिदेशेन संयोगस्योत्पादः विभागाविभागजकर्मणोर्विनश्यत्ता द्वितीयस्य परमाणोः परमाण्वन्तरेण संयोगस्योत्पादः तद्विभागकर्मणोर्विनश्यत्ता द्व्यणुकस्योत्पद्यमानतेत्येषामेकः कालः । ततः तत्कार्यविनाशात् तत्कार्यस्य विनश्यत्ता विभागजविभागकर्मणां विनाशो द्वितीयपरमाणावपि विभागकर्मणोर्विनाशः द्व्यणुकस्योत्पादो रक्तादीनामुत्पद्यमानतेत्येषामेकः कालः । ततो द्व्यणुकोत्पत्त्यनन्तरं पञ्चमे क्षणे कारणगुणपूर्वप्रक्रमेण रूपाद्युत्पत्तिरिति । तथा द्व्यणुकविनाशसमकालं द्वितीयपरमाणौ कर्मसंचिन्तनात् षट्क्षणा पाकजोत्पत्तिः। तथा श्यामादिनिवृत्तिसमकालमष्टक्षणा । तदनन्तरं च नवमे क्षणे

इत्यादि चिन्त्यम् । तत्रादौ द्व्यणुकानि पक्वापक्वैरपि परमाणुभि-रारभ्यन्त इति पक्वापक्वान्युत्पद्यन्ते । ततस्तैस्त्र्यणुकमित्यादिप्रक्रमेण घटस्य पक्वापक्वस्योत्पादः । ततः पुनरनुत्पन्नपाकजेषु क्रियादिक्रमेण द्रव्यविनाशे स्वतन्त्रेषु परमाणुषु रक्ताद्युत्पत्तिस्ततः पुनः क्रियाक्रमे-णोत्तरसंयोगोत्पत्तौ द्व्यणुकान्युत्पद्यन्ते । तत्र च कारणगुणपूर्वप्रक्रमेण पक्वमेव रूपाद्युत्पद्यते । तैस्त्र्यणुकं पक्वमेवारभ्यते । पुनर्द्व्यणुकान्तरे-ष्वप्येवमेव क्रमेण रूपाद्युत्पत्तिस्ततस्त्र्यणुकादिरिति वाच्यम् याव-द्विशिष्टरूपाद्युत्पत्तिरिति । नन्वग्निसंबंधस्यापि शेषादनुत्पन्नपाकजे-ष्विव परमाणुषूत्पन्नपाकजेष्वपि क्रिया किमिति नेष्यते ? घटादेरनु-त्पत्तिप्रसंगात् । यदि च परमाणुषूत्पन्नपाकजेष्वारब्धकार्येषु क्रिया स्यात् प्रतिक्षणमुत्पत्त्यनन्तरं द्व्यणुकादिविनाशे घटादेरुत्पत्तिर्न स्यात्। अथ सर्वेषां परमाणूनां पाके सति द्व्यणुकादिप्रक्रमेण घटाद्युत्पद्यते इति मनुषे । तदसत्। उपरि स्थापितानां कर्परादीनां पातप्रसङ्गात् , परमा-णूनां धारणसामर्थ्याभावात् , न चैतदस्ति । तस्मात् कार्योत्पत्त्यन्य-थानुपपत्त्या ज्ञायते—अनुत्पन्नपाकजेष्वेव क्रियोत्पद्यते नोत्पन्नपाक-जेषूपभोगप्रापकादृष्टस्य नियामकत्वादित्यलमतिविस्तरेण ॥

अथ द्व्यणुकत्र्यणुकादीनां पक्वापक्वानामुत्पादपूर्वं पुनः पक्वाना-मेवेति कल्पनायां किं प्रमाणम् । कार्यस्य तथा दर्शनमेव । तथाहि घटादिकार्यमादौ पक्वापक्वमुपलभ्यते पुनः पक्वमेवेति कारणकारणेष्व-प्यनुमेयः । अत्र च प्रयोगः । द्व्यणुकमादौ पक्वापक्वमुत्पद्यते महतः पार्थिवद्रव्यस्यारंभकत्वात्कपालवत् । तथा त्र्यणुकमादौ पक्वापक्वमु-त्पद्यते महतः पार्थिवद्रव्यकार्यत्वात् घटवदिति । न च युगपदशे-षपरमाणुषु कर्मोत्पत्तिद्वारेण पाकजोत्पत्तिर्व्याख्येया । शीघ्रपाकानु-पलब्धेरुपरि स्थापितानां च पातप्रसङ्गाच्चेति ॥

(व्यो०) अथेदानीमुद्देशक्रमेणावसरप्राप्तायाः संख्याया लक्षण-परीक्षार्थमेकत्वादिव्यवहारहेतुः संख्येत्यादि प्रकरणम् ।

(भा०) एकत्वादिव्यवहारहेतुः संख्या । सा पु-नरेकद्रव्या चानेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादि-परमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः । अनेकद्रव्या तु द्वित्वादिका परार्द्धान्ता । तस्याः खल्वे-

कत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः अपेक्षा-बुद्धिविनाशाद्विनाश इति । कथम् । यदा बोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति संयुक्तसमवेतैकत्वसामान्यज्ञानोत्पत्तावेकत्वसामान्यतत्-सम्बन्धतज्ज्ञानेभ्य एकत्वगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते । तदा तामपेक्ष्यैकत्वाभ्यां स्वाश्रये द्वित्वमारभ्यते ततः पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते ततः पुनर्द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता द्वित्वसामान्यतत्सम्बन्धतज्ज्ञानेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः । तत इदानीमपेक्षाबुद्धिविनाशाद् द्वित्वगुणस्य विनश्यत्ता द्वित्वगुणबुद्धितः सामान्यबुद्धेर्विनश्यत्ता द्वित्वगुणतज्ज्ञानतत्सम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः । तदनन्तरं द्वे द्रव्ये इति ज्ञानोत्पादः द्वित्वस्य विनाशः द्वित्वगुणबुद्धेर्विनश्यत्ता द्रव्यज्ञानात् संस्कारस्योत्पद्यमानतेत्येकः कालः । तदनन्तरं द्रव्यसामान्यात् द्वित्वगुणबुद्धेर्विनाशो द्रव्यबुद्धेरपि संस्कारादिति । एतेन त्रित्वाद्युत्पत्तिरपि व्याख्याता ॥

व्यवहृतिर्व्यवहारो ज्ञानम् व्यवह्रियतेऽनेनेति व्यवहारोऽभिधानं तयोर्हेतुः संख्येत्युच्यमाने सर्वेऽपि पदार्थास्तथा भवन्तीत्येकादिग्रहणम् । तथाप्येकादिरूपस्य व्यवहारहेतुत्वमाकाशात्मनोर्विद्यते इति विशेषणत्वे सतीति विशेषणमुह्यम् । तथाप्येकत्वादिसामान्यमेवं भवतीति द्रव्यविशेषणत्वे सतीति पदम् । तथाहि–संख्या इतरेभ्यो भिद्यते द्रव्यविशेषणत्वे सत्येकादिव्यवहारहेतुत्वाद्यस्तु न भिद्यते न चासावेवम् । यथा रूपादिरिति । व्यवहारो वा साध्यः । तत्र संख्यायास्त्वाश्रयद्वारेण भेदनिरूपणार्थम् । लक्षणेन लक्ष्यमाणस्यै-

कानेकत्वोपलब्धौ संशये सति तन्निरासार्थश्च—सा पुनरेकद्रव्या चानेकद्रव्या चेति वाक्यम्। एकमेव द्रव्यमाश्रयोऽस्या इत्येकद्रव्या। अनेकमेवात्रापि नभ्यद्रूपाया आश्रयोऽस्या इत्यनेकद्रव्या। तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तय इत्यतिदेशं करोति। ननु चात्र नित्यत्वे साध्ये हेतुर्नास्ति अनित्यत्वे तु दृष्टान्ताभाव इति न्यूनं वाक्यम्। न, व्यतिरेकमुखेन हेतोर्लाभात् विग्रहभेदेन दृष्टान्तरयेति। तथाहि—निष्पद्यमानत्वादनित्यत्वमित्युक्ते सामर्थ्यात् गम्यते एवानिष्पद्यमानत्वेन नित्यत्वमिति दृष्टान्तोऽपि। सलिलमादौ यस्यासौ सलिलादिस्तस्य परमाणवः तद्रूपादीनामिव नित्यत्वम्। यथाहि सलिलादिपरमाणुष्वनिष्पद्यमानत्वाद्रूपादयो नित्यास्तद्वदेकत्वं नित्येष्वनिष्पद्यमानत्वेनैव नित्यमिति। अनित्यायान्तु सलिलस्यादिपाठापेक्षया पृथिवी तस्याः परमाणवस्तद्रूपाणामिवेति। दृष्टान्तस्तु यथाहि पार्थिवपरमाणुरूपादयो निष्पद्यमानत्वादनित्यास्तद्वदेकत्वं कार्येषु निष्पद्यमानत्वादनित्यमिति। न च पार्थिवपरमाणुरूपादीनामिवैकत्वादीनामाग्निसंयोगादुत्पत्तिर्वैलक्षण्याप्रतिपत्तेः। स्पर्शे तु वैलक्षण्याप्रतिपत्तावप्यग्निसंयोगजत्वेऽनुमानमुक्तम्। पृथिव्यधिकारेण च तत्सामान्यगुणेष्वदृष्टं संभवतीति।

अन्ये तु सलिलं च तदादिपरमाणवश्चेति तच्छब्दलोपेन समासं कुर्वते। अनित्यत्वे सलिलरूपादिदृष्टान्तो नित्यतायां च तदादिपरमाणुरूपमित्यलम्।

अनेकद्रव्या तु द्वित्वमेव आदिर्यस्याः सा द्वित्वादिका। परार्धमेवान्तेऽवसाने यस्याः सा परार्धान्ता। नहि परार्धादूर्ध्वमियत्ताव्यवहारः संभवतीत्यागमे पठ्यते। तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद्विनाश इति संक्षेपेणोत्पत्तिविनाशकारणं दर्शयति। ननु चात्र बहुत्वनिर्देशात् द्वित्वोत्पत्तिर्न लभ्यते। नहि द्वित्वमेकत्वेभ्यो भवतीति। न द्विवचनबहुवचनाभ्यां विग्रहाश्रयणात्। तथा ह्येकत्वेऽनेकत्वानि चेत्येकशेषः, प्रकृतिसारूप्यस्य विवक्षितत्वात्। वचनसारूप्येण त्वेकशेषाभ्युपगमे धवखदिरादिष्वेकशेषप्रसंगः स्यात्। अत एकत्वेभ्योऽनेकत्वसंख्योत्पत्तिरित्यनेन द्वित्वोत्पत्तिर्व्याख्या·

तेव । किं विशिष्टेभ्य इत्याह अनेको विषयो यस्याः साऽनेकविषया-सा चासौ बुद्धिश्च तया सहितान्येकत्वानि । नित्येभ्य इत्यपेक्षाकारणानिर्देशः ।

अन्ये त्रित्वाद्युत्पत्तिरेवात्र संग्रहवाक्ये विवक्षिता । द्वित्वोत्पत्तिश्चोपरिष्टात् भविष्यतीति मन्यन्ते । तच्चासत् । त्रित्वाद्युत्पत्तेरप्युपरिसद्भावेनानर्थक्यप्रसंगात् । एवञ्च संक्षेपेणोत्पत्तिविनाशकारणे प्रज्ञापिते विशेषाकांक्षितया अज्ञस्य प्रश्नः । अथ किमिति केन रूपेणोत्पत्तिश्च विनाशश्च भवतीत्याह यदा बोद्धुरित्यादि । तथाहि—बुध्यत इति बोद्धा, तस्य बोद्धुरात्मनश्चक्षुषा सह समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सतीत्यनियमं दर्शयति । समानजातीययोरसमानजातीययोश्च द्रव्ययोः सन्निकर्षे सतीति । तत्संयुक्तसमवेतसमवेतैकत्वसामान्यज्ञानमुत्पद्यत इति । तेन चक्षुषा संयुक्तं द्रव्यं तत्संयुक्तसमवेत एकत्वगुणम्, तत्समवेतं च तदेकत्वं सामान्यं तस्मिन् ज्ञानमुत्पद्यते पूर्वविशेषणत्वात् । तथाहि विशेषणज्ञानमादौ कारणत्वात् विशेष्यज्ञानं तु पश्चात् कार्यत्वात् । अत एवैकत्वसामान्यज्ञानोत्पत्तौ सत्यामेकत्वसामान्यं च तत्सम्बन्धश्च तज्ज्ञानं चेत्येकत्वसामान्यतत्सम्बन्धतज्ज्ञानानि, तेभ्योऽनेकविषयिण्येका बुद्धिरुत्पद्यते । अनेकश्चासौ विषयश्चेत्यनेकविषयः सोऽस्या विद्यते इत्यनेकविषयिणी । एका च न विषयभेदेऽपि भिद्यते । कश्चासावनेको विषय इत्याहैकगुणयोरिति । एकगुणश्चैकगुणश्चेत्येकगुणयोर्विषयभूतयोर्योक्ता बुद्धिरुत्पद्यते एकत्वसामान्यबुद्धेश्च विनश्यत्ता । ततस्तामपेक्ष्यैकत्वाभ्यां स्वाश्रययोर्द्वित्वमारभ्यते । अत्र च स्वाश्रययोरिति समवायिकारणनिर्देशः तथैकत्वाभ्यामित्यसमवायिकारणस्य । तामपेक्ष्येत्यपेक्षाबुद्धेर्निमित्तकारणत्वमेकत्वसामान्यज्ञानस्य च विनाशः । ततः समुत्पन्ने द्वित्वे तत्संयुक्तसमवेतसमवायाद् द्वित्वसामान्यज्ञानमुत्पद्यते । पूर्वं विशेषणत्वात्तस्मात् सामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता विनाशकारणसांनिध्यं ज्ञानस्य ज्ञानान्तरविरोधित्वात् । द्वित्वसामान्यतज्ज्ञानतत्सम्बन्धेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेति । द्वित्वसामान्याद्द्वित्वसामान्यज्ञाना-द्वित्वसामान्यगुणसम्बन्धाद्द्वित्वगुणबुद्धेरुत्पद्यमानतोत्पत्तिकारणसांनिध्यमित्येषामेकः कालः । तत इदानीमपेक्षाबुद्धेर्विनाशः तद्विनाशाद्द्वित्वगुणस्य विनश्यत्ता । द्वित्वगुणतज्ज्ञानतत्सम्बन्धेभ्य इति ।

द्वित्वगुणश्च तज्ज्ञानं च तत्सम्बन्धश्चेति तथोक्तास्तेभ्यो निमित्तेभ्यः द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः। तदनन्तरं द्रव्यज्ञानस्योत्पादः तस्माद्द्वित्वगुणबुद्धेर्विनश्यत्ता सामान्यबुद्धेर्विनाशोऽपेक्षाबुद्धिविनाशात् गुणस्य विनाशः संस्कारस्योत्पद्यमानतेत्येषामेकः कालः। ततः संस्कारोत्पादे सति द्रव्यबुद्धेर्विनश्यत्ता। गुणबुद्धेर्विनाशः ततो द्रव्यबुद्धेरपि संस्काराद्विनाश इति।

ननु सर्वमेतदसम्बद्धम संख्यासद्भावे प्रमाणाभावात्। अथैकं द्वे त्रीणीत्यादिव्यवहारः प्रमाणम। तन्न, अस्य कल्पनाज्ञानत्वात्, न च कल्पनाज्ञानमर्थव्यवस्थापनायालम्। तदभावेपि भावात्। तथाहि—निमित्तनिर्विकल्पकज्ञानक्रमेण स्मरणानन्तरं सविकल्पकं ज्ञानमुत्पद्यते। न चार्थस्यावस्थानं क्षणिकत्वादिति निर्विषयत्वम्। बाधकोपपत्तेश्च। तथा ह्युत्पद्यमानं द्वित्वादि न द्रव्योत्पत्तेः पूर्वमुत्पद्यते। तदभावान्न समकालं कार्यकारणभावानुपपत्तिप्रसंगात्। अथोत्तरकालं तत्रापि किन्तत्स्वभावाद् विपरीताद्वेति। तत्स्वाभाव्ये किं द्वित्वादिना? द्रव्यस्यैव तत्स्वरूपत्वात्। विपर्यये तु कथं तत्स्वभावात्तस्योत्पत्तिरेकस्मात् बहुभ्यश्च द्वित्वोत्पत्तिप्रसंगात्। अतत्स्वभावतायाः सर्वत्राविशेषात्। तथावृत्त्यनुपपत्तेश्च। द्वित्वमनेकस्मिन् वर्तमानमेकदेशेन सर्वात्मना वा वर्तते? नैकदेशेन तदभावात्। न सर्वात्मनोभयवृत्तित्वाभावप्रसंगात्। न च येनैव स्वरूपेणैकवृत्तिस्तेनैव द्रव्यान्तरेपि तयोरेकताप्रसङ्गादिति वृत्त्यनुपपत्तेरसत्त्वम्। तथोपलब्धिलक्षणप्राप्तस्य सर्वैरग्रहणात्। यदि हि द्वित्वादेः सत्त्वमुपलब्धिलक्षणप्राप्तत्वाद्रूपादिवत्सर्वपुरुषैर्गृह्येत। न तूपलभ्यते, तस्मान्नास्तीति। समानेन्द्रियग्राह्यत्वाच्च। येनेन्द्रियेण द्रव्यमुपलभ्यते तेनैव संख्यापीति। न ततोर्थान्तरम्। भेदे तु रूपादीनामिवासमानेन्द्रियग्राह्यत्वमपि स्यात्। इतोप्यसत्त्वम्। देशभेदेनानुपलब्धेस्तदग्रहे तद्बुध्यभावाच्चेति। तथा ग्रहणानुपपत्तेश्च। तथाहि द्वित्वमनेकत्र वर्तमानं कथमिन्द्रियेण परिच्छिद्येत। युगपत् सन्निकर्षद्वयस्य मनसाऽनधिष्ठितत्वात्। अथ चक्षुरधिष्ठीयते, तथाप्यनेकपदार्थग्रहणप्रसङ्गः। तस्य मनोधिष्ठितस्यानेकपदार्थैः सम्बन्धात्। यथा च संख्यासम्बन्धात् द्रव्येष्वेकादिव्यवहारः तथैकत्वादिगुणेष्वप्येकादिव्यवहारे निमित्तान्तरकल्पनायां तत्राप्येका·

दिव्यवहारस्य सम्भवादनवस्थाप्रसङ्गः । अथैकत्वादावेकादिव्यवहारः तत्स्वरूपतया द्रव्येपि तथाभावप्रसङ्गः । अथैकत्वादिसामान्ये तत्सामान्यानुपपत्तेरेकादिव्यवहारः कल्पनाज्ञानमिति ।

तदेतत्सर्वमसाम्प्रतम् । एकादिव्यवहारस्य बाधकासम्भवेन प्रामाण्यात् । तथा ह्येकादिज्ञानमर्थान्वयव्यतिरेकानुविधाना नीलादिज्ञानवदर्थजम् । न चार्थाधीनतया निर्विकल्पकज्ञानोत्पत्तिसमकालमेव तस्योत्पत्तिः । संकेतस्मरणस्य सहकारिणोऽभावात् । नापि स्मृतिजमेव, अर्थस्यापि तत्र व्यापारोपलब्धेः । न च स्मृतेरतिशयाधायकत्वमनतिशयनिवर्तकत्वं वा । किन्त्वर्थसद्भावे सति ज्ञानजनकत्वमेव । न चार्थस्येन्द्रियाणां वा विचारकत्वात् (?) प्रागिव पश्चादप्यजनकत्वमिति दूषणम् । तथा वृत्त्यनुपपत्तेर्देशभेदेनाग्रहणात् । तदग्रहे तद्बुद्ध्यभावाच्चेति । पूर्वमेवावयविसमर्थनावसरे प्रतिषेधात् । न चाबाध्यमानमप्येकादिज्ञानमप्रमाणमिति वाच्यम् । नीलादिज्ञानस्याप्यप्रमाणताप्रसङ्गात् । अथ नीलं विना तज्ज्ञाने न स्यान्नीलाकरता तदेकत्वादिज्ञानेपि समानम् । अथैकत्वादिज्ञानं शब्दाकारम्, न चार्थे तद्रूपताऽस्तीति निर्विषयत्वम् । न, नीलज्ञानस्यापि शब्दाकारतया निर्विषयताप्रसंगात् । अथान्यं नीलज्ञानं निर्विकल्पकमर्थजमुत्तरं तु सविकल्पकमनेकक्षणव्यवधानादर्थापायेप्युत्पद्यते, अर्थस्य क्षणिकत्वाच्छब्दाकारतायाश्च तत्रासम्भवादिति निर्विषयत्वमिष्यत एव । तदसत् । क्षणिकत्वस्य पूर्वमेव प्रतिषेधात् । निर्विकल्पकज्ञानोत्पत्ताविवार्थस्य सविकल्पकज्ञानोत्पत्तावन्वयव्यतिरेकाभ्यामिन्द्रियेण सङ्केतस्मरणेन च सहकृतस्य व्यापारोपलब्धेः, तथापि इदन्तया ज्ञानोत्पत्तेस्तत्रेन्द्रियस्य व्यापारो निश्चीयते, अङ्गुल्या व्यपदिश्यमानत्वादर्थस्य चेति । अन्यथा हीन्द्रियार्थयोरेकादिज्ञानोत्पत्तौ व्यापारमन्तरेणेदन्तयोत्पत्तिरङ्गुल्यादिना च व्यपदेशो न स्यात् । अथेन्द्रियज्ञानं मनोविज्ञानक्रमेण सविकल्पकज्ञानोत्पत्तौ कारणमितीदन्तयोत्पत्तिरङ्गुल्यादिना व्यपदेशोनार्थकत्वादिति चेन्न । एतस्मिन् क्रमे प्रमाणाभावात् । अथ सङ्कल्पात् सद्भावासिद्धेरन्यथा एकादिव्यवहारो न स्यादित्येषा कल्पना क्रियते । तदसत् । वृत्तिविकल्पादेर्बाधकस्य पूर्वमेव प्रतिषेधात् । संख्यासद्भावसिद्धावेकादिव्यव-

हारस्य साक्षादर्थजत्वोपपत्तेः । शब्दाकारता तु सविकल्पकज्ञाने न सम्भवत्येव, साकारवादप्रतिषेधस्य वक्ष्यमाणत्वात् । केवलं तु स्मृतिजनितत्वात् सविकल्पकं ज्ञानं शब्दोल्लेखेनोत्पद्यते निर्विकल्पकं तूल्लेखशून्यं संकेतस्मृतेरव्यापारात् । न च वासनाप्रभवत्वं वासनायाः पूर्वमेव प्रतिषेधात् । तथाहि—बोधव्यतिरेकेणान्या वासना न सम्भवतीत्युक्तमेवावयविसमर्थनावसरे । या तु वैशेषिकोपगता स्मृत्यनुमेया वासना सा न कारणमेकादिव्यवहारे तस्याः परोक्षकारणतया स्मृतिविलक्षणत्वात् । तथा ह्येकादिज्ञानमपरोक्षमिन्द्रियव्यापारेणेदंतयोत्पद्यते । न च स्मृतेरेतद्रूपमस्तीति न वासनाप्रभवः । तथेत्थंभूतवासनाप्रभवत्वेपि परम्परयाऽर्थव्यवस्थापकत्वम् । अर्थानुभवपूर्वकत्वाद्वासनायाः । या त्वेकत्वादिशब्देभ्यो विकल्पाद्वासना साप्यर्थं व्यवस्थापयत्येव । शब्दस्यानुभवपूर्वकत्वेनाभ्युपगमात् । 'दृष्टेद्दष्टवादित्वमि'त्यनेन । यच्चूत्पत्तिविकल्पनादेकत्वादेरसत्त्वमित्युक्तम् । तदसत्।उत्तरकालं तदुत्पत्त्यभ्युपगमात् अथ किं तत्स्वभावाद्विपरीताद्वेत्युक्तम् तत्र यदि तत्स्वाभाव्यं तदुत्पादनसामर्थ्यं विवक्षितम् तादिष्यत एव । अथैकत्वाद्याश्रयत्वं तन्नास्त्युत्पत्तेः पूर्वं तदभावात् । सिद्धे च संख्यासद्भावे प्रमाणतस्तस्याः कार्यद्रव्ये कृतकत्वादवश्यमुत्पत्तिकारणं वाच्यम् । तत्र चैकत्वाद्वित्वाद्याश्रयस्य तज्जनकत्वे तदभावस्यादृष्टत्वा चोत्पत्तिस्तस्मात् द्रव्यमितरकारकोपचितम तेषां कारणमित्युत्पत्तिविकल्पानुपपत्तिः । यच्चेदमुपलब्धिलक्षणप्राप्तस्यानुपलब्धेर्द्वित्वादेरसत्त्वमिति । तन्न,असिद्धत्वात्तथा च यदीययाऽपेक्षाबुद्ध्या संपादितं द्वित्वादि तस्यैवोपलब्धिलक्षणप्राप्तम् , न पुरुषान्तरस्य तस्यैव तदुपलंभात् । यत्रोपलंभस्तत्रैव रूपिद्रव्ये समवायिकारणत्वमिष्टं न तदभावेपीति । तस्मान्न सकलपुरुषापेक्षया तदुपलब्धिलक्षणप्राप्तमित्यसिद्धो हेतुः । यच्चेदमेकत्वादेर्न द्रव्यव्यतिरेकेणास्तित्वं समानेन्द्रियग्राह्यत्वादिति । तत्र प्रतिज्ञावाक्ये पदयोर्व्याघातः । यथेदं च नास्ति चेति । न चैकत्वादेः पक्षीकरणं युक्तमप्रसिद्धत्वात् । प्रसिद्धं च पक्षीक्रियमाणं दृष्टम् शब्दादि । न च परस्यैकत्वादि प्रसिद्धमिति । अथ परव्याप्त्या परस्यानिष्टापादनं प्रसंगसाधनमिति चेत् । तत्र यदि प्रमाणपूर्विका परप्रसिद्धिस्तयैव बाध्यमानत्वादनुत्थानं विपरीता-

नुमानस्य । अथाप्रमाणपूर्विका तर्हि प्रमाणं विना प्रमेयस्याप्रसि- द्धेरेकादीनां पक्षीकरणमयुक्तम् । तथा समानेन्द्रियग्राह्यत्वादिति येनेन्द्रियेण द्रव्यमुपलभ्यते तेनैव संख्यापीति साधनस्य रूपादि- भेदैरनैकान्तिकत्वम् । तथाहि येनैवेन्द्रियेण शुक्लरूपस्य ग्रहणं तेनैव पीतादेर्न च तस्य तस्मादभेदोऽसत्वं वेति । न च परस्य द्रव्यं प्रसि- द्धमिति कथं तस्मादभेदः साध्यते । अथ रूपमेव द्रव्यं न तर्हि समानेन्द्रियग्राह्यत्वं रूपस्यैकेन्द्रियग्राह्यत्वात् । संख्यायास्तु द्वीन्द्रियपरिच्छेद्यत्वादिति । अथ रूपादिसमुदायो द्रव्यम् । तथापि समानेन्द्रियग्राह्यत्वमसिद्धं रूपादेः प्रतिनियतेन्द्रिय- ग्राह्यत्वात् । नच रूपादीनां प्रतिनियतेन्द्रियग्राह्यत्वाद्भेदः, शुक्लादिभेदानामेकताप्रसङ्गात् । किन्तर्हि ? प्रतिभासभेदात् । स चेहाप्यस्त्येव । तथाह्येकत्र द्रव्यप्रतिभासोऽन्यत्र चैकत्वादिप्रति- भास इति । अथ संख्याद्रव्ययोः प्रत्यक्षेण भेदप्रसिद्धेरेकतासाध- ने प्रत्यक्षेण बाध्यमानत्वात् कालात्ययापदिष्टं भवतीति । यच्चेदमु- त्पन्नस्य द्वित्वादेर्ग्रहणानुपपत्तेरसत्वम् । तदसत् । इन्द्रियव्यापारेणास्य द्वित्वादेरपरोक्षस्य दृष्टत्वात् । न च मनसाऽनधिष्ठितस्येन्द्रियस्य परि- च्छेदकत्वं युगपत् ज्ञानोत्पत्तिप्रसङ्गात् । अतश्चक्षुर्मनसाऽधिष्ठीयते । न सम्बन्धस्तेषामणुपरिमाणसम्बन्धितया न युगपदधिष्ठायकं मन इति द्वित्वादेरग्रहणमेव स्यादस्ति च ग्रहणमतश्चक्षुरेव मनसाऽधिष्ठी- यते । नन्वेवमप्यनेकपदार्थसम्बन्धाद्युगपदनेकज्ञानोत्पादकं स्यात् । न, करणस्यैकप्रत्ययनिर्वृत्तौ सामर्थ्यात्तथा ह्येककरणमेकस्मिन् काले- ऽनेकां क्रियां न करोतीति । तस्माद्युगपत्प्रकाशनमेव घटादीनां न ग्रह- णानीत्युक्तपूर्वम् । यच्चेदमेकादिव्यवहारो गुणान्तरात् स्वाभा- व्याद्वेत्युक्तम् । तत्रैकत्वसामान्यवशादिति ब्रूमः । तथाहि द्रव्ये गुण- सम्बन्धादेकादिव्यवहारो गुणे च सामान्यसम्बन्धात् सामान्येपि गुणसम्बन्धात्, न च ग्रहणपरंपरा विशेषणज्ञानस्य नियमेन ज्ञानपू- र्वकत्वानभ्युपगमात् । अथ संयुक्तसमवेतसमवायादेकत्वसामा- न्ये ज्ञानमुत्पद्यते, विशेषणत्वादित्युक्तम् । अनेकगुणविषयस्य वि- शेष्यज्ञानस्यैवासंवेदनात् । न द्वित्वस्योत्पत्त्यन्यथानुपपत्त्या तत्सद्भावसिद्धेस्तथाहि-यदि कारणगुणपूर्वप्रक्रमेण रूपादिवदु- त्पद्यते द्वित्वं प्रथमाक्षसंनिपातवेलायामेव ग्रहणं स्यात् चिरोत्प-

ज्ञत्वात्। गणनावैयर्थ्यञ्च। न चैतत्तस्मादनेकगुणविषयस्य ज्ञानस्याऽसमवायिनोऽपि द्वित्वोत्पत्तिकारणत्वं निश्चीयते, तद्विनाशाच्च विनाशः। अन्यथा हि समवाय्यसमवायिकारणयोर्विनाशात् विनाशाभ्युपगमे तयोरनेककालमवस्थानात् स्थायित्वमेव स्यात्, कांचिन्नित्यत्वञ्च। तयोरविनाशादन्यस्य च विरोधिगुणस्यासम्भवात्। तस्मान्निमित्तकारणादेव विनाशः कल्प्यते। न चैवं घटादेर्निमित्तकारणविनाशाद्विनाशप्रसङ्गोऽदर्शनात्। अत्र तु समवाय्यसमवायिकारणयोर्व्यवस्थानेऽपि द्वित्वादेर्विनाशस्य दृष्टत्वादपेक्षाबुद्धिविनाशाद्विनाशः कल्प्यते। अन्यथा हि रूपादिवदवस्थाने प्रथमाक्षसन्निपातकाल एव ग्रहणं स्यादित्युक्तम्। अथावस्थितस्यापि द्वित्वादेर्व्यञ्जकाभावात् उपलम्भस्त्विदानीमुत्पन्नस्यापि घटत इत्यपेक्षाबुद्ध्यादेर्जनकत्वमेव न्याय्यम्। तस्माद्द्वित्वादिव्यवहारोत्तरकालं तदभावस्य संवेदनात् तदुत्पत्तौ कारणान्तरस्यासम्भवे सत्यपेक्षाबुद्धिविनाशस्य कारणत्वं युक्तम्। अथ पूर्वं द्वित्वसामान्यज्ञानमनन्तरं गुणज्ञानं द्रव्यज्ञानं चेति कल्पनायां किं प्रमाणं च विशेषणत्वमिति चेत्। न। विशेषणेऽपि विशेषान्तरकल्पनायामनवस्थाप्रसङ्गात्। तथाहि—द्वे द्रव्ये इति द्रव्यज्ञानोत्पत्तौ गुणस्य विशेषणत्वाद्युक्तमादौ तज्ज्ञानं गुणस्य च विशेषणत्वान्न तत्सामान्यज्ञानं युक्तम्। अभ्युपगमे वा तस्याप्यन्यद्विशेषणमित्यनवस्था स्यात्। न। नियमानभ्युपगमात्। तथाहि विशेषणेऽवश्यं विशेषणान्तरकल्पनेति नियमः प्रतिषिध्यते। अनवस्थाभयान्न पुनर्विशेषणे विशेषणमेव नास्तीति। विवक्षितं चैतत् भाष्यकर्तुर्द्रव्यविशेषणस्यापि गुणस्य सामान्यविशेषणाभिधानादिति। अथ संस्काराद्द्रव्यबुद्धेर्विनाश इति किं प्रमाणम्? कार्यस्याकस्मिकस्यानुपलब्धेर्द्रव्यज्ञानविनाशस्य कारणत्वं निश्चीयते। तस्य च स्मृत्या सद्भावसिद्धिरिति वक्ष्यामः॥

(व्यो०) तदेवं द्वित्वस्योत्पत्तिविनाशकारणे प्रज्ञापिते सत्यनेन त्रित्वाद्युत्पत्तिव्याख्यातेत्यतिदेशं करोति—

(भा०) एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो द्वित्वादिनिष्पत्तिरपेक्षाबुद्धिविनाशाद्विनाश इति। क्वचिच्चाश्रयविनाशादिति। कथम्? यदैकत्वाधारावयवे

कर्मोत्पद्यते तदैवैकत्वसामान्यज्ञानमुत्पद्यते कर्मणा चावयवान्तराद्विभागः क्रियते अपेक्षाबुद्धेश्चोत्पत्तिः । अतो यस्मिन्नेव काले विभागात् संयोगविनाशस्तस्मिन्नेव काले द्वित्वमुत्पद्यते संयोगविनाशात् द्रव्यविनाशः सामान्यबुद्धेश्चोत्पत्तिः । ततो यस्मिन्नेव काले सामान्यज्ञानादपेक्षाबुद्धेर्विनाशः तस्मिन्नेव काले आश्रयविनाशात् द्वित्वविनाश इति शोभनमेतद्विधानम्—वध्यघातकपक्षे, सहानवस्थानलक्षणे तु विरोधे द्रव्यज्ञानानुत्पत्तिप्रसङ्गः । कथम् ? गुणबुद्धिसमकालमपेक्षाबुद्धिविनाशाद्द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति द्रव्यज्ञानस्यानुत्पत्तिप्रसंग इति । लैङ्गिकवज्ज्ञानमात्रादिति चेत्, स्यान्मतम्—यथाऽभूतं भूतस्येत्यत्र लिङ्गाभावेपि ज्ञानमात्रादनुमानम् तथा गुणविनाशेपि गुणबुद्धिमात्राद् द्वे द्रव्ये इति प्रत्ययः स्यादिति । न विशेष्यज्ञानत्वात् । न हि विशेष्यज्ञानं सारूप्याद्विशेषणसंबन्धमन्तरेण भवितुमर्हति । तथाह सूत्रकारः "समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते इति" । न तु लैङ्गिकं ज्ञानमभेदेनोत्पद्यत इति तस्माद्विषमोयमुपन्यासः । न । आशूत्पत्तेः, यथा शब्दवदाकाशमिति अत्र त्रीणि ज्ञानान्याशूत्पद्यन्ते तथा द्वित्वादिज्ञानोत्पत्तावित्यदोषः । वध्यघातकपक्षेपि समानो दोष इति चेत्, स्यान्मतम्-ननु वध्यघातकपक्षेपि तर्हि द्रव्यज्ञानानुत्पत्तिप्रसङ्गः । कथम् ? द्वित्वसामान्यबुद्धिसमकालं संस्कारादपेक्षाबुद्धिविनाशादिति । न । सम-

हज्ञानस्य संस्कारहेतुत्वात्-समूहज्ञानमेव संस्कारकारणं नालोचनज्ञानमित्यदोषः । ज्ञानयौगपद्यप्रसङ्ग इति चेत्, स्यान्मतम्-ननु ज्ञानानां वध्यघातकाविरोधे ज्ञानयौगपद्यप्रसंग इति । न । अविनश्यतोरवस्थानप्रतिषेधात् । ज्ञानायौगपद्यवचनेन ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानं प्रतिषिध्यते, न हि वध्यघातकविरोधे ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानमस्तीति ॥

(व्यो०) यथा हि द्वित्वमेकत्वाभ्यामेकबुद्धिविषयबुद्धिसहिताभ्यामारभ्यते तथा त्रित्वादेरप्येकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरिति । उत्पन्ने च त्रित्वादौ तत्सामान्यज्ञानं ततोऽपेक्षाबुद्धेर्विनश्यत्ता सामान्यतज्ज्ञानतत्सम्बन्धेभ्यो गुणबुद्धेरुत्पद्यमानतेत्येकः कालः । ततस्त्रित्वादिगुणबुद्धेरुत्पादः । गुणतज्ज्ञानतत्सम्बन्धेभ्यो द्रव्यबुद्धेरुत्पद्यमानताऽपेक्षाबुद्धेर्विनाशो सामान्यज्ञानस्य विनश्यत्ता गुणस्य विनश्यत्तेत्येषामेकः कालः । ततो द्रव्यज्ञानस्योत्पादो संस्कारस्योत्पद्यमानता गुणज्ञानस्य विनश्यत्ता सामान्यज्ञानस्य विनाशोऽपेक्षाबुद्धिविनाशाच्च गुणस्यापि नाशः इत्येकः कालः । ततः संस्काराद्द्रव्यज्ञानस्यापीत्यतिदेशार्थः । आदिपदेन तु शतसंख्यादेरवरोधस्तत्र च द्वित्वोत्पत्त्यतिदेशो न सम्भवत्येव । तथाहि-द्रव्यशतस्य युगपदिन्द्रियेण सम्बन्धाभावात्तद्गतैकगुणानामग्रहणेऽपेक्षाकारणाभावात् कथं शतसंख्योत्पत्तिरिति । न चेन्द्रियेणैकत्वसामान्यस्यैकस्मिन्द्रव्ये संयुक्तसमवेतसमवायलक्षणस्य सम्बन्धस्योत्पत्तेस्तस्यैकताया द्रव्यान्तरगुणेष्वपि सद्भावात्तदाकृष्टानामेकैकगुणानां युगपत् ग्रहणाच्छतसंख्योत्पत्तिरिति वाच्यम् । सर्वत्र तथाभावेन शतसंख्याद्युत्पत्तिप्रसङ्गात् । तथाहीन्द्रियस्यैकत्वसामान्येन संयुक्तसमवेतसमवायलक्षणस्य सम्बन्धस्याविशेषात्तदुपग्रहादेकैकगुणानां ग्रहणाभ्युपगमे सर्वस्मिन्द्रव्ये शतसंख्याद्युत्पत्तिः स्यात् । न चैतत्तस्मादपेक्षाकारणाभावादनुत्पत्तिरिति । न चापेक्षाबुद्धिं विनैवोत्पत्तिः । गणनावैयर्थ्यप्रस-

ज्ञादित्युक्तन्यायात् । तदेतत् सर्वमसत् । संख्याव्यवहारस्य वास्त-
वत्वात् । शतसंख्यादिसद्भावसिद्धौ तस्याः कृतकत्वात् अवश्यमु-
त्पत्तिकारणं वाच्यम् इत्यन्यस्यासम्भवाद्विलक्षणैवापेक्षाबुद्धिः
कल्प्यत इति । तथा चैकस्मिन्नेकगुणे ज्ञानोत्पत्तौ सत्यां संस्कार-
स्योत्पादे द्वितीयैकगुणे ज्ञानस्योत्पद्यमानता पूर्वज्ञानस्य विनश्य-
त्तेत्येकः कालः । ततो द्वितीयैकगुणे ज्ञानस्योत्पादः पूर्वगुणस्मरण-
स्योत्पद्यमानता प्राक्तनसंस्कारसहकारिणा च ज्ञानेन संस्कारस्यो-
त्पद्यमानता प्राक्तनज्ञानस्य विनाश इत्येकः कालः । ततः स्मरण-
स्योत्पादः संस्कारस्योत्पादो द्वितीयगुणज्ञानस्य विनश्यत्ता स्मर-
णानुभवौ चापेक्षाबुद्धिस्ततो द्वित्वस्योत्पद्यमानतेत्येकः कालः । त-
तो द्वित्वस्योत्पादात्तज्ज्ञानस्योत्पद्यमानता द्वितीयैकगुणज्ञानस्या-
पि विनाश इत्येकः कालः । ततो द्वित्वगुणज्ञानस्योत्पादो द्रव्यज्ञा-
नस्योत्पद्यमानता स्मरणस्य विनश्यत्तेत्येकः कालः । ततो द्रव्यज्ञान-
स्योत्पादो गुणज्ञानस्य विनश्यत्ता स्मरणस्य विनाशस्तद्विनाशा-
द्द्वित्वस्य विनश्यत्ता तृतीयैकगुणज्ञानस्योत्पद्यमानतेत्येकः कालः ।
ततस्तृतीयैकगुणज्ञानस्योत्पादो द्रव्यज्ञानस्य विनश्यत्ता द्वित्वगुण-
ज्ञानस्य विनाशः पूर्वैकगुणद्वितये स्मरणस्योत्पद्यमानता पूर्वसंस्का-
रसाचिव्येनैकगुणज्ञानेन संस्कारान्तरस्योत्पद्यमानता द्वित्वगुणस्य
विनाश इत्येकः कालः । ततः स्मरणस्योत्पादः संस्कारस्योत्पादः
एकगुणज्ञानस्य विनश्यत्ता स्मरणानुभवौ चापेक्षाबुद्धी ततस्त्रित्व-
गुणस्योत्पद्यमानता द्रव्यज्ञानस्य विनाश इत्येकः कालः । ततस्त्रित्व-
गुणस्योत्पादस्तज्ज्ञानस्योत्पद्यमानता एकगुणज्ञानस्य विनाश इत्येकः
कालः । ततस्त्रित्वगुणज्ञानस्योत्पादो द्रव्यज्ञानस्योत्पद्यमानता स्मरण-
स्य विनश्यत्तेत्येकः कालः । ततो द्रव्यज्ञानस्योत्पादो गुणज्ञानस्य वि-
नश्यत्ता स्मरणस्य विनाशः तद्विनाशात्त्रित्वगुणस्य विनश्यत्ता चतुर्थै-
कगुणज्ञानस्योत्पद्यमानतेत्येकः कालः । ततश्चतुर्थैकगुणज्ञानस्योत्पा-
दो द्रव्यज्ञानस्य विनश्यत्ता गुणज्ञानस्य विनाशः । त्रित्वगुणविनाशः
संस्कारस्योत्पद्यमानतेत्ययं क्रमः चतुष्ट्वादिष्वप्यूह्यः । तावद्यावद-
न्त्यद्रव्यैकगुणे ज्ञानं कल्पनायातसंस्कारेण च स्मरणस्योत्प-
द्यमानेति । ततः प्राक्तनाशेषैकगुणविषयस्मरणस्योत्पादोऽन्त्यद्रव्यै-
कगुणज्ञानस्य विनश्यत्ता स्मरणानुभवौ चापेक्षाबुद्धिस्ततः शतसं-

ख्याया उत्पद्यमानतेत्येकः कालः। ततः शतसंख्याया उत्पत्तिस्तज्ज्ञानस्योत्पद्यमानता अन्त्यद्रव्यैकगुणज्ञानस्य विनाशः इत्येकः कालः। ततो गुणज्ञानस्योत्पादो द्रव्यज्ञानस्योत्पद्यमानता स्मरणस्य विनश्यत्तेत्येकः कालः। तदनन्तरमेतानि शतमिति द्रव्यज्ञानस्योत्पादो गुणज्ञानस्य विनश्यत्ता संस्कारस्योत्पद्यमानता स्मरणस्य विनाशः। तदनन्तरं संस्काराद्द्रव्यज्ञानस्यापीति।

अन्ये त्वेकस्मिन्नेकगुणे ज्ञानं तेन क्रियते संस्कारः पुनर्द्वितीयैकगुणे ज्ञानं तेन प्राक्तनेन चान्यः संस्कार इत्येषा कल्पना तावद्यावदन्त्यगुणे ज्ञानं ततः कल्पनायातसंस्कारस्याभिव्यक्तत्वादशेषैकगुणविषयस्य स्मरणस्योत्पत्तिरनुभवस्य विनश्यत्तेत्यपेक्षाबुद्धिः शतसंख्याजनिकेति मन्यन्ते। न चान्तराले द्वित्वाद्यनुभवस्यापि संवेदनादनुभवेन बाधेति वाच्यम्। कारणांशस्यैव कीर्तनात्, तथा ह्येकगुणानुभवजनितः संस्कारः स्मृतिद्वारेण शतसंख्योत्पत्तौ कारणम्। न चैवं द्वित्वाद्यनुभव इति तस्यानुपन्यासो नासत्त्वादिति। अथास्त्वेवमुत्पत्तिः शतसंख्याया ग्रहणं तु कथमिति चिन्त्यते। तथाहि–द्रव्यशतस्य युगपदिन्द्रियेण सम्बन्धाभावात्तद्वर्तिनी शतसंख्याऽप्रत्यक्षेति कथमेतानि शतमिति प्रत्ययः स्यात्। अथान्त्यद्रव्येणेन्द्रियस्य संयोगात्तत्समवेता च शतसंख्योत्पन्नेति संयुक्तसमवायादुपलभ्यत एव तदाक्रुष्टानि च पूर्वोपलब्धद्रव्याणीन्द्रियसंयोगाभावेऽपि विशेषणविशेष्यलक्षणेनैव सम्बन्धेनैतानि शतमित्यपरोक्षज्ञानविषयाणि भवन्तीति। तर्हि सत्ताविशेषणेनाक्रुष्टानामाकाशादीनामपि प्रत्यक्षता स्यात्। न। अभिप्रायापरिज्ञानात्। तथा ह्येतानि शतमित्यपरोक्षज्ञानस्य दृष्टत्वादत्र कारणचिन्ता क्रियते। तत्र चान्यसम्बन्धस्यानुपलब्धेः शतसंख्याक्रुष्टानि विशेषणविशेष्यभावेनैव प्रत्यक्षाणि। न चैवमाकाशादीन्युपलब्धपूर्वाणि। न च तेष्वपरोक्षं विज्ञानमस्तीति नैवं कल्प्यते। न चाद्यद्रव्यस्येन्द्रियेण संयोगाच्छतसंख्योपलभ्यते, अन्त्यद्रव्ये समुत्पादात्। तथाहि–गणनाद्वारेणान्त्यद्रव्यैकगुणोपलम्भादुपलब्धैकगुणेषु द्रव्येषु समवेता शतसंख्योत्पद्यते तेन पूर्वेष्वेवेति तत्संयोगेऽप्यसम्भवादग्रहणम्। न चात्रानुभवसहकारिणः संस्कारस्य संस्कारान्तरारम्भकत्वे घटान्यानुभवजनितसंस्कारस्याप्यनुभवान्तरसहकारिणः संस्कारारम्भकत्व-

प्रसङ्गः, अदृष्टकारितत्वाद्वस्तुव्यवस्थायाः। तथाहि-शतसंख्याद्यु-
पभोगप्रापकादृष्टनियमादत्रैव विशिष्टसंस्कारोत्पत्तिर्न घटादौ, तत्र
हि कार्याभावादिति। कार्यसद्भावेन च कारणपरिकल्पना क्रियते
इति। अत्रान्यत्रासम्भवस्तत्रैव नियामकत्वमदृष्टस्य न पुनर्दृष्टका-
रणप्रत्याख्यानमिति। तस्माद्दृष्टसद्भावेपि गणनोपलम्भादपेक्षाबु-
द्धेः कारणत्वं कल्प्यते। अन्यथा हीश्वरबुद्धेरदृष्टस्य एकगुणस-
हकारित्वेन शतसंख्याद्यारम्भकत्वे सर्वद्रव्येषु शतसंख्याद्युत्पत्तौ
रूपादिवच्चिरोत्पन्नत्वात् गणनामन्तरेणैवोपलम्भः स्यात्। न चास्ति।
अथाभिव्यञ्जकाभावादनुपलम्भ इति चेन्न। सद्भावे प्रमाणाभावा-
दित्युक्तोत्तरत्वात्। न चान्यदीयबुद्धिसंपादितान्यस्य प्रत्यक्षोपलब्धे-
ति। ईश्वरसंपादितास्वादादीनां प्रत्यक्षता न स्यात्। तस्मादु-
क्तन्यायेनोत्पत्तिग्रहणं चेत्यलमिति विस्तरेण।

विनाशमाह--न परमपेक्षाबुद्धिविनाशात् क्वचिदाश्रयविनाशा-
दिति। कथमित्यव्युत्पन्नप्रश्नः। तत्र द्वित्वस्याश्रयविनाशेन विनाशा-
भिधानात् तत्समानतयाऽन्यत्रापि परिज्ञानं भविष्यतीति मन्यमा-
नो द्वित्वस्यैव विनाशमाह-यदैकत्वाधारावयवे कर्मोत्पद्यते विभा-
गस्योत्पद्यमानता। तदैवैकत्वसामान्ये ज्ञानमुत्पद्यते। अपेक्षाबुद्धेरु-
त्पद्यमानता। ततो विभागस्योत्पादो द्रव्यारम्भकसंयोगस्य विन-
श्यत्ता अपेक्षाबुद्धेरुत्पादो द्वित्वस्योत्पद्यमानता एकत्वसामान्य-
ज्ञानस्य विनश्यत्ता। तदनन्तरं संयोगस्य विनाशः एकत्वसामा-
न्यज्ञानस्य विनश्यत्ता। द्रव्यस्य विनश्यत्ता। द्रव्यस्योत्पादः। त-
त्सामान्यज्ञानस्योत्पद्यमानतेत्येषामेकः कालः। ततः सामान्यज्ञानस्यो-
त्पादः अपेक्षाबुद्धेर्विनश्यत्ता द्रव्यस्य विनाशो गुणस्य विनश्यत्ता।
ततो द्रव्यविनाशात् गुणस्य विनाशः। सामान्यज्ञानाच्चापेक्षाबु-
द्धेरिति। न चापेक्षाबुद्धिविनाशकार्यौ गुणविनाशसमकालत्वादिति
द्रव्यविनाशस्यैव कारणत्वं पूर्वकालत्वात्। यदा त्वपेक्षाबुद्धिसमकालमे-
कत्वाधारावयवे कर्म चिन्त्यते। तदोभयविनाशादपि गुणस्य विना-
शः सम्भवतीति ज्ञेयम्। शोभनमेतद्विधानमित्यादिना परपक्षप्रति-
षेधद्वारेण स्वपक्षमुपसंहरति-शोभनं युक्तमेतत् द्वित्वाद्युत्पत्तिवि-
धानम्। तत् कस्मिन्पक्ष इत्याह-वध्यघातकपक्षे यदा ह्येकस्य ज्ञान-
स्योत्पादोऽन्यस्य विनश्यत्ता। सहानवस्थानलक्षणे तु विरोधे द्रव्य-

ज्ञानानुत्पत्तिप्रसङ्ग इत्यशोभनम् । तथाहि–सहानवस्थानलक्षणे विरो॰ धे द्वित्वसामान्यज्ञानसमकालमपेक्षाबुद्धिविनाशात् गुणबुद्धिसमका॰ लं द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति ज्ञानस्यानुत्पत्तिप्रसङ्गः। तथा निर्हेतुकता च विनाशस्य । यदैव द्वित्वसामान्यज्ञानस्योत्पादः तदै- वापेक्षाबुद्धेर्विनाश इत्येककालत्वाच्च सामान्यज्ञानकार्योपेक्षाबुद्धिवि॰ नाशः । न चान्यत् कारणमस्तीति निर्हेतुकत्वं प्रसज्येत । न चैत॰ त्सम्भवतीत्युक्तमेव । अथ यद्यपि गुणबुद्धिसमकालमपेक्षाबुद्धिविना शाद् गुणस्य विनाशः । तथापि लैङ्गिकज्ञानवत् ज्ञानमात्राद्द्वे द्रव्ये इति ज्ञानं भविष्यतीति परमतमाशङ्कते–लैङ्गिकवत् ज्ञानमात्रादिति चेत्। मतमभिप्रेतं स्यात्, यथा अभूतमविद्यमानं लिङ्गं भूतस्य विद्यमान स्य लिङ्गिनो गमकमित्यत्र सूत्रे लिङ्गाभावेपि ज्ञानमात्रादनुमानमिष्ट॰ म् । तथाहि ज्ञानेन ज्ञानमनुमीयते इति ज्ञानस्य लिङ्गत्वादवश्यं ग्र हणम् । ततस्तस्य विनश्यत्ता अविनाभावसम्बन्धस्मरणस्योत्पद्य- मानता तदनन्तरमविनाभावसम्बन्धस्मरणस्योत्पद्यमानता तदन॰ न्तरमविनाभावसम्बन्धस्मरणस्योत्पादो लिङ्गभूतज्ञानस्य विनाशः । तज्ज्ञानस्य विनश्यत्ता परामर्शज्ञानस्योत्पद्यमानता ततः पराम॰ र्शज्ञानस्योत्पादोऽविनाभावसम्बन्धस्मरणस्य विनश्यत्ता लिङ्गज्ञा॰ नस्यापि विनाश इति निर्विषयात्परामर्शज्ञानमात्रादेव ज्ञातरि प्रति॰ पत्तिर्भवतीति दृष्टम् । तथा गुणविनाशे गुणज्ञानमात्रात् द्रव्यप्र- त्ययः स्यादिति ।

अन्ये तु यथाऽभूतमविद्यमानं वर्षकर्म भूतस्य विद्यमानस्य वा॰ य्वभ्रसंयोगस्य लिङ्गम् तथा गुणविनाशेपि तज्ज्ञानमात्रात् द्रव्य॰ ज्ञानमिति मन्यन्ते । न चैतद्युक्तम् । तथाहि–नाविद्यमानं कर्म वि॰ द्यमानस्य वाय्वभ्रसंयोगस्य सद्भावे लिङ्गम् । किं तर्हि? वर्षकर्मानुत्पा॰ दो व्यभिचारी। स च स्वरूपेणास्त्येवेति कथमविद्यमानम् । अथ भावरूपतया तस्यासत्त्वम्, तर्हि भावस्याप्यभावरूपेणासत्त्वमिति सर्वस्यासत्त्वमेव स्यात। तस्माद्वर्षकर्मानुत्पादो विद्यमान एव लि॰ ङ्गमित्युदाहरणान्तरमेव न्याय्यम् । प्रतिसमाधानमाह–यदुक्तं लैङ्गि॰ कज्ञानवत् द्वे द्रव्ये इति ज्ञानं भविष्यतीति। एतच्च–विशेष्यज्ञानत्वात्, तथाहि–द्वित्वानुरागेणोत्पद्यमानत्वात् द्वे द्रव्ये इति विशेष्यज्ञानमतो विद्यमानस्यैव गुणस्यात्र व्यापारः कल्पनीयः । तथाहि–यस्माच्च वि॰

शेष्यज्ञानं विशेषणसम्बन्धमन्तरेण विशेषणसम्बन्धं विना भवितुमर्ह-तीति । तदुत्पत्तौ विशेषणतज्ज्ञानतत्सम्बन्धानां कारणत्वात्, अन्यथा हि सकलकारणानां विशेष्यज्ञानोत्पत्तौ विशेषव्यापाराविशेषेण नियतस्यैव विशेषणत्वं न स्यात्। अतो विशेषणतज्ज्ञानतत्-सम्बन्धानां कारणत्वम्। तथाचाह सूत्रकारः "समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते" इत्यनेन सूत्रकारस्यायमर्थोऽभिप्रेत इति दर्शयति। तथाहि—श्वेतं द्रव्यं तस्य भावश्श्वैत्यं श्वेतगुणः तस्मात्, किंविशिष्टात्? समवायिनः समवायेन सम्बन्धाच्छ्वैत्यबुद्धेरिति श्वेतगुणबुद्धेः। एतस्मात् कारणत्रयात् श्वेतबुद्धिविशेष्यज्ञानं श्वेतं द्रव्यमुत्पद्यते। ते पुनर्विशेषणविशेष्यबुद्धी कार्यकारणभूते कार्यकारणस्वभाव इति। न च लैङ्गिकज्ञानं लिङ्गानुरक्तमिति लिङ्गाभावेऽप्युत्पद्यत इत्याह—न तु लैङ्गिकं ज्ञानमभेदेन लिङ्गानुरागेणोत्पद्यते तस्माद्विषमोऽयमुपन्यास इति। योऽयं लैङ्गिकज्ञानवद्द्रव्ये इति भविष्यतीत्युपन्यासः स विषमः—समो न भवतीति । तथाहि—विशेष्यज्ञाने विशेषणानुराग इति लैङ्गिके त्वनुरागाभाव इति वैषम्यम्। यदि वा विषमोऽयमुपन्यासः। उपन्यस्यते साध्यसाधनयोरस्मिन् व्याप्तिरित्युपन्यासो लैङ्गिकवदिति दृष्टान्तः। स च विषमो लिङ्गानुरागशून्यतया तस्याविशेष्यज्ञानत्वादिति।

अन्ये तु ते विशेषणतज्ज्ञाने कार्यस्य विशेष्यज्ञानस्य कारणभूते तस्मात् गुणं विना न द्रव्यज्ञानमिति मन्यन्ते। ते च विशेषणविशेष्यबुद्धी कार्यकारणभूते न पुनः सर्वं विज्ञानम् तथाभूतं प्रमाणाभावात्। एतेन संकलनाज्ञानं निरस्तम्। विशेषणविशेष्यज्ञानव्यतिरेकेण ज्ञानान्तरे प्रमाणाभावादित्यलम् ।

ननु द्वित्वोत्पत्तेः प्राक् ज्ञानद्वयमेकत्वसामान्यज्ञानमपेक्षाज्ञानं च, उत्पन्ने तु द्वित्वे तत्सामान्यज्ञानं गुणज्ञानं द्रव्यज्ञानं चेति ज्ञानपञ्चकं यदि क्रमेणोत्पद्यते स कस्मान्नोपलभ्यते। अनुपलंभान्नास्तीति । परस्तन्निषेधार्थमाह—नाशूत्पत्तेरिति । यदुक्तं क्रमस्यासत्त्वमित्येतन्न। आशुभावित्वेन विद्यमानस्यापि क्रमस्यासंवेदनात् । अथाशूत्पत्तेः क्रमस्याग्रहणं कस्मिन्नुपलब्धमित्याह—यथा शब्दवदाकाशमित्यत्र शब्दज्ञानमाकाशज्ञानं शब्दाकाशसम्बन्धज्ञानं चेति त्रीणि ज्ञानान्याशूत्पद्यन्ते इति क्रमस्याग्रह-

णम् , तथा द्वित्वादिज्ञानोत्पत्तौ आशुभावित्वेनैव क्रमाग्रहणमित्य-दोषः । न च ज्ञानानां सहानवस्थानलक्षण एव विरोधे ज्ञानानामाशु-भावित्वेनोत्पत्तेः, अविनष्टे हि गुणे द्रव्यज्ञानं भविष्यतीति प्रतिस-माधानमेतदिति वाच्यम् । शीघ्रं कारणसद्भावेन कार्यस्यापि तथा-भावात् । अवश्यं गुणबुद्धिसमकालं गुणविनाशे तदायत्तस्य द्रव्य-ज्ञानस्यानुत्पत्तिरिति दूषणस्याव्यावृत्तेः। यदि ज्ञानयोः सहाविरोधेना-वस्थानं नास्तीति सहानवस्थानं विवक्षितमविवाद एव । अथेदानीं सहानवस्थानलक्षणविरोधाद्वध्यघातकपक्षेपि समानं दूषणमिति पर-मतमाशङ्कमान इदमाह-वध्यघातकपक्षेपि समानो दोष इति चेत् । स्यान्मतमभिप्रेतमिति संग्रहवाक्यम् । अस्य तु विवरणं वध्यघात-कपक्षेऽपि तर्हि द्रव्यज्ञानानुत्पत्तिप्रसङ्ग इति। तथाहि-यदि गुणबुद्धिस-मकालं गुणविनाशे द्रव्यज्ञानानुत्पत्तिस्तर्हि वध्यघातकपक्षेपि तस्या-नुत्पत्तिरेव । कथं सामान्यबुद्धिसमकालं संस्कारापेक्षाबुद्धि-विनाशादिति । यथा ह्यपेक्षाबुद्धिर्द्वित्वं जनयति एवं संस्कारम-पीति । ततस्तस्या विनश्यत्ता । द्वित्वसामान्यज्ञानस्योत्पद्यमानता ततो द्वित्वसामान्यस्योत्पादो गुणज्ञानस्योत्पद्यमानता । अपेक्षाबुद्धे-र्विनाशो गुणस्य विनश्यत्ता ततो गुणज्ञानस्योत्पादोऽपेक्षाबुद्धिवि-नाशात् गुणस्य विनाश इति तदपेक्षत्वाद्द्रव्यज्ञानस्यानुत्पत्तिरेव । न । समूहज्ञानस्य संस्कारहेतुत्वादिति प्रतिसमाधानम् । तथा-हि-यदुक्तमपेक्षाबुद्धेः संस्काराद्विनाश इति । तन्न । समूहज्ञानस्य पटुवभ्यासादरप्रत्ययस्य संस्कारहेतुत्वादिति। संग्रहोक्तेर्विवरणमाह-समूहज्ञानमेव संस्कारकारणम् , नालोचनाज्ञानमपेक्षाज्ञानमिति त-स्माददोषः । किमत्र प्रमाणमिति चेत् । स्मरणानुत्पत्तिर्द्रव्यज्ञानोत्प-त्तिश्च । तथाहि-यत्र स्मरणं तत्रैव संस्कारकल्पना क्रियते । न चा-त्र तदस्तीति अभ्युपगमे द्रव्यज्ञानमेव न स्यात् । तदृष्टमतस्तदन्य-थानुपपत्त्याऽपेक्षाबुद्धेः संस्कारजनकत्वं निश्चीयते । प्रकारान्तराभा-वात्। अथेदानीं वध्यघातकपक्षेपि पराशयमाशङ्कते-ज्ञानयौगपद्यप्रसङ्ग इति चेत्स्यान्मतमिति सङ्ग्रहोक्तेर्विवरणम् । ननु ज्ञानानां वध्यघा-तकविरोधे ज्ञानयौगपद्यप्रसङ्ग इति । तथाच यदि ज्ञानानां वध्यघा-तकलक्षणो विरोधः-तदैकस्यावस्थाने द्वितीयस्योत्पादात् ज्ञानयौ-गपद्यं प्रसज्यत इत्यनिष्टापादनम् । तत्रानिष्टम्, अविनश्यतोरवस्थानप्र-

तिषेधात् । तथाहि ज्ञानायौगपद्यवचनेन प्रयत्नायौगपद्याच्च प्रतिशरीरमेकं मन इति सूत्रेण युगपदुत्पत्तिः अविनश्यतोश्च ज्ञानयोः परस्परविरोधेनावस्थानं प्रतिषिध्यते । वध्यघातकाविरोधे तूभयमपि नास्तीत्याह न हि वध्यघातकविरोधे ज्ञानयोर्युगपदुत्पत्तिः अविनश्यतोश्च युगपदवस्थानमस्तीत्यदूषणमेतत् ॥

इहेदानीमुद्देशवतः लक्षणपरीक्षार्थं परिमाणं मानव्यवहारकारणमित्यादिप्रकरणम्—

(भा०) **परिमाणं मानव्यवहारकारणम् । तच्चतुर्विधम्—अणु महद्दीर्घं ह्रस्वं चेति ।**

तत्र महद् द्विविधं—नित्यमनित्यं च । नित्यमाकाशकालदिगात्मसु परममहत्त्वम् , अनित्यं त्र्यणुकादावेव । तथा चाण्वपि द्विविधं—नित्यमनित्यं च । नित्यं परमाणुमनस्सु तत्तु पारिमाण्डल्यम् । अनित्यं द्व्यणुक एव । कुवलयामलकबिल्वादिषु महत्स्वपि तत्प्रकर्षभावाभावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः । दीर्घत्वह्रस्वत्वे चोत्पाद्यमहदणुत्वैकार्थसमवेते । समिदिक्षुवंशादिष्वञ्जसा दीर्घेष्वपि तत्प्रकर्षभावाभावमपेक्ष्य भाक्तो ह्रस्वत्वव्यवहारः ।

अनित्यं चतुर्विधमपि संख्या-परिमाण-प्रचययोनि ।

तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु बहुत्वसङ्ख्या तैरारब्धे कार्यद्रव्ये त्र्यणुकादिलक्षणे रूपाद्युत्पत्तिसमकालं महत्त्वं दीर्घत्वं च करोति ।

द्विबहुभिर्महद्भिश्चारब्धे कार्यद्रव्ये कारणमहत्त्वान्येव महत्त्वमारभन्ते न बहुत्वम् । समानसङ्ख्यैश्चारब्धेऽतिशयदर्शनात् ।

प्रचयश्च तूलपिण्डयोर्वर्तमानः पिण्डारम्भकावयव-

प्रशिथिलसंयोगानपेक्षमाण इतरेतरपिण्डावयवसंयोगापेक्षो वा द्वितूलके महत्त्वमारभते न बहुत्वमहत्त्वानि । समानसङ्ख्यापलपरिमाणैरारब्धेऽतिशयदर्शनात् ।

द्वित्वसङ्ख्या चाण्वोर्वर्तमाना द्व्यणुकेऽणुत्वमारभते । महत्त्ववत् त्र्यणुकादौ कारणबहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो दीर्घत्वस्योत्पत्तिः । अणुत्ववत् द्व्यणुके द्वित्वसङ्ख्यातो ह्रस्वत्वस्योत्पत्तिः ।

अथ त्र्यणुकादिषु वर्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः, द्व्यणुकेषु चाणुत्वह्रस्वत्वयोरिति?

तत्रास्ति महत्त्वदीर्घत्वयोः परस्परतो विशेषः—महत्सु दीर्घमानीयतां दीर्घेषु च महदानीयतामिति विशिष्टव्यवहारदर्शनादिति । अणुत्वह्रस्वत्वयोस्तु परस्परतो विशेषस्तद्दर्शिनां प्रत्यक्ष इति ।

तच्चतुर्विधमपि परिमाणमुत्पाद्यमाश्रयविनाशादेव विनश्यतीति ॥

व्यवहृतिर्व्यवहारो ज्ञानं व्यवह्रियतेऽनेनेति व्यवहारोऽभिधानं तयोर्हेतुः परिमाणमित्युक्तेऽतिप्रसङ्गस्तदर्थं मानपदम् । तथापि मानव्यवहारहेतुत्वमाकाशात्मनोर्विद्यत इति विशेषणत्वे सतीति विशेषणम् । तथापि परिमाणत्वसामान्येन व्यभिचारपरिहारार्थं द्रव्यविशेषणत्वे सतीति विशेषणमभ्यूह्यम् । तथाहि परिमाणमितरस्माद्भिद्यते द्रव्यविशेषणत्वे सति मानव्यवहारकारणत्वात् यस्त्वितरस्मादपरिमाणात् न भिद्यते । न चासावेवम् । यथा रूपादिरिति । व्यवहारो वा साध्यः । तथाऽऽवर्त्यमानमिदमेव वाक्यमनेकार्थमिति परीक्षापरत्वेन सम्बन्ध्यते । तथाहि—मानव्यवहारो विशेष्यज्ञानत्वाद्विशेषणमपेक्षते दण्ड्यादिज्ञानवत् । न च रूपादीनामन्यतमः तद्विशेषणं तद्व्यवहारविलक्षणत्वादिति विलक्षणेनैव निमित्तेन भवितव्यम् । न चेदं कल्पनाज्ञानं वासनाप्रभवं, तस्याः पूर्वमेव प्रतिषेधात् । तच्चतुर्वि·

श्चमिति विभागः। केन रूपेणेत्याह अणु महद्दीर्घं ह्रस्वञ्चेति। ननु चा युक्तं चातुर्विध्यं, चतुरस्रादिभेदस्यापि सम्भवात्। तन्न। महत्त्वस्यैवावयवरचनाविशेषोपलम्भसहकारिणश्चतुरस्रादिव्यवहारसम्पादकत्वात्। तथाहि-अवयवरचनाविशेषोपलम्भे सति चतुरस्रं त्रिरस्रं परिमण्डलमिति व्यवहारस्तदभावे च नेति न परिमाणान्तरसिद्धिः। नन्वेवं दीर्घत्वह्रस्वत्वव्यवहारोऽप्यवयवसंयोगविशेषोपलम्भादेव भविष्यतीत्यलं दीर्घत्वह्रस्वत्वपरिकल्पनया। न, तदनुपलब्धावपि दीर्घत्वोपलब्धेः। तथाहि-मन्दमन्दप्रकाशे सत्यन्तरेणाप्यवयवरचनोपलम्भं स्थाण्वादौ दीर्घप्रतिभासो दृष्टः, न चैवं चतुरस्रप्रतिभास इत्यन्वयव्यतिरेकाभ्यामित्यभ्यूह्यम्। तत्र महत्त्वाणुत्वयोरप्यवान्तरभेदात् षड्विधमपि परिमाणमित्याह महद्विविधं नित्यमनित्यञ्चेति। नित्यमाकाशकालदिगात्मसु वर्त्तते। तच्च परममहत्त्वं न तस्मादूर्ध्वं महत्त्वमस्तीति। अनित्यं त्र्यणुकादावेवेति। त्र्यणुकमादौ यस्य तत्तथोक्तं तत्तस्मिन्नेव तत्र ह्युत्पत्तिकारणसद्भावात्। तथा न परं महदणवपि द्विविधं नित्यमनित्यं च। केष्वित्याह परमाणवश्च मनश्चेति परमाणुमनांसि तेषु वर्त्तते। पारिमाण्डल्यमिति तस्य नाम। तथाहि-परिमण्डलानि परमाणुमनांसि तेषां भावः पारिमाण्डल्यम्। तत्परिमाणमेव। तत्तु नित्यम् उत्पत्तिविनाशकारणानुपलब्धेः। तथाहि-परमाणूनां कारणासम्भवात् न तत्परिमाणकारणमनेकत्वसंख्या प्रचयो वास्तीति एतावत्तु कारणं परिमाणस्य। न च नित्यत्वादणूनां विनाशः सम्भवतीति तत्परिमाणस्य नित्यत्वमेव। अनित्यं द्व्यणुक एवेत्याश्रयान्तरव्युदासः।

ननु चायुक्तमेतदन्यत्राप्यणुव्यवहारोपलब्धेः। न, तत्र मुख्यासम्भवेनोपचाराभ्युपगमात् इत्याह-कुवलयामलकबिल्वादिषु महत्स्वपि तत्प्रकर्षभावाभावमपेक्ष्य परिमाणातिशयः कुवलयाद्यपेक्षया तस्माद्वा प्रकर्षस्तस्य भावो विद्यमानता बिल्वादौ तदभावमपेक्ष्यामलकेऽणुव्यवहारः। तथा तत्प्रकर्षः कुवलयापेक्षया परिमाणातिशयः, तस्य भावो विद्यमानताऽऽमलके तदभावमपेक्ष्य कुवलयेऽणुव्यवहारः। यत्र हि वास्तवमणुत्वं तत्र परिमाणातिशयस्याभावो द्रष्टव्यः। तस्यान्यत्राप्युपलम्भात् उपचारः प्रवर्त्तत एव। यदि वा मुख्यासद्भावे किं प्रमाणमित्याह भाक्तोऽणुव्यवहारः। यथाहि-माणवके सिंहव्यव-

हारो मुख्यापेक्षस्तद्वद्यमणुव्यवहारोऽप्युपचरितत्वान्मुख्यपूर्व इत्य· णुत्वसिद्धिः । तथाच कुवलयादिष्वणुव्यवहारो मुख्यपूर्वको भाक्त· व्यवहारत्वान्माणवके सिंहव्यवहारवत् । यथाच महत्त्वाणुत्वयोर्नि· त्यानित्यभेदो नैवं दीर्घत्वह्रस्वत्वयोराश्रयान्तरानुपपत्तेः । क वा त· योर्वृत्तिरित्याशङ्कयाह दीर्घत्वं च ह्रस्वत्वं चेति दीर्घत्वह्रस्वत्वे ते चो· त्पाद्यमहदणुत्वैकार्थसमवेते–उत्पाद्ये च ते महदणुत्वे चोत्पाद्यमहद· णुत्वे ताभ्यां सहैकस्मिन्नर्थे समवेते । तथाहि—त्र्यणुकादावुत्पाद्यं महत्त्वं तत्रैव दीर्घत्वं द्व्यणुके चाणुत्वं तत्रैव ह्रस्वत्वमिति परमा· णूनां परिमण्डलत्वान्न ह्रस्वत्वमाकाशादेर्व्यापकत्वाच्च न दीर्घत्वं तद्विपरीतेषु तद्व्यवहारदर्शनात् । अथ द्व्यणुक एव ह्रस्वत्वमित्युक्त· मन्यत्रापि तद्व्यवहारोपलब्धेः । तत्र । बाधकसद्भावेनान्यत्रोपचा· राभ्युपगमादित्याह—समिदिक्षुवंशादिष्वंजसा दीर्घेष्वपि तत्प्रत्कर्ष· भावाभावमपेक्ष्य भाक्तो ह्रस्वत्वव्यवहार इति । तथाहि—समिदा· दिषु दीर्घत्वोत्पत्तौ कारणसद्भावादंजसा मुख्यया वृत्त्या दीर्घत्वं दीर्घेष्वपि ह्रस्वत्वव्यवहारो दृष्ट इति मुख्यासम्भवात् उपचारः कल्प्यते । समिदाद्यपेक्षया दीर्घत्वातिशयस्तस्य भावो विद्यमानता वंशादौ तदभावमपेक्ष्येक्षौ ह्रस्वत्वव्यवहारः । समिधमपेक्ष्येक्षौ दी· र्घत्वातिशयः । तत्र तदभावमपेक्ष्य समिधि ह्रस्वव्यवहारः । यदि वा मुख्यह्रस्वत्वस्य सद्भावे किं प्रमाणम् ? उपचरितो ह्रस्वव्यव· हारः । तथाहि समिदादिषु ह्रस्वव्यवहारो मुख्यपूर्वकः भाक्तव्यव· हारत्वात् माणवके सिंहव्यवहारवदिति ।

एवं चातुर्विध्यमुक्त्वोत्पत्तिकारणमाह—अनित्यं चतुर्वि· धमपि संख्यापरिमाणप्रचययोनीति । संख्या च परिमाणं च प्रचयश्चेति संख्यापरिमाणप्रचयाः ते योनिः कारणम· स्येति, संख्यापरिमाणप्रचयैः समस्तव्यस्तैर्जन्यत इति वा· क्यार्थः । तथा च सूत्रं—कारणबहुत्वात् कारणमहत्त्वात्प्रचय· विशेषाच्च महदिति । अनित्यग्रहणम् नित्यव्युदासार्थम् । चतुर्विधमि· ति—न्यूनताव्यवच्छेदः । सूत्रार्थप्रक्रमस्य विवक्षितत्वादुद्देशातिक्र· मेण महत्त्वोत्पत्तौ कारणमाह–तत्र ईश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्य· णुकेषु बहुत्वसंख्या तैरारब्धे त्र्यणुकादिलक्षणे कार्यद्रव्ये रूपाद्यु· त्पत्तिसमकालं महत्त्वं दीर्घत्वं च करोति । तथाचेश्वरबुद्धिर्नित्या

सकलार्थविषया चेत्येकैकगुणालम्बनास्त्येव । तामपेक्ष्यैकैकगुणैः परमाणुद्व्यणुकेषु त्रित्वमारभ्यते । परमाणुद्व्यणुकेष्विति—द्व्यणुकव्यवच्छेदार्थम्, परमाणुभ्यामेव द्व्यणुकमारभ्यते न द्व्यणुकाभ्यां व्यर्थारंभप्रसङ्गादित्युक्तम् । अतः परमाणुद्व्यणुकारब्धे कार्यद्रव्य इति । तैरारब्धम् रूपाद्यपि भवतीति तन्निषेधार्थं द्रव्यग्रहणम् । द्रव्यपदं च द्रव्यत्वेपि वर्त्तत इत्यभिव्यक्तिविवक्षया तद्व्यारब्धमिति कार्यग्रहणम् । त्र्यणुकादिलक्षण इति । त्र्यणुकं च तदादिलक्षणं कारणकार्यस्वरूपञ्चेति । यदि वा सर्वमहद्द्रव्याणामादौ लक्ष्यत इत्यादिलक्षणं तस्मिन्नुत्पन्ने रूपाद्युत्पत्तिसमकालं द्व्यणुकेषु वर्त्तमानं त्रित्वं महत्त्वं दीर्घत्वं च करोतीति । तथाहि—कार्यवस्तुनो समवायिकारणपूर्वकत्वं दृष्टमिति त्र्यणुकस्य समवायिकारणत्वादन्येनासमवायिकारणेन भवितव्यं द्व्यणुकेषु च महत्त्वस्याभावान्न कारणगुणपूर्वकत्वम् । अथाणुपरिमाणादेव त्र्यणुके महत्त्वं कारणपरिमाणात् कार्यपरिमाणस्यातिशयोपलब्धेस्तथा च पटापेक्षया सूक्ष्मास्तन्तवः तदपेक्षया तदंशा इति दृष्टमेवं द्व्यणुकापेक्षयाऽतिशयपरिमाणसम्बन्धि त्र्यणुकं भविष्यतीति । तदसत् । यच्छब्दवाच्यं कारणपरिमाणं तच्छब्दवाच्यं कार्येपीति त्र्यणुके द्व्यणुकपरिमाणमेव स्यात् । यथा महच्छब्दवाच्यात्तन्तुगणात् उत्पद्यमानः पटः तच्छब्दवाच्य इति । एवमणुपरिमाणादणुपरिमाणमेव स्यात् । परमाणुपरिमाणाच्च द्व्यणुकेपि परिमाणमिति कल्पनायामणुत्वस्यासम्भवे कथं तस्मान्महत्त्वमिति । न चाणुत्वस्यासम्भवे परमाणुरिति युक्तम् । तथा चाणोरतिशयेनाणुः परमाणुरिति व्यपदिश्यते । अन्यथा हि विशेषणमनर्थकमेव स्यात्, व्यवच्छेद्याभावात् । महत्त्वं चापेक्ष्याणुव्यवहारः । न च परमाणुरिति । न च महत्त्वमणुपरिमाणस्य कारणत्वाभ्युपगमे, तस्मादणव्भावे परमाणुव्यवहारोच्छेदप्रसङ्गात् न परमाणुपरिमाणं कारणम् । इतश्च परमाणुपरिमाणस्याणुत्वोत्पत्तावणुत्वस्य महत्त्वोत्पत्तावसमवायिकारणत्वमयुक्तम्—अत्यन्तसमानाजातीयस्यासमवायिकारणत्वोपलब्धेः । तथाचात्यन्तं समानजातीयमसमवायिकारणम्, यथा शुक्लतमाद्रूपाच्छुक्लतममेव रूपम् । अत्यन्तविजातीयं च यथा संयोगाच्छब्द इति । न चैवमणुपरिमाणं महत्त्वोत्पत्तौ परमाणु-

परिमाणं चाणुत्वोत्पत्ताविति तस्यापि परिमाणत्वान्नात्यन्तं विजातीयत्वम् । परमाणुत्वं चाणुत्वस्यैव विशेषोऽणुत्वं च महत्त्वाज्जात्यन्तरमेवेति नात्यन्तसमानजातीयम् । न चात्र प्रचयः सम्भवति, रूपादीनां स्वकार्ये सामर्थ्यावधारणात् । अतः संख्यैवासमवायिकारणमिति कल्प्यते । प्रत्यासत्तिर्महती । तथाच महत्त्वं दीर्घत्वं च त्र्यणुके वर्त्तते त्र्यणुकं च द्व्यणुकेषु त्रित्वमपि तेष्वेवेति कार्यकारणैकार्थसमवायलक्षणा प्रत्यासत्तिरिति ।

नन्वेवमीश्वरबुद्धेर्नित्यत्वाद्द्व्यणुकानां च कालान्तरमवस्थानादवस्थायित्वमेव संख्याया नित्यद्रव्यसमवेतायाश्च नित्यत्वमिति । नैष दोषः । संख्यायाः कार्यत्वादवश्यं विनाशित्वमिति । निर्हेतुकविनाशप्रतिषेधेनास्या विनाशहेतोरभावात्स्थितिहेत्वदृष्टाभावाद्विनाशः कल्प्यते । यदि वेश्वरशब्दो योगीश्वरे वर्त्तते इति तद्बुद्धेरनित्यत्वात्तद्विनाशो घटत एव संख्यायाः, तथाहि—द्व्यणुके क्रियोत्पन्ना यदैव विभागमारभते संयोगस्य विनश्यत्ता तदैवैकत्वसामान्ये ज्ञानमुत्पद्यते । अपेक्षाबुद्धेरुत्पद्यमानता ततः संयोगस्य विनाशः उत्तरसंयोगस्योत्पद्यमानता अपेक्षाबुद्धेरुत्पादस्त्रित्वस्योत्पद्यमानता ततो द्व्यणुकाभ्यां संयोगस्योत्पादस्त्र्यणुकस्योत्पद्यमानता विभागकर्मणोर्विनश्यत्ता त्रित्वस्योत्पादः तत्सामान्यज्ञानस्योत्पद्यमानता ततस्त्र्यणुकस्योत्पादो विभागकर्मणोर्विनाशस्त्रित्वसामान्यज्ञानस्योत्पादो महत्त्वदीर्घत्वयोरुत्पद्यमानता अपेक्षाबुद्धेर्विनश्यत्ता त्रित्वगुणबुद्धेरुत्पद्यमानता ततो महत्त्वदीर्घत्वयोरुत्पादोऽपेक्षाबुद्धेर्विनाशः त्रित्वगुणस्य विनश्यत्ता गुणबुद्धेरुत्पादो द्रव्यज्ञानस्योत्पद्यमानता, ततो द्रव्यज्ञानसमकालं त्रित्वस्यापि विनाश इति । महत्त्वान्महत्त्वमुत्पद्यत इत्याह—द्विबहुभिर्महद्भिश्चारब्धे कारणमहत्त्वान्येव महत्त्वमारभन्त इति । द्वे च बहवश्च तैर्द्विबहुभिः । किंविशिष्टैर्महद्भिरारब्धे कार्यद्रव्ये कारणगतानि महत्त्वान्येव महत्त्वमारभन्ते न बहुत्वम् । कथम् ? समानसंख्यैः कारणैरारब्धे कार्येऽतिशयदर्शनात् । तथाहि—स्थूलैश्चतुर्भिरारब्धं कार्यमकमन्यैश्च सूक्ष्मैश्चतुर्भिरेव, यत्तु स्थूलैरारब्धं तदतिशयेन महत् सम्पद्यत इति महत्त्वस्यैव कारणत्वं संख्यायाश्चोभयत्र साधारणत्वात्

कारणत्वे परिमाणस्याविशेषः स्यात् । यत्र च द्वयोरारम्भकत्वम् तत्र बहुत्वासम्भवेन महत्त्वस्यैव कारणत्वमिति ।

अन्ये तु संख्यायाः परिमाणवदन्वयव्यतिरेकाभ्यामन्यत्र सामर्थ्यावधारणादिहापि कारणत्वमिति मन्यन्ते । यत्त्वेदं समानसंख्यैरारब्धेऽप्येकत्रातिशयदर्शनं तत्संख्यायाः कारणत्वप्रतिषेधपरम् । परिमाणत्वस्याप्यकारणत्वप्रसङ्गात् । तथाहि–यथा समानसंख्यैरारब्धमपेक्ष्य तत्र परिमाणातिशयः यथा स्थूलतमैः समानसंख्यैरारब्धमपेक्ष्य तत्परिमाणस्यानतिशयोपलब्धेः परिमाणस्याप्यकारणत्वं स्यात् । तथाऽधिकपरिमाणापेक्षयानतिशयसद्भावेऽप्येतत् कारणम् अन्वयव्यतिरेकाभ्यां सामर्थ्यावगतेरिष्यते । तत्सद्भावे तस्य भावस्तदभावे चाभाव इत्येतत् संख्यायामपि समानम् । यदि चात्र महत्त्वोत्पत्तावकारणं संख्या तर्हि स्थूलैस्त्रिभिरारब्धमेकमन्यच्चतुर्भिरित्युभयत्रापि कारणपरिमाणस्याविशेषात् कार्यपरिमाणस्याविशेषः स्यात् । न चैतत्, चतुर्भिरारब्धे परिमाणातिशयदर्शनात् । अतः संख्यापि कारणमिति । तथा समानसंख्यैः समानपरिमाणैश्चारब्धे महत्त्वमुभाभ्यां सम्पद्यत इति युक्तमन्यत्रोभयोः सामर्थ्यावधारणादिह प्रत्यासन्नत्वाच्चेति । तथाच त्रितन्तुकादिपरिमाणं त्रितन्तुकादौ वर्त्तते । त्रितन्तुकादि च तन्तुषु तत्परिमाणं च तत्संख्या च तेष्वेवेति कार्यकारणैकार्थसमवायलक्षणा प्रत्यासत्तिरिति । कथं तर्हीदं वाक्यम्–कारणमहत्त्वान्येव महत्त्वमारभन्ते न बहुत्वमिति । अवधारणप्रतिषेधार्थम् । तथाहि–यदुक्तं समानसंख्यैरारब्धेऽतिशयदर्शनात् कारणमहत्त्वान्येव महत्त्वमारभन्ते इति । एतन्न । बहुत्वस्याप्युक्तन्यायेन कारणत्वात् । यदि वा समानसंख्यैरारब्धेऽतिशयदर्शनादिति महत्त्वस्य कारणत्वोपदर्शनमेतत् नावधारणम् इति । प्रचयस्य कारणत्वमाह–प्रचयश्च स्थूलपिण्डयोर्वर्त्तमानः पिण्डारम्भकावयवप्रशिथिलसंयोगापेक्ष इतेरतरपिण्डावयवसंयोगापेक्षो वा द्वितूलके महत्त्वमारभत इति । तूलपिण्डश्च तूलपिण्डश्च तूलपिण्डौ, तयोर्वर्त्तमानः संयोगः प्रचयः, किंविशिष्टः पिण्डारम्भकप्रशिथिलसंयोगापेक्ष इति । पिण्डारम्भकाश्च प्रशिथिलसंयोगाश्च तानपेक्षत इति तदपेक्षः इतरेतरपिण्डावयवसंयोगापेक्षश्चेति वा समुच्चयेन तु विकल्पः । अपेक्षाकारणत्वेनाभ्युपगतयोरुभयोरप्यत्र

सद्भावात् । इतरस्य पिण्डस्येतरपिण्डावयवैः संयोगस्तथेतरस्ये-तरावयवैरिति । इतरेतरपिण्डयोर्वा येऽवयवास्तेषां संयोगास्तानपे-क्षत इति तदपेक्षः । स च द्वाभ्यां तूलकाभ्यामारब्धेपि द्वितूलके मह-त्त्वमारभत इति । त्रितूलकादावप्येतत्समानम् । प्रत्यासत्तिस्तु महती द्वितूलकपरिमाणाद्वितूलके वर्त्तते । द्वितूलकं तु तूलपिण्डयोस्तत्सं-योगोपि । तत्रैव बहुत्वमहत्त्वयोः सद्भावेपि कारणत्वप्रतिषेध इत्याह—न बहुत्वमहत्वानि द्वितूलकादौ महत्त्वमारभन्ते । कुतः? समानसंख्या-पलपरिमाणैरारब्धेऽतिशयदर्शनात् । तथाहि—त्रिभिस्तूलपिण्डैः पञ्चपलैः प्रशिथिलावयवसंयोगैरारब्धमेकमन्यच्च तद्विपरीतै-स्तत्र यत्प्रशिथिलसंयोगावयवैरारब्धं तत्र परिमाणातिशयो दृष्टः इति प्रचयस्यैव कारणत्वं न संख्यापलपरिमाणानाम्, तत्कारणत्वे चोभयत्राविशेषः स्यात् । अथ पलस्य सर्वत्र परिमाणाकारणत्वात् प्रसक्त्यभावे न युक्तः प्रतिषेधः । तथाहि—पाषाणादौ पलातिशय-सद्भावेपि परिमाणस्यातिशयाभावः तूलपिण्डादौ च तदभावे-प्यतिशयोपलब्धेः न पलस्य गुरुत्वविशेषत्वात् कारणत्वम् । किम-र्थस्तत्र प्रतिषेधः । व्यामोहप्रतिषेधार्थः, तथा च परे व्यामोहाद-द्येवंविधस्यापि पलस्य कारणत्वं प्रतिपद्येरन् । तदपि नास्ति । समानपलैरारब्धेऽतिशयदर्शनात् । अन्ये त्वस्यैव दोषस्य परिहारार्थं पलशब्दस्य समानशब्दपर्यायतां ब्रुवते—समानसंख्यापलपरिमाणैरि-ति । समानसंख्यैः समानपरिमाणैरित्यर्थः ।

ननु चायुक्तमवधारणं 'प्रचयस्यैव कारणत्व मिति' बहुत्वमहत्त्व-योरप्यन्यत्र सामर्थ्यावधारणे सतीह प्रत्यासन्नत्वात् । न च समान-संख्यापलपरिमाणैरारब्धेप्येकत्रातिशयदर्शनं बहुत्वमहत्त्वयोः का-रणत्वप्रतिषेधे हेतुः,अन्यापेक्षयानतिशयसद्भावे प्रचयस्याप्यकारण-त्वप्रसङ्गात् । तथाहि—समानसंख्यापलपरिमाणैः प्रशिथिलावयव-संयोगैश्चतुर्भिरारब्धमेकमन्यच्च तथाविधैस्त्रिभिरिति चतुर्भिरारब्धे-तिशयदर्शनात् संख्यापि कारणम् । तथा स्थूलैश्चतुर्भिः प्रशिथिला-वयवसंयोगैरारब्धमेकमन्यच्च स्थूलतमैस्तथाविधैरेवेत्यत्र कार-णं—परिमाणातिशयेन कार्यपरिमाणस्यातिशयोपलब्धेः परिमाण-स्यापि कारणत्वम् । यत्र तु समानसंख्यापरिमाणैः प्रशिथिलावयव-संयोगारब्धैर्महत्त्वमारभ्यते, तत्राविशेषेण त्रितयस्यापि कारण-

त्वमन्यत्र सामर्थ्यावधारणे सतीह प्रत्यासन्नत्वात् । वाक्यस्य तु व्याख्यानं पूर्ववत् ।

अणुत्वोत्पत्तौ कारणमाह द्वित्वसंख्या चाण्वोर्वर्त्तमाना द्व्यणुकेऽणुत्वमारभत इति । द्व्यणुकाणुपरिमाणं कार्य्यं तस्य हि समवायिकारणं द्व्यणुकमित्यन्येनासमवायिकारणेन भवितव्यम् । परमाणुपरिमाणस्य चारम्भकत्वप्रतिषेधेऽन्यस्य चासम्भवाद्वित्वसंख्यैवाण्वोर्वर्त्तमाना कार्यकारणैकार्थसमवायेन द्व्यणुकाणुपरिमाणोत्पत्तावसमवायिकारणमिति । अणुशब्दश्च सामान्यशब्दत्वात्परमाणावपि वर्त्तत एव, अणुत्वे सति परम इति विशेषणात् । विनाशस्तु द्वित्वसंख्यायाः पूर्ववद्व्याख्येयः ॥

दीर्घत्वोत्पत्तौ कारणमाह—महत्त्ववत् त्र्यणुकादौ कारणबहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो दीर्घत्वस्योत्पत्तिरिति । यथा हि महत्त्वं कारणबहुत्वसमानजातीयप्रचयेभ्यो भवत्येवं दीर्घत्वमपीति ॥ त्र्यणुके कारणबहुत्वादेव दीर्घत्वं द्वितन्तुके कारणदीर्घत्वादेवेति त्रितन्तुकादौ बहुत्वदीर्घत्वाभ्यां त्रितूलकादौ प्रशिथिलावयवसंयोगारब्धैः समस्तैः कारणबहुत्वदीर्घत्वप्रचयैर्दीर्घत्वमारभ्यत इत्यतिदेशार्थः । तथाणुत्ववद्वित्वसंख्यातो ह्रस्वत्वस्योत्पत्तिरिति । यथा कारणान्तरासंभवाद्वित्वसंख्याणुत्वस्योत्पत्तावसमवायिकारणमेवं ह्रस्वत्वस्यापीति । अथ समानजातीयकारणाजन्यत्वात् त्र्यणुकादिषु वर्त्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः द्व्यणुके चाणुत्वह्रस्वत्वयोरिति । यतः कारणभेदात् भिद्यन्ते पदार्था महत्त्वदीर्घत्वादौ तदभाव इति । तन्न भवति । मासभेदेन महत्त्वदीर्घत्वयोर्भेदसद्भावे सति तज्जनकयोः कारणसामग्र्योर्भेदोपपत्तेः । तथाहि—कार्यभेदेन सामग्रीभेदो ज्ञायते स चेहास्त्येव, प्रतिभासभेदादित्याह—तत्रास्ति महत्त्वदीर्घत्वयोः परस्परतो विशेषः । कुतो ? महत्सु दीर्घमानीयतां दीर्घेषु महदिति व्यवहारदर्शनात् । अन्यथा हि महत्त्वाविशेषात् ततो दीर्घत्वेनातिशय्यानयनं दीर्घेषु च महत्त्वेनेति न स्यात् । दृष्टञ्चैतत् । तस्माद्दीर्घत्वं महत्त्वात् भेदेन प्रतिपन्नं महत्त्वं च दीर्घत्वादिति प्रतिभासभेदाद्रूपादीनामिव भेदः । समानकारणजन्यत्वं च समवाय्यसमवायिनिमित्तापेक्षया विपाकजैर्व्यभिचरति इति नाभेदे हेतुः । सामग्र्यपेक्षा-

यां तु समानकारणत्वमसिद्धम् कार्यभेदेन तद्भेदोपपत्तेः । अणुत्व-ह्रस्वत्वयोस्तु व्यवहारविशेषस्तद्दर्शिनामिति । योगिनां प्रत्यक्षस्ते-षामतीन्द्रियार्थदर्शित्वात् । ह्रस्वत्वसद्भावो अस्तु भाक्तव्यवहारेण पूर्वं व्यवस्थापित इति विद्यमानत्वाद्योगिनामवश्यामितरपदार्थ-व्यावृत्ततया ग्रहणमित्यलम् । एतच्चतुर्विधमुत्पाद्यमाधारविनाशा-देव विनश्यतीति कारणान्तरप्रतिषेधार्थमवधारणम् । उत्पाद्यग्र-हणं तु नित्यपरिमाणव्यवच्छेदार्थमिति ॥

इदानीमुद्देशक्रमेणावसरप्राप्तस्य पृथक्त्वस्य लक्षणपरीक्षार्थं पृथक्त्वमपोद्धारव्यवहारकारणमित्यादिप्रकरणम् ।

(भा०) पृथक्त्वमपोद्धारव्यवहारकारणम् । तत्पु-नरेकद्रव्यमनेकद्रव्यं च । तस्य तु नित्यानित्यत्वनिष्प-त्तयः सङ्ख्यया व्याख्याताः ।

एतावांस्तु विशेषः—एकत्वादिवदेकपृथक्त्वादि-ष्वपरसामान्याभावः सङ्ख्यया तु विशिष्यते तद्वि-शिष्टव्यवहारदर्शनादिति ॥

(व्यो०) व्यवहृतिर्व्यवहारो ज्ञानं व्यवह्रियतेऽनेनेति व्यवहारोऽभिधानं तयोर्हेतुः । हेतुः पृथक्त्वमित्युक्तेतिप्रसङ्गस्तदर्थमपोद्धारग्रहणम् । अपो-द्धरणमपोद्धारः पृथक्करणम् । तथाप्यपोद्धारव्यवहारहेतुत्वमाकाशात्म-नोर्न व्यावृत्तमिति विशेषत्वे सतीति पदमूह्यम् । पृथक्त्वसामान्यव्यव-च्छेदार्थं च द्रव्यग्रहणमिति । पृथक्त्वमितरेभ्यो भिद्यते द्रव्यविशेष-णत्वे सत्यपोद्धारव्यवहारकारणत्वात् । यास्त्वितरेभ्यो न भिद्यते, न चासावेवम्, यथा रूपादिरिति । व्यवहारो वा साध्यः। तथा परी-क्षापरं च वाक्यम् । अपोद्धारव्यवहारो हि विशेष्यव्यवहारः । स च नर्ते विशेषणात् भवतीति रूपादिव्यवहारविलक्षणत्वाद्विलक्षणे-नैव निमित्तेन भवितव्यम्, तथा रूपाद्यनुपलब्धौ पृथगितिव्यवहार-दर्शनाच्च । न चेदमस्मात्पृथगितिव्यवहारो विशेषसम्बन्धात् भवि-ष्यतीति वाच्यम् । अनित्येषु नित्यविशेषाणामभावात् । अथानित्ये-ष्वसाधारणधर्मसम्बन्धः पृथगितिव्यवहारे निमित्तम् । तन्न । त-द्विशिष्टताऽनुपलब्धेः । न हि पृथगितिव्यवहारे द्रव्यरूपादिकर्मसा-

मान्यात्मकासाधारणधर्मविशिष्टता प्रतिभाति । यथाभिहितं तेभ्योऽर्थान्तरं विशेषणं न पृथक्त्वम् । अथेतरेतराभावस्तर्हि निमित्तं, तथाहि—इदमिदं न भवतीदमस्माद्व्यावृत्तं पृथगर्थान्तरं विलक्षणमिति प्रत्ययाः सर्वत्र तन्निमित्ता एवेति । न । पदार्थान्तरावधिं विनैकत्वादिसंख्याविशिष्टस्य पृथगितिव्यवहारस्य ततोऽर्थान्तरत्वात् , तथाहीतरेतराभावविशिष्टो व्यवहारः पदार्थान्तरावधित्वेन प्रवर्त्तते, न चैकत्वादिसंख्यानुरक्तस्तद्विलक्षणश्चायमित्यर्थान्तरनिमित्तः।

अन्ये त्वितरेतराभावस्य प्रतिषेधामाशा(?)(१)नानाप्रत्ययजनकामिति । न । अनित्यद्रव्येषु नित्यस्य गुणस्यानुपलब्धेराश्रयविनाशेन तद्विनाशे सर्वत्रानुपलब्धिरेव स्यात् । अनित्यतायां स्वशेषद्रव्याश्रितस्योत्पत्तिकारणाभावस्तेषां क्रमेणोत्पादात् । न चान्यत्र समवेतमुपजातमन्यत्र समवैति इत्यदर्शनात् , एकस्य च नित्यस्यानेकवृत्तौ द्रव्यत्वसामान्यरूपता स्यात् । न च द्रव्यं द्रव्यमिति प्रत्ययवत्पृथक्पृथगितिपदार्थान्तरावधिं विना प्रत्ययो दृष्टः सावधिकस्तु प्रत्ययो गुणादिष्वपीतरेतराभावनिमित्तो न सामान्यनिबन्धनः, तद्विलक्षणश्चायमित्युक्तम् । अथ पृथक्त्वप्रत्यया विभिन्नस्वभावाः संख्यया विशिष्यन्त इति । अथ पूर्वं द्वित्वादरुत्पादोऽपेक्षाबुद्धिविनाशेन विनाशोपपत्तेर्न द्विपृथक्त्वादिकालेऽवस्थानम्। द्विपृथक्त्वादेश्च पूर्वमुत्पादे द्रव्यज्ञानसमकालं विनाशात् द्वित्वोत्पत्तिसमकाले नावस्थानमतो विशेष्यज्ञानोत्पत्तौ व्यापारानुपपत्तेर्द्वित्वादेर्न विशेषणत्वमिति । अथैकस्मिन्नेव काले विभिन्नपुरुषयोरपेक्षाबुद्धिद्वारेणोभयोरुत्पत्तिसम्भवाद्युक्तं द्वित्वादेर्विशेषणत्वमिति चेत् । न । पुरुषान्तरबुद्धिसम्पादितस्य द्वित्वादेः पुरुषान्तरेणाग्रहणात् । गृहीतं च विशेषणमिति । नैष दोषः । स्मर्यमाणस्यापेलक्षणत्वाभ्युपगमात् । तथाहि—द्विपृथक्त्वोत्पादिकायाः स्वकारणात् अपेक्षाबुद्धेरुत्पत्तिः द्वित्वस्मरणोत्पद्यमानता द्विपृथक्त्वस्यापेक्षमाणता। ततो द्वित्वस्मरणस्योत्पादः द्विपृथक्त्वस्योत्पादोऽपेक्षाबुद्धेर्विनश्यत्ता द्विपृथक्त्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः । ततो द्वित्वस्मरणाद्विपृथक्त्वज्ञानजनकत्वमेवेति मन्यमाना गुणादिष्वप्येतस्मादयं व्यावृत्तो

(१) अत्र व्योमवती पाठः परिभ्रष्ट इति प्रतिभाति ।

विलक्षण इत्यादिव्यवहारः पृथक्त्वनिमित्तः, स च निर्गुणत्वात् गुणादीनामुपचार इति मन्यन्ते। न च पृथगिति ज्ञानं निर्विषयं वासनाप्रभवम्,तस्याः पूर्वमेव प्रतिषेधात्। लक्षणेन लक्ष्यमाणस्यैकानेकत्वोपलब्धौ संशये सति तन्निरासार्थं विभागमाह तत्पुनरेकद्रव्यमनेकद्रव्यञ्चेति। एकमेव द्रव्यमाश्रयोऽस्येत्येकद्रव्यम्, अनेकमेव च द्रव्यमाश्रयोऽस्याविनश्यद्द्रव्यस्येत्यनेकद्रव्यं तस्य द्विविधस्यापि नित्यानित्यत्वनिष्पत्तयः संख्यया व्याख्याता इत्यतिदेशः। तथा ह्येकपृथक्त्वं नित्येष्वनिष्पद्यमानत्वान्नित्यम्। कार्येषु च कारणगुणपूर्वकमाश्रयविनाशादाशु विनश्यतीत्यतिदेशार्थः। द्विपृथक्त्वादेर्द्वित्वादिवदपेक्षाबुद्धित उत्पत्तिर्विनाशस्तु तद्विनाशात्। क्वचिदाश्रयविनाशाच्च। शतपृथक्त्वाद्युत्पत्तिस्तु शतसंख्योत्पत्तिन्यायेनेत्यतिदेशः। नन्वेवं तर्हि शतसंख्यातो न विशेषः स्यादित्याशङ्क्याह—एतावांस्तु विशेषः। एकत्वादिवदेकपृथक्त्वाद्यपरसामान्याभाव इति। यथा हि संख्यात्वव्यतिरेकेणापरमेकत्वादिसामान्यमस्ति नैवमेकपृथक्त्वादीति। अथानुगताज्ञानादयुक्तमेतत्। नान्यथा तदुपपत्तेः। तथाहि—द्रव्यगुणकर्मानिमित्तमबाध्यमानमनुगतं ज्ञानं सामान्यसत्तां दर्शयति। पृथक्त्वे चैकत्वादिसंख्यावशादनुगतज्ञानं घटत इत्याह संख्यया तु विशिष्यते। कुतस्तद्विशिष्टव्यवहारदर्शनात्–इदमेकं पृथक् द्वे पृथक् त्रीणि पृथगित्यादि। अथाशेषद्रव्येष्वेकमेवास्तु पृथक्त्वं संख्यावत् विशेषणज्ञानत्वाद्विशेषणमपेक्षते, न च रूपादीनामन्यतमं निमित्तं तद्व्यवहारविलक्षणत्वादिति निमित्तान्तरेण भवितव्यमिति।

(१)तत्क्रियया गुणबुद्धेरुत्पादो द्रव्यबुद्धेरुत्पद्यमानता द्वित्वस्मरणस्य विनश्यत्ता अपेक्षाबुद्धेर्विनाशः द्विपृथक्त्वगुणस्य विनश्यत्ता ततो द्वे पृथगिति द्रव्यबुद्धेरुत्पादः गुणबुद्धेर्विनश्यत्ता द्वित्वस्मरणस्य विनाशोऽपेक्षाबुद्धिविनाशात् गुणस्य विनाशः सं·

---

(१) इतःप्रभृति पृथक्त्वप्रकरणान्तः पाठो संयोगप्रकरणे आदर्शपुस्तके आसीत् किन्तु द्विपृथक्त्वोत्पादकप्रक्रियानिरूपकत्वादयमत्र निवेशितोऽपि स्थानभ्रष्टत्वात्पाठभ्रष्टत्वाच्चासंगत इव दृश्यते स च विद्वाद्भिः स्वयं योजनीयः।

स्कारस्योत्पद्यमानता ततः संस्काराद्द्रव्यबुद्धेर्विनाश इति । यदि वा द्वित्वोत्पादिकाया अपेक्षाबुद्धेरुत्पादो द्वित्वस्योत्पद्यमानता द्विपृथक्त्वोत्पादिकायाश्चापेक्षाबुद्धेरुत्पद्यमानता ततो द्वित्वस्मरणस्योत्पादः तद्बुद्धेरुत्पद्यमानता द्विपृथक्त्वोत्पादिकायाश्चापेक्षाबुद्धेरुत्पादो द्विपृथक्त्वस्योत्पद्यमानता द्वित्वोत्पादिकाया अपेक्षाबुद्धेर्विनश्यत्ता ततो द्विपृथक्त्वस्योत्पादः द्वित्वगुणबुद्धेरुत्पादः द्वित्वगुणात्तज्ज्ञानात्तदेकार्थसमवायाच्च द्विपृथक्त्वेगुणबुद्धेरुत्पद्यमानता अपेक्षाबुद्धेर्विनाशः द्वित्वस्य विनश्यत्ता द्विपृथक्त्वोत्पादिकायाश्चापेक्षाबुद्धेर्विनश्यत्तेत्येकः कालः। ततो द्विपृथक्त्वगुणबुद्धेरुत्पादो द्रव्यबुद्धेरुत्पद्यमानता द्वित्वगुणस्य विनाशः तद्बुद्धेर्विनश्यत्ता द्विपृथक्त्वोत्पादिकाया अपेक्षाबुद्धेर्विनाशो द्विपृथक्त्वगुणस्य विनश्यत्तेत्येकः कालः। ततो द्वे पृथगिति द्रव्यबुद्धेरुत्पादो गुणबुद्धेर्विनश्यत्ता द्विपृथक्त्वगुणस्य विनाशो द्वित्वगुणबुद्धेश्च विनाशः संस्कारस्योत्पद्यमानता। ततः संस्काराद्द्रव्यबुद्धेर्विनाशः इति। अत्र तु विद्यमानस्य द्वित्वगुणस्य स्वानुभवसहकारिणो द्विपृथक्त्वगुणज्ञानोत्पत्तौ व्यापार इति विशेषः।

अन्ये त्वेकैकगुणालम्बनैका बुद्धिरुत्पद्यते। द्वित्वद्विपृथक्त्वयोरुत्पद्यमानतेति मन्यन्ते। ततो द्वित्वद्विपृथक्त्वयोरुत्पादो द्वित्वगुणज्ञानस्योत्पद्यमानता ततो द्वित्वगुणज्ञानस्योत्पादो द्विपृथक्त्वज्ञानस्योत्पद्यमानता अपेक्षाबुद्धेर्विनश्यत्ता ततो द्विपृथक्त्वगुणज्ञानस्योत्पादो द्रव्यज्ञानस्योत्पद्यमानता द्वित्वगुणज्ञानस्य विनश्यत्ता अपेक्षाबुद्धेर्विनाशो द्वित्वद्विपृथक्त्वयोर्विनश्यत्ता ततो द्रव्यज्ञानस्योत्पादो द्विपृथक्त्वगुणज्ञानस्य विनाशो द्वित्वद्विपृथक्त्वयोर्विनाशो संस्कारस्योत्पद्यमानता ततः संस्काराद्द्रव्यबुद्धेर्विनाश इत्यत्र तु विद्यमानस्य द्वित्वगुणस्य द्वे पृथगिति द्रव्यज्ञानस्योत्पत्तावपि व्यापार इति विशेषः। अथ समवेतानामेव गुणकर्मसामान्यानां विशेषणतोपलब्धेः कथं द्विपृथक्त्वादावसमानं द्वित्वादि विशेषणमिति चेत्। बाधकोपपत्तेरुपचारेणेत्युक्तम् पदार्थसङ्करे। तथाच सूत्रम्–'गुणकर्मसु गुणकर्माभावात् गुणकर्मापेक्षं न विद्यत' इति। गुणकर्मसु समवेतानां गुणकर्मणामभावात्तदपेक्षणम् मुख्यज्ञानं नास्तीति॥

(भा०) संयोगः संयुक्तप्रत्ययनिमित्तम्। स च

द्रव्यगुणकर्महेतुः। द्रव्यारम्भे निरपेक्षः—तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्चेति वचनात्। गुणकर्मारम्भे तु सापेक्षः-संयुक्तसमवायाद् अग्नेर्वैशेषिकमिति वचनात्।

अथ कथंलक्षणः कतिविधश्चेति ?

अप्राप्तयोः प्राप्तिः संयोगः। स च त्रिविधः—अन्यतरकर्मजः उभयकर्मजः संयोगजश्च। तत्रान्यतरकर्मजः:-क्रियावता निष्क्रियस्य यथा स्थाणोः श्येनेन विभूनां च मूर्तैः। उभयकर्मजो—विरुद्धदिक्क्रिययोः सन्निपातः यथा मल्लयोर्मेषयोर्वा। संयोगजस्तूत्पन्नमात्रस्य चिरोत्पन्नस्य वा निष्क्रियस्य कारणसंयोगिभिरकारणैः कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः संयोगः।

स चैकस्माद् द्वाभ्यां बहुभ्यश्च भवति। एकस्मात् तावत् तन्तुवीरणसंयोगात् द्वितन्तुकवीरणसंयोगः। द्वाभ्यां तन्त्वाकाशसंयोगाभ्यामेको द्वितन्तुकाकाशसंयोगः। बहुभ्यश्च तन्तुतुरीसंयोगेभ्य एकः पटतुरीसंयोगः।

एकस्माच्च द्वयोरुत्पत्तिः। कथम् ? यदा पार्थिवाप्ययोरण्वोः संयोगे सत्यन्येन पार्थिवेन पार्थिवस्यान्येनाप्येन चाप्यस्य युगपत्संयोगौ भवतस्तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते। ततो यस्मिन् काले द्व्यणुकयोः कारणगुणपूर्वक्रमेण रूपाद्युत्पत्तिः तस्मिन्नेव काले इतरेतरकारणाकारणगतात् संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्प-

येते । किं कारणम् ? कारणसंयोगिना ह्यकारणेन कार्यमवश्यं संयुज्यत इति न्यायः । अतः पार्थिवं द्व्यणुकं कारणसंयोगिनाप्येनाणुना सम्बद्ध्यते आप्यमपि द्व्यणुकं कारणसंयोगिना पार्थिवेनेति । अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्धयोः कथं परस्परतः सम्बन्ध इति ? तयोरपि संयोगजाभ्यां संयोगाभ्यां सम्बन्ध इति ।

नास्त्यजः संयोगो नित्यपरिमण्डलवत् पृथगनभिधानात् । यथा चतुर्विधं परिमाणमुत्पाद्यमुक्त्वाऽऽह नित्यं परिमण्डलमित्येवमन्यतरकर्मजादिसंयोगमुत्पाद्यमुक्त्वा पृथङ्नित्यं ब्रूयान्न त्वेवमब्रवीत् तस्मान्नास्त्यजः संयोगः । परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतरकर्मजः संयोगः । विभूनां तु परस्परतः संयोगो नास्ति युतसिद्ध्यभावात् । सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं चेति ।

विनाशस्तु सर्वस्य संयोगस्यैकार्थसमवेताद्विभागात्, क्वचिदाश्रयविनाशादपि । कथम् ? यदा तन्त्वोः संयोगे सत्यन्यतरतन्त्वारम्भके अंशौ कर्मोत्पद्यते तेन कर्मणा अंश्वन्तराद्विभागः क्रियते विभागाच्च तन्त्वारम्भकसंयोगविनाशः संयोगविनाशात् तन्तुविनाशस्तद्विनाशे तदाश्रितस्य तन्त्वन्तरसंयोगस्य विनाश इति ॥

(व्यो०) इदानीमुद्देशवतः संयोगस्य लक्षणपरीक्षार्थं संयोगः संयुक्तप्रत्ययनिमित्तमित्यादिप्रकरणम् । प्रतीतिः प्रत्ययो ज्ञानं प्रतीयतेऽनेनेति प्रत्ययोऽभिधानं तयोर्निमित्तं सर्वेऽपि पदार्था इति संयुक्तप्र-

हणम्। तथापि संयुक्तप्रत्ययनिमित्तत्वमाकाशात्मनोर्विद्यत इति विशेषणत्वे सतीति कार्यमतः संयोग इतरेभ्यो भिद्यते विशेषणत्वे सति संयुक्तप्रत्ययनिमित्तत्वात्, यस्त्वितरस्मादसंयोगान्न भिद्यते न चा सावेवं यथा रूपादिरिति। परीक्षापरत्वेनापि सम्बध्यते संयोगः संयुक्तप्रत्ययनिमित्तमिति वाक्यम्।

अथ विशिष्टोत्पादाद्द्रव्यमेव संयुक्तव्यवहारनिमित्तम्। तथाहि—विश्लेषक्षणात्संश्लेषक्षणोत्पादे संयुक्तव्यवहारो दृष्टो नान्यथेति। तदसत्। विशिष्टतायाः व्यतिरेकानभ्युपगमे तस्या द्रव्यरूपतया सर्वत्राविशेषात् द्रव्यमात्रे संयुक्तप्रत्ययः स्यात्। व्यतिरेके तु येन सता रूपादिविलक्षणेन संयुक्त इति व्यवहारः स एव संयोग इति न किंचित् बाध्यते। संश्लेषस्यात्र संयोगरूपत्वादिति। न चायं व्यवहारो वासनानिमित्तः। तस्याः पूर्वमेव प्रतिषेधात्। अर्थक्रियामाह स च द्रव्यगुणकर्महेतुरिति। तत्सद्भावे प्रमाणं चेदमित्यवेहि। न हि तन्तुसंयोगादृते पटस्योत्पत्तिर्भेरीदण्डसंयोगं विना च शब्दस्य हस्ततोमरादिसंयोगाभावे च तोमरकर्मण इति संयोगोऽभ्युपगन्तव्यः। कथं पुनर्द्रव्यारम्भकत्वमस्येत्याह—द्रव्यारम्भे निरपेक्ष इति। यद्यपि समवाय्यादिकरणमपेक्षते। तथाप्यनपेक्षः पश्चाद्भाविकारणानपेक्षणात्। यथाच व्याख्यातमेतत्तथा भवति—नान्यथेति। कुतो ज्ञातमिति चेत्। 'सापेक्षेभ्यो निरपेक्षेभ्यश्चेति' वचनात्। अस्य च सूत्रस्यायमर्थः। पूर्वमन्त्यतन्तुसंयोगोत्पत्तेः सापेक्षास्तन्तवः पटं नारभन्ते। तज्जातीयानां तु पटान्तरे सामर्थ्यावधारणात् अन्त्यतन्तुसंयोगसम्पादनायोपादीयन्ते। तदुत्पत्तौ चानपेक्षास्तदनन्तरमेवारम्भन्त इति द्रव्यारम्भे निरपेक्षः संयोगः। अत एवान्त्यसंयोगव्यतिरेकेण नान्या शक्तिस्तस्याश्चरमसहकारिरूपत्वादित्युक्तं पृथिव्यधिकारे। न च पूर्वस्य विरलदेशक्षणस्य विनिवृत्तौ अविरलदेशक्षणस्य विशिष्टस्योत्पादे पटव्यवहारादलं संयोगकल्पनयेति वाच्यम्। क्षणभङ्गस्य प्रतिषेधात्। अवयवव्यतिरिक्तस्य चावयविनो व्यवस्थापनादिति। गुणकर्मारम्भे तु सापेक्षः पश्चाद्भाविनिमित्तापेक्षत्वादिति। कथं ज्ञायत इत्याह–'संयुक्तसमवायादग्नेर्वैशेषिक'मिति वचनात्। अस्यार्थः। संयुक्तः पार्थिवेन परमाणुनाऽग्निः तत्र समवायादग्नेः सम्बन्धिनं वै-

शेषिकगुणमुष्णस्पर्शमपेक्षमाणः पार्थिवपरमाण्वाग्निसंयोगः पाकजानारभते । अग्नेः सम्बन्धिनमुष्णस्पर्शमपेक्षमाणो वैशेषिकं रूपादिकमारभते । ननूष्णस्पर्शस्य चिरोत्पादात्र पश्चाद्भावित्वमस्ति, पूर्वोत्पन्नकारकापेक्षित्वं द्रव्यारम्भे संयोगस्येष्यत एवेत्यविशेषः स्यात् । न श्यामादिनिवृत्तिविशिष्टस्य पश्चाद्भावात् । तथा हस्तात्मसंयोगः पश्चाद्भाविनं प्रयत्नमपेक्षमाणो हस्ते कर्मारभते । नन्वेवमप्यात्ममनःसंयोगस्य बुद्ध्याद्युत्पत्तौ न पश्चाद्भाविनिमित्तत्वमस्ति शरीरसम्बन्ध इति चेत् । न । तस्य पश्चाद्भावानुपपत्तेः । यद्यपि संहारावस्थायामात्ममनःसम्बन्धसद्भावेपि न ज्ञानं शरीरसम्बन्धे तु भवति । तथापि शुक्रशोणितसम्बन्धसमकालं मनःसम्बन्धाभ्युपगमादवश्यं प्राक्तनसंयोगस्य निवृत्तिरिति न तदपेक्षया शरीरसम्बन्धश्चरमभावी परिनिष्पन्नेपि च शरीरे मनसः क्रियाद्वारेण सम्बन्धात्तथा शरीरस्यापि भवतीति न तत्र पूर्वापरभावे प्रमाणमस्ति । न चैवमात्ममनःसम्बन्धस्यानपेक्षित्वमेव सुखदुःखादीनां निमित्तकारणानां तदुत्तरकाले भावात् । तथाहि—इच्छोत्पत्तावात्ममनःसम्बन्धस्य सुखं स्मरणं वा पश्चाद्भावित्वादपेक्षाकारणमेवं द्वेषाद्युत्पत्तावपि दुःखादेः कारणत्वमभ्यूह्यम् । शरीरसम्बन्धस्य तु नियमेन पश्चाद्भावित्वं निषिध्यते न कारणत्वमिति । एवं कर्मोत्पत्तावपि संयोगस्य न सर्वत्र चरमभाविनिमित्तं सम्भवतीति । तथा शाखाद्युपरि पाषाणादिसंयोगात् गुरुत्वापेक्षादधोगमनम् । नदीस्रोतसि च द्रवत्वापेक्षात्तृणोदकसंयोगात्तृणादौ गमनं च गुरुत्वद्रवत्वयोः पश्चाद्भावित्वमस्तीति । नन्वेवं तर्हि गुणकर्मारम्भे सापेक्ष इत्ययुक्तम् वाक्यम् । न अयोगव्यवच्छेदानभ्युपगमात् । तथाच गुणकर्मारम्भ एव सापेक्षो न तु सापेक्ष एवानपेक्षितत्वस्याप्युपलब्धेः ।

अथ कथं लक्षणः कतिविधिश्चेति वाक्यं लक्षणस्य निर्णीतत्वाद्यर्थम् । न । लक्षणान्तराभिधित्सयास्योपपत्तेः । यद्यप्युपसर्जनस्य प्राग्लक्षणमुक्तम् । तथापि स्वातन्त्र्येण कथमस्य लक्षणमित्याशङ्का भवत्येव । परीक्षापरमेव तद्वाक्यं इत्यन्ये । यदि वा विपर्यस्तोयं कथं लक्षणमस्येति न सम्भवत्येव संयोगस्य लक्षणमिति मन्यन्ते । कतिविधश्चेति भेदार्थं प्रश्नः । तत्र लक्षणमाह अप्राप्तयोः प्राप्तिः संयोग इति । प्राप्तिः समवायोऽपि भवतीत्यप्राप्तयोरिति पदम् । पर्यायशब्दस्य

च लक्षणत्वमिष्टमेव । स च प्रत्यक्षेण गृह्यत इति न संयोगस्यासम्भवेन लक्षणस्याश्रयासिद्धत्वमिति ।

स च त्रिविध इति भेदप्रतिपादनं सामान्यलक्षणस्यासम्भवित्वपरिहारार्थम् । केन रूपेण त्रैविध्यमित्याह—अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोग इति । तत्रान्यतरस्मिन् कर्म तस्माज्जातोऽन्यतरकर्मजः यथा स्थाणोः श्येनेनेति विभूनां च मूर्तैरित्युदाहरणद्वयमवान्तरविशेषविवक्षया । तथाहि—श्येनस्थाणुसंयोगः कर्मणा संयोगेन च जन्यते । विभूनां तु परमाणुभिः संयोगः कर्मणैवेति संयोगकर्मणोश्च व्यापाराविशेषेपि कर्मणैव व्यपदेशसङ्ग्रहार्थमन्यतरकर्मजत्वमुभयत्राप्यस्तीत्यवबोधः । नन्वेवं संयोगजः कर्मजश्चेति वाच्यम्, तद्विशेषत्वादन्येषामिति । सत्यम् । तथापि कर्मजस्यैतावानेव भेद इति परिसंख्यार्थमन्यतरादिग्रहणम्, न संयोगस्य कारणत्वप्रतिषेधार्थपरम् । तथाच प्रयत्नापेक्षाच्छ्येनचरणसंयोगाच्चरणक्रियाया उत्पादो विभागस्योत्पद्यमानता श्येनावयविस्यस्वकारणात् क्रियाया उत्पद्यमानता ततः श्येनचरणविभागस्योत्पादः संयोगस्य विनश्यत्ता श्येनावयविकर्मणोऽप्युत्पादो विभागस्योत्पद्यमानता ततः श्येनचरणसंयोगस्य विनाश उत्तरसंयोगस्योत्पद्यमानता श्येनावयविविभागस्योत्पादः श्येनावयविकर्मणा च श्येनस्थाणुसंयोगो जन्यते । प्रत्यासन्नत्वे सत्युभयोः सामर्थ्यावधारणात् । अतः श्येनस्थाण्वोः समवायिकारणत्वं श्येनक्रियायास्तच्चरणस्थाणुसंयोगस्य चासमवायिकारणत्वम् । प्रत्यासत्तिस्तु श्येनचरणसंयोगस्य महत्यपि सम्भवतीत्यन्यतरावरोधे न विशेषहेतुरस्तीति वक्ष्यामः । उभयकर्मजोऽप्युभयोः कर्मणी ताभ्यां जातो यथा मल्लयोर्मेषयोर्वा । अत्राप्यवयवकर्मभ्यां विभागसमकालमवयविनः कर्माभ्युपगमे संयोगैरवयविकर्मभ्यां च संयोगो जन्यत इति चिन्त्यम् । यथा ह्यवयवकर्मावयवान्तरेण संयोगं करोत्येवं तदवयविनापीतरावयवकर्मापीतरावयवकर्मसंयोगवत्तदवयविनापीति संयोगत्रितयम् । तच्च प्रत्यासन्नत्वे सति सामर्थ्यावधारणात् कारणमिति मेषयोः समवायिकारणत्वम् ।(१) संयुक्तप्रत्यये हि विशेष्यावयवावयविसंयोगस्य

---

(१) अत्रैव द्विपृथक्त्वोत्पादकप्रक्रियापाठ आसीत् ।

चासमवायिकारणत्वं शेषं निमित्तकारणमिति । केवलोभयकर्मजत्वं च परमाणुद्वयसंयोगस्य द्रष्टव्यम् । अन्ये तूभयपदस्य लुप्तविभक्तिकस्य पूर्वोत्तरेण सम्बन्धात् संयोगकर्मजभेदस्यापि ग्रहणं भविष्यत्येवेति मन्यन्ते । तथाहि—संयोगकारणत्वेनोभयोरुपलम्भात् कर्मणः स्वशब्देनोपादाने अन्यतरः संयोगो लभ्यत एव । अन्यतरश्च कर्म चान्यतरकर्मणी ताभ्यां जातोऽन्यतरकर्मजः स चोभयः एकेन कर्मणा सङ्गत्य द्वितीयेन जन्यते । द्वाभ्यां च संयोगसद्वितीयाभ्यामिति । तथोभयः केवलकर्मजोऽप्येकेन कर्मणा जन्यते द्वाभ्यां चेति।संयोगजस्तूत्पन्नमात्रस्य चिरोत्पन्नस्य चेत्युभयस्तस्य लक्षणमाह अक्रियस्येत्यादि । अक्रियस्येत्ययं नियमः कैः सहेत्याह-अकारणैः, किंविशिष्टैः? कारणसंयोगिभिरिति । कारणेन संयोगास्ते येषां तानि तथोक्तानि तैः कारणसंयोगिभिरकारणैः सहाक्रियस्य यः संयोगः स संयोगजोऽन्यस्य कारणाभावात् । संग्रहोक्तेर्विवरणमाह—कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः संयोग इति । कारणमत्र समवायिकारणं स्वकार्यस्य तदपेक्षयान्यदकारणं तयोर्यः संयोगस्तत्पूर्वकः कार्याकार्यगतः संयोगः प्रकृतस्य कारणस्य यत् कार्यं तत् संयुक्तं चान्यदकार्यं तयोः संयोगज इति । तत्र चिरोत्पन्नस्योदाहरणं विभागजविभागावसरे वक्ष्यमाणमित्युत्पन्नमात्रस्य विभागद्वारेणोदाहरणमाह स चैकस्मादित्यादि । स च संयोगजसंयोग एकस्माद्द्वाभ्यां बहुभ्यश्च । च शब्दादेकस्माद्द्वाविति विभागः । एकस्मात्तावत्तन्तुवीरणसंयोगाद् द्वितन्तुवीरणसंयोग इति । तथाहि—तन्तोर्वीरणेन संसृष्टस्य तन्त्वन्तरेणाभिसम्बन्धे सति द्वितन्तुककमुत्पद्यते तस्य च रूपाद्युत्पत्तिसमकालं वीरणेन संयोगो जन्यत इति तदुत्पत्तावसमवायिकारणमन्वेषणीयम् । न चात्र क्रिया सम्भवत्युभयोर्निष्क्रियत्वाद्रूपादीनां च स्वकार्योत्पत्तावेव सामर्थ्यावधारणात् । असमवायिकारणं च विना वस्तुभूतस्य कार्यस्योत्पत्तिर्नोपलब्धेति तन्तुवीरणसंयोग एव समानजातीयत्वे सति प्रत्यासन्नत्वादसमवायिकारणमिति । प्रत्यासत्तिस्तु कार्यैकार्थसमवायः कार्यकारणैकार्थसमवायश्चेत्युभयरूपा च सम्भवत्येवेति । कार्यैकार्थसमवायस्यैव ग्रहणं कारणेनाऽव्यवधानादिति केचित् । महती तु यत्र कारणवृत्तीनामेव कार्ये गुणारम्भकत्वं तत्रैव ग्राह्येति । न चैकत्वारम्भकत्वे गुणाश्च गुणान्तरमारभन्त इति

सूत्रविरोधः। कारणवृत्तीनां समानजात्यारम्भकाणामेव नियमात्। तथाहि ये कारणवृत्तयः समानजातीयमेवारभन्ते तेषामनेकत्वसंख्यायुक्तानामेवारम्भकत्वमिति नियमः। तदेवं द्वितन्तुकवीरणयोः समवायिकारणत्वं तन्तुवीरणसंयोगस्यासमवायिकारणत्वम् शेषं निमित्तकारणमिति। द्वितन्तुकवीरणसंयोगस्योत्पत्तिर्द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुकाकाशसंयोग इति तन्तोराकाशसम्बद्धस्य तन्त्वन्तरेणाभिसम्बन्धे सति द्वितन्तुकमुत्पद्यते तन्तुक्रिया च तन्त्वन्तरेणेव चाकाशदेशेनापि संयोगं करोति प्रतिबन्धकाभावात्, उत्पन्ने तु द्वितन्तुके रूपाद्युत्पत्तिसमकालमाकाशेनापि संयोगो भवत्येव। किमत्र प्रमाणमिति चेत्। अनुमानम्। तथाहि द्वितन्तुकं स्वकारणसंयोगिना संयुज्यते तत्संयुक्तकारणकार्यत्वाद्वीरणसंयुक्तद्वितन्तुकवत्। आकाशं वा स्वसंयुक्तकारणकार्येण संयुज्यते तत्कारणसंयोगित्वात् द्वितन्तुकसंयुक्तवीरणवत्। सिद्धे च संयोगे तस्य कार्यत्वात् उत्पत्तिकारणं चिन्त्यम्। तत्र द्वितन्तुकाकाशयोः समवायिकारणत्वमित्यन्येनासमवायिकारणेन भवितव्यम्। न च रूपाद्युत्पत्तिसमकालं द्वितन्तुके क्रिया सम्भवतीति तन्त्वाकाशसंयोगयोः समानजातीयत्वे सति प्रत्यासन्नत्वादसमवायिकारणत्वमिति। प्रत्यासत्तिस्तूभयरूपापि सम्भवतीति पूर्ववत् ग्राह्यम्। बहुभ्यश्च तन्तुतुरीसंयोगेभ्यः एकः पटतुरीसंयोगो तन्तूनां तुर्या सह संयोगे सत्यन्त्यतन्तुसंयोगानन्तरं पट उत्पद्यते। तस्य तत्पटाद्युत्पत्तिसमकालं तुर्या सह संयोगो गृह्यते इत्युत्पत्तिकारणं वाच्यम्। तत्र पटतुर्योः समवायिकारणत्वमन्यस्यासमवायिकारणस्यानुपलब्धेस्तन्तुतुरीसंयोगानामसमवायिकारणत्वम्। प्रत्यासत्तिस्तु पूर्ववद्वाच्येति।

ननु चायुक्तमेतत्—तन्तूनां पटोत्पत्तावकारणत्वात्। कारणाकारणसंयोगपूर्वकश्च कार्याकार्यगतः संयोगः संयोगज इति। तन्तोस्तन्त्वन्तरेणाभिसम्बन्धे सति द्वितन्तुकमुत्पद्यते। पुनस्तन्त्वन्तरेणाभिसम्बन्धेऽन्यत् कार्यमित्यनेककार्यव्यवधानेन पटोत्पत्तेः कथं तन्तूनां पटोत्पत्तौ कारणत्वम्। नारब्धकार्यस्यैव सहकार्यन्तरप्राप्तावारंभकत्वे सत्यारभ्यारम्भकवादः स्यात्। तत्र च मूर्त्तानां समानासमानदेशत्वम्। तथाहि तन्तुभ्यामारब्धं तन्त्वोर्वर्त्तते। पुनर-

न्यसहिताभ्यामारब्धं तयोस्तत्र चेत्येवमुत्तरोत्तरेष्वप्यूह्यम् । अथा-न्यसहिताभ्यामारब्धमेकस्मिन्नेव वर्त्तत इत्येकद्रव्यवृत्तित्वं स्यात्। इह तन्तुषु पट इति प्रत्ययाभावश्च। तद्विनाशे चावान्तरकार्यानुप-लम्भः शेषं चारभ्यारम्भकवादे दूषणं पृथिव्याधिकारे ज्ञेयम्। तस्मा-द्व्योमादिसम्बन्धादवयवाक्रियाद्वारेणावान्तरकार्यविनाशे तन्त्वन्तरा-भिसम्बन्धकालमवस्थितसंयोगास्तन्तवः पुनः कार्यान्तरमार-भन्ते इत्येष न्यायस्तावद्यावदन्त्यतन्तुसंयोगात्पटोत्पत्तिरिति। न चा-वान्तरकार्योत्पत्तेर्वैयर्थ्यम् । तदन्तरेणाभिप्रेतकार्यानुत्पत्तेः । य-थाहि विशिष्टस्थानप्राप्तिर्नावान्तरप्राप्तिं विना सम्पद्यत इत्यकार-णत्वेपि तत्सद्भावः, तद्वदवान्तरकार्यं विनाभिप्रेतकार्यं न सम्पद्यत इति । तस्मात् सद्भावोऽभ्युपगन्तव्यः । कारणत्वं तु निषिध्यते तद-पायेप्युत्पत्तेरित्यलम् ॥

अथैकस्मात्संयोगाद्वयोः संयोगयोरुत्पत्तिः कथमित्याह यदा पा-र्थिवाप्ययोरण्वोः संयोगे सत्यन्येन पार्थिवेन परमाणुना सह पार्थि-वस्याप्येन चाप्यस्य युगपत्संयोगौ भवतः तदा ताभ्यां समानजाती-यद्रव्यसम्बन्धात् पार्थिवाप्ये द्व्यणुके युगपदारभ्येते । ततो द्व्यणुको-त्पादानन्तरं यस्मिन्नेव काले कारणगुणपूर्वप्रक्रमेण द्व्यणुकया रूपा-द्युत्पत्तिस्तस्मिन्नेव काले इतरेतरकारणाकारणगतसंयोगादितरे-तरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते। इतरः परमाणुः कारणं स्व-कार्यस्येतरः अकारणं तदपेक्षया एवमन्योपीति, तद्गताच्चत्समवे-तात् संयोगादितरेतरकार्याकार्यगतौ इतरत् पार्थिवं द्व्यणुकं कार्यं स्वकारणस्येतरश्चाप्यपरमाणुरकार्यः तथेतरदाप्यद्व्यणुकं कार्यमि-तरश्च पार्थिवपरमाणुरकार्यस्तद्गतौ संयोगौ युगपदुत्पद्येते । तत्र च द्व्यणुकपरमाण्वोः समवायिकारणत्वमिति अन्यदसमवायिकरणं चिन्त्यम्। न चात्र क्रिया सम्भवत्युभयोर्निष्क्रियत्वादिति परमा-ण्वोः संयोगः प्रत्यासन्नत्वे सति सामर्थ्यावधारणात् कारणमिति । अथ पार्थिवद्व्यणुकस्याप्येनाणुना संयोगस्तथाऽऽप्यस्य पार्थिवेने-ति किं कारणं किं प्रमाणमित्याह कारणसंयोगिना हि कार्यम-वश्यं संयुज्यत इति न्यायः प्रमाणम् । तथाहि–पार्थिवद्व्यणुकं स्व-कारणसंयोगिना संयुज्यते तत्संयुक्तकारणकार्यत्वाद्वीरणसंयुक्तद्वि-

तन्तुकवत्। आप्यो वा परमाणुः स्वसंयुक्तकारणकार्येण (१)संयोगित्वा-त्तन्तुकसंयुक्तवीरणवत् । एवमितरत्रापि वाच्यम् । यत एवमतः पार्थिवद्व्यणुकं स्वकारणसंयोगिनाप्येनाणुना सम्बध्यते, आप्यमपि द्व्यणुकं पार्थिवेनेति । अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्ध-योरिति । इतरस्य पार्थिवद्व्यणुकस्य यत् कारणं तदितरस्याकार-णमेवं आप्यद्व्यणुकस्य कारणमितरस्य पार्थिवद्व्यणुकस्याकारणं त-त्सम्बद्धयोर्द्व्यणुकयोः परस्परतः कथं सम्बन्ध इत्याह तयोरपि सं-योगजाभ्यां संयोगाभ्यां सम्बन्ध इति । यौ तौ कार्याकार्यगतौ सं-योगावेकस्मात् संयोगात् उत्पन्नौ ताभ्याम्, द्व्यणुकयोः समवायिकार-णत्वं, कार्याकार्यसंयोगयोश्चासमवायिकारणत्वम् , प्रत्यासत्तिस्तू-भयरूपापि सम्भवतीति पूर्ववत् ग्राह्या । अदृष्टादिश्च निमित्तका-रणमिति । न च द्व्यणुकस्य स्वकारणसंयोगिना परमाण्वन्तरेण द्व्यणु-कान्तरेणापि रूपाद्युत्पत्तिसमकालम् एकस्मादेव कारणाकारण-संयोगात् संयोगो भविष्यतीति वाच्यम् । तस्मिन् काले द्व्यणुकस्य कारणसंयोगित्वाभावात् । कारणसंयोगिना चाप्यकार्येण संयोगः संयोगज इति । तस्मादाप्यद्व्यणुकस्य पार्थिवेन परमाणुना संयोगः पार्थिवस्य चाप्येनेति पूर्वमेवाभिधेयम् । येन कारणसंयोगित्वात् द्व्यणुकयोरपि संयोगः संयोगजो भवतीति ।

इदानीं विभागसूत्रेऽजसंयोगानभिधानान्न्यूनत्वमित्याशङ्का-परिहारार्थमाह—नाजः संयोगोऽस्ति नित्यपरिमण्डलवत् पृथगन-भिधानात्, यथा भगवानृषिः सकलार्थदर्शी चतुर्विधं परिमाण-मुत्पाद्यमुक्त्वाऽऽह—नित्यं पारिमाण्डल्यं परमाणुपरिमाणमस्तीति, एवमन्यतरकर्मजादिसंयोगं त्रिविधमुत्पाद्यमुक्त्वा पृथङ्नित्यसंयो-गं ब्रूयात् , न त्वेवमब्रवीत् । तस्मान्नास्त्यजः संयोगः । प्रतिज्ञातं च महर्षिणा 'यद्भावरूपं तत्सर्वमभिधास्यामीति' । ननु चात्राजः संयो-गो नास्तीति प्रतिज्ञावाक्यपदयोर्व्याघातः-यथेदं च नास्ति चेति । नान्यथा प्रतिज्ञानात् । तथाहि-परमाणुभिराकाशादीनां संयोगो नित्यत्वेनाभ्युगतः परेण तस्याजत्वमेव निषिध्यते, न सद्भावः पर माणुभिराकाशादीनां संयोगोऽजो न भवति । सर्वज्ञेन महर्षिणाऽजत्वे-

(१) संयुज्यत इत्यत्रापि योजनीयम् ।

न पृथगप्रतिपाद्यमानत्वात् । यश्चाजं तदजत्वेन पृथगुपदिष्टं यथा नित्यं पारिमण्डल्यमिति ॥

अथ संयोगस्याप्राप्तिविरोधित्वं । सा तु न सम्भवत्येव । आकाशादेर्विभुत्वेन तत्परित्यागानुपपत्तेः । न चाश्रयविनाशाद्विनाशोऽत्र आश्रयस्यापि नित्यत्वात् । न चान्यद्विनाशकारणमस्तीत्यजत्वमेव । अवचनं तु व्यामोहादपि सम्भवतीत्यन्यथासिद्धम् । अस्य प्रतिषेधार्थमाह—परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतरकर्मजः संयोग इति । कथमाकाशापरित्यागेन परमाणोः संयोगा विभागाश्च भवन्तीति चेत् । यथा वृक्षापरित्यागेन देवदत्तस्य । तथाहि मूलप्रदेशादूर्ध्वप्रदेशमारोहतः पुरुषस्य वृक्षापरित्यागेनैव संयोगा विभागाश्चोपलभ्यन्ते । मूलप्रदेशे वृक्षेण संयुक्तो मध्यप्रदेशे अग्रप्रदेशे चेति । न च प्रदेशस्यैव ते संयोगाः वृक्षेण संयुक्त इति प्रत्ययोपलम्भात् । प्रदेशेनैव संयोगे प्रदेशेन संयुक्तो न वृक्षेणेति ज्ञानं स्यात् । न चैतदस्ति । वृक्षेण संयुक्त इति ज्ञानस्य सर्वस्यामवस्थायामुपलब्धेः । यदि च संयोगस्य प्रदेशवृत्तित्वात्प्रदेशेनैव संयोगो न वृक्षेणेति तर्हि तेपि प्रदेशाः स्वावयवापेक्षयावयविन इति तत्प्रदेशानां संयोगस्तेषामप्यवयवित्वात्प्रदेशानामिति तावद्यावन्निर्देशाः परमाणवः, तेषां च निष्प्रदेशत्वात् संयोगाभावेन द्व्यणुकादिप्रक्रमेण कार्यमिति क्षित्यादेरसम्भव एव । अथ निष्प्रदेशत्वेपि सति परमाणूनां प्रदेशत्वादिष्यत एव संयोगः, तर्हि द्व्यणुकानां । संयोगाभावे न त्र्यणुकमिति दूषणं तदवस्थमेव । न च परमाणुषु वर्तमानः संयोगो द्व्यणुकादिसमवेतं द्रव्यमारभते व्यधिकरणस्यारंभकत्वेऽतिप्रसङ्गात् । तस्मात् संयोगस्य प्रदेशवृत्तित्वमाश्रयाव्यापकत्वमित्यवयवेनावयविना च संयोगो घटत एव । न च प्राक्तनस्य मूलप्रदेशे वृक्षेण संयोगस्यावस्थाने सत्युत्तरसंयोगेन शक्यं भवितुमिति तद्विनाशको विभागोपि सिद्धः । यथा चात्र वृक्षापरित्यागेनैव पुरुषस्यान्यतरकर्मजाः संयोगा विभागाश्च भवन्ति तद्वदाकाशापरित्यागेनैव परमाणोः संयोगा विभागाश्च भविष्यन्तीति व्यापकत्वमतन्त्रम् । तदेवं परमाण्वाकाशादिसंयोगस्योत्पत्तिविनाशकारणोपपत्तेर्नाजत्वमिति । यच्च सूत्रकारस्यावचनं व्यामोहादपि संभवतीति इत्युक्तम् । तदसत् । तदभिहितानां पदार्थानां

प्रमाणान्तरेणापि तथाभावोपलब्धेः सम्यग्ज्ञानसिद्धौ तद्विरुद्धस्य मिथ्याज्ञानस्य निवृत्तेः।

अथ विभूनां परस्परतः संयोगो भविष्यतीति। तथा ह्याकाशमात्मादिना संयुज्यते मूर्त्तसंयोगित्वात् घटवत्। अस्य प्रतिषेधार्थमाह विभूनान्तु परस्परतः संयोगो नास्ति। युतसिद्ध्यभावात्। यत्र यत्र संयोगस्तत्रतत्र युतसिद्धिरुपलब्धा। सा च संयोगस्य व्यापिका व्यवर्त्तमाना स्वव्याप्तं संयोगं गृहीत्वा व्यावर्तत इत्यन्यथासिद्धं साधनम्। सा पुनर्युतसिद्धिर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं पृथगाश्रयसमवायित्वञ्चेति। द्वयोः पृथग्गतिमत्त्वमन्यतरस्य वेतीयं नित्यानां युतसिद्धिः। द्वयोर्युताश्रयसमवायित्वमन्यतरस्य वेत्यनित्यानाम्। अस्यास्तु विस्तरेण विचारो विभागावसरे द्रष्टव्यः। न च विभूनां पृथग्गतिमत्त्वममूर्त्तत्वात्। युताश्रयसमवायित्वमपि न सम्भवत्यंवाकार्यत्वादिति।

विनाशस्य च सहेतुकत्वात् कुतः संयोगो विनश्यतीत्याह—विनाशस्तु सर्वस्य संयोगस्यैकार्थसमवेतात् विभागादिति। ययोरेव संयोगस्तयोरेव विभागात्संयोगस्य विनाशस्तेन सता तस्यानुपलब्धेः। संयोगविनाशतस्तन्तुविनाशे तदाश्रितस्य तन्तुसंयोगस्य विनाश इति। यदा तन्तुसंयोगविनाशसमकालं तन्त्वन्तरेऽपि कर्म सम्भाव्यते तदाश्रयविनाशविभागाभ्यामपि संयोगस्य विनाश इति ज्ञेयम्॥

इदानीं विभागस्य लक्षणपरीक्षणार्थं विभागो विभक्तप्रत्ययनिमित्तमित्यादि प्रकरणम्।

(भा०) विभागो विभक्तप्रत्ययनिमित्तम्। शब्दविभागहेतुश्च।

प्राप्तिपूर्विकाऽप्राप्तिर्विभागः। स च त्रिविधः—अन्यतरकर्मज उभयकर्मजो विभागजश्च विभाग इति। तत्रान्यतरकर्मजोभयकर्मजौ संयोगवत्। विभागजस्तु द्विविधः—कारणविभागात् कारणाकारणविभागाच्च।

तत्र कारणविभागात् तावत्—कार्याविष्टे कारणे

कर्मोत्पन्नं यदा तस्यावयवान्तराद्विभागं करोति न तदाऽऽकाशादिदेशात् यदा त्वाकाशादिदेशाद्विभागं करोति न तदाऽवयवान्तरादिति स्थितिः । अतोऽवयवकर्मावयवान्तरादेव विभागमारभते ततो विभागाच्च द्रव्यारम्भकसंयोगविनाशः तस्मिन् विनष्टे कारणाभावात् कार्याभाव इत्यवयविविनाशः । तदा कारणयोर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतन्त्रं वावयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्यसंयुक्तादाकाशादिदेशाद्विभागमारभते न निष्क्रियस्य कारणाभावादुत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्गः । न तु तदवयवकर्माकाशादिदेशाद्विभागं करोति तदारम्भकालातीतत्वात् । प्रदेशान्तरसंयोगं तु करोत्येव अकृतसंयोगस्य कर्मणः कालात्ययाभावादिति ।

कारणाकारणविभागादपि कथम् ? यदा हस्ते कर्मोत्पन्नमवयवान्तराद् विभागमकुर्वदाकाशादिदेशेभ्यो विभागानारभ्य प्रदेशान्तरे संयोगानारभते तदा ते कारणाकारणविभागाः कर्म यां दिशं प्रति कार्यारम्भाभिमुखं तामपेक्ष्य कार्याकार्यविभागानारभन्ते, तदनन्तरं कारणाकारणसंयोगाच्च कार्याकार्यसंयोगानिति । यदि कारणविभागानन्तरं कार्यविभागोत्पत्तिः कारणसंयोगानन्तरं कार्यसंयोगोत्पत्तिः, नन्वेवमवयवावयविनोर्युतसिद्धिदोषप्रसङ्गः इति । न । युतसिद्ध्यपरिज्ञानात् । सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वमियन्तु नित्यानाम् अनित्यानां तु युतेष्वाश्रयेषु समवायो युतसिद्धिरिति । त्व-

गिन्द्रियशरीरयोः पृथग्गतिमत्त्वं नास्ति युतेष्वाश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः। अणवाकाशयोस्त्वाश्रयान्तराभावेऽप्यन्यतरस्य पृथग्गतिमत्त्वात् संयोगविभागौ सिद्धौ। तन्तुपटयोरनित्ययोराश्रयान्तराभावात् परस्परतः संयोगविभागाभाव इति। दिगादीनान्तु पृथग्गतिमत्त्वाभावादिति परस्परेण संयोगविभागाभाव इति।

विनाशस्तु सर्वस्य विभागस्य क्षणिकत्वादुत्तरसंयोगावधिसद्भावात् क्षणिक इति। न तु संयोगवद्यावदाश्रयस्थायी विभाग इति। कस्मात्? संयुक्तप्रत्ययवद्विभक्तप्रत्ययानुवृत्त्यभावात्। तस्मादुत्तरसंयोगावधिसद्भावात् क्षणिक इति।

क्वचिच्चाश्रयविनाशादेव विनश्यतीति। कथम्? यदा द्वितन्तुककारणावयवे अंशौ कर्मोत्पन्नमंश्वन्तराद्विभागमारभते तदैव तन्त्वन्तरेऽपि कर्मोत्पद्यते विभागाच्च तन्त्वारम्भकसंयोगविनाशः तन्तुकर्मणा तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः। ततो यस्मिन्नेव काले विभागात् तन्तुसंयोगविनाशः तस्मिन्नेव काले संयोगविनाशात् तन्तुविनाशस्तस्मिन् विनष्टे तदाश्रितस्य तन्त्वन्तरविभागस्य विनाश इति। एवं तद्युत्तरविभागानुत्पत्तिप्रसङ्गः कारणविभागाभावात्, ततः प्रदेशान्तरसंयोगवति संयोगाभाव इत्यतो विरोधिगुणासम्भवात् कर्मणश्चिरकालावस्थायित्वं नित्यद्रव्यसमवेतस्य च नित्यत्वमिति दोषः। कथम्? यदाप्यद्व्यणुकारम्भकपरमाणौ

काशीसंस्कृतसीरीज़-ग्रन्थमाला ।

इयं काशी-संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते ।

---

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८

२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीका-सहितम् । (वेदान्तं १) रु० ८—०

३ वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १) रु० २—०

४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६

५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावान्तः । (व्याकरणं १) रु० ५—०

५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादि-समासपर्यन्तः । द्वितीय भाग (व्याकरणं १) रु० ८—०

६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण-निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रि-कृतव्याख्यासहिता । (न्यायं १) रु० ६—०

७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रि-कासमवेतविवरणेन च समन्वितम् । (वेदान्तं २) रु० ०—८

८ अलङ्कारप्रदीपः । श्रीविश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १) रु० ०—८

९ अनङ्गरङ्गः । महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १) रु० ०—१२

१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०

११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १) रु० ०—८

१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-नि-म्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४

१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम । (वेदान्तं ३) रु० १—४

१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदासवि० । सञ्जीवनी शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६

१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटि-प्पणा । (न्यायं २) रु० १—०

१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे ह-रिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यस-हितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवक-ण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्प-ण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम् । मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः । (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्यायपं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि श्रीशिवमहिम्नस्तोत्रम् । श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः । भाषाटीकासहितः । (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः । (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका । श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः । (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः । (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः । (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः । म० म० श्रीनागेशभट्टविरचितः अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ४—८

२८ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं०श्रीकनकलाल ठक्कुरकृतार्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्य३) रु० ० १२

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य, सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) यन्त्रस्थ

३० न्यायकुसुमाञ्जलीः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । म० म० रुचिदत्तकृतमकरन्दोद्भासित म० म० वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः । (न्यायं ४) रु० ६—०

३१ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः । (व्याकरणं ५) यन्त्रस्थ

३२ अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः। (मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम्। परमर्षि भारद्वाजोद्द्योतकरविरचितम्। महर्षि-गोतमादिचरितसम्व लितबृहत्भूमिकासहितम्। (न्याय वि० ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४) (वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः। (वेदान्तं ४) रु० ६—०

३७ काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः त्रिद्वद्वर-वामन-जयादित्यविनिर्मिता। (व्याकरणं ६) रु० ६—०

३८ प्राकृतप्रकाशः। भामहकृतः। श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः। टिप्पण्या च संयोजितः। (व्याकरणं ७) रु० १—६

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः। भाषानुवादसमेतः। (वेदान्तं ६) रु० २—०

४० श्रीनारदीयसंहिता। ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः। (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः। मेदिनीकारविरचितः। (कोशं १) रु० १—८

४२ मीमांसादर्शनम्। श्रीशबरस्वामिविरचितभाष्यसहितम् सपूर्णम्। (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम्। श्रीगोतममुनीप्रणीतम्। श्रीवात्स्यायनमुनीप्रणीतभाष्यसहितम्। श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम्। टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं १) रु० १—८

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं २) रु० १—८

४६ भास्वती। श्रीमच्छतानन्दविरचिता। श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता। (ज्योतिषं ३) रु० २—०

४७ फक्किकाप्रकाशः। उपाध्यायोपाह्ववैयाकरणकेसरीबिरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः। पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ८) रु० १—४

४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०७) रु० १—४

४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु० ४—०

५० अधिकरणकौमुदी। श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु० १—०

५१ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम् म.म. श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण कृता भावबोधिनी टिप्पण्या समलङ्कृतः संपूर्णम्। (काव्य ५) रु० १-४

५२ कातबोधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायाऽनुगतः। रु०—८